न्दनो रामो भार्गवो रेणुकासुतः । तस्य दाशरथेः श्रुत्वा रामस्याक्लिष्टकर्मणः ४४ कौतूहलान्वितो राममयोध्यामगमत्पुनः । धनुरादाय तद्दिव्यं क्षत्रियाणां निबर्हणम् ४५ जिज्ञासमानो रामस्य वीर्यं दाशरथेस्तदा । तं वै दशरथः श्रुत्वा विषयान्तमुपागतम् ४६ प्रेषयामास रामस्य रामं पुत्रं पुरस्कृतम् । स तमभ्यागतं दृष्ट्वा उद्यतास्त्रमवस्थितम् ४७ प्रहसन्निव कौन्तेय रामो वचनमब्रवीत् । कृतकालं हि राजेन्द्र धनुरेतन्मया विभो ४८ समारोपय यत्नेन यदि शक्तोऽसि पार्थिव । इत्युक्तस्त्वाह भगवंस्त्वं नाधिक्षेप्तुमर्हसि ४९ नाहमप्यधमो धर्मे क्षत्रियाणां द्विजातिषु । इक्ष्वाकूणां विशेषेण बाहुवीर्येण कत्थनम् ५० तमेवं वादिनं तत्र रामो वचनमब्रवीत् । अलं वै व्यपदेशेन धनुरायच्छ राघव ५१ ततो जग्राह रोषेण क्षत्रियर्षभसूदनम् । रामो दाशरथिर्दिव्यं हस्ताद्रामस्य कार्मुकम् ५२ धनुरारोपयामास सलील इव भारत । ज्याशब्दमकरोच्चैव स्मयमानः स

करण्याचें ठरविलें होतें व तदनंतर अयोध्येमध्यें तो दशरथपुत्र राम झाल्याचें आह्मीं पाहिलें ४३. भृगुवंशज ऋचीकनंदन परशुराम रेणुकेचा पुत्र होय. तो परशुराम त्या अमोघ पराक्रमी दाशरथि रामाचा वृत्तांत श्रवण करून त्याला पहाण्याकरितां उद्युक्त झाला आणि ते क्षत्रियनाशक दिव्य धनुष्य घेऊन दाशरथि रामाचें वीर्य जाणण्याकरितां अयोध्येमध्यें आला. आपल्या प्रदेशाच्या सीमेवर तो आल्याचें श्रवण केल्यावर दशरथानें ४४, ४५, ४६ परशुरामाकडे आपल्या रामनामक पुत्राला पुढाकार देऊन पाठविलें. तेव्हां हातांत धनुष्य घेतलेला तो राम समीप येऊन उभा राहिलेला आहे असें अवलोकन केल्यावर ४७, हे कुंतीपुत्रा, परशुराम हसत हसत त्याला ह्मणाला " हे राजाधिराज प्रभो, कालासारिख्या क्षत्रियांचा ज्यानें वध केला आहे तें हें धनुष्य मीं आणिलें आहे ४८. तेव्हां, हे राजा, सामर्थ्य असेल तर यत्न करून तूं ह्याला प्रत्यंचा चढीव. " ह्याप्रमाणें परशुरामानें सांगितलें असतां राम ह्मणाला " हे भगवन्, आपण अवहेलना करूं नका ४९. क्षत्रियाच्या धर्मामध्यें मीही कांहीं अगदीं टाकाऊ नाहीं; परंतु, द्विजांमध्यें आणि विशेषतः इक्ष्वाकुवंशजांमध्यें बाहुवीर्याविषयीं कोणी फुशारक्या मारीत नसतात " ५०. ह्याप्रमाणें राम बोलत असतांना परशुराम त्याला ह्मणाले " हे राघवा, आतां बोलणें पुरें; धनुष्य लवीव" ५१. ह्याप्रमाणें परशुरामांनीं सांगितल्यावर दाशरथि रामानें परशुरामांच्या हातांतून मोठ्या रागानें क्षत्रियांचा नाश करणारें तें धनुष्य रागारागानें घतलें ५२. नंतर, हे भरतकुलोत्पन्ना धर्मराजा, त्या धनुष्याला रामानें सहज प्रत्यंचा चढविली आणि तो वीर्यवान् राम हसत हसत प्रत्यंचेचा टणत्कार

वीर्यवान् ५३ तस्य शब्दस्य भूतानि वित्रसंत्यशनेरिव । अथाब्रवीत्तदा
रामो रामं दाशरथिस्तदा ५४ इदमारोपितं ब्रह्मन्किमन्यत्करवाणि ते ।
तस्य रामो ददौ दिव्यं जामदग्न्यो महात्मनः । शरमाकर्णदेशान्तमयमाकृ-
ष्यतामिति ५५ लोमश उवाच ॥ एतच्छ्रुत्वाब्रवीद्रामः प्रदीप्त इव मन्युना ।
श्रूयते क्षम्यते चैव दर्पपूर्णोसि भार्गव ५६ त्वया ह्यधिगतं तेजः क्षत्रि-
येभ्यो विशेषतः । पितामहप्रसादेन तेन मां क्षिपसि ध्रुवम् ५७ पश्य मां
स्वेन रूपेण चक्षुस्ते वितराम्यहं । ततो रामशरीरे वै रामः पश्यति
भार्गवः ५८ आदित्यान्सवसून्रुद्रान्साध्यांश्च समरुद्गणान् । पितरो हुता-
शनश्चैव नक्षत्राणि गृहास्तथा ५९ गन्धर्वा राक्षसा यक्षा नद्यस्तीर्थानि
यानि च । ऋषयो वालखिल्याश्च ब्रह्मभूताः सनातनाः ६० देवर्षयश्च
कात्स्न्येन समुद्राः पर्वतास्तथा । वेदाश्च सोपनिषदो वषट्कारैः महा-
ध्वरैः ६१ चेतोमन्ति च सामानि धनुर्वेदश्च भारत । मेघवृन्दानि वर्षाणि
विद्युतश्च युधिष्ठिर ६२ ततः स भगवान्विष्णुस्तं वै बाणं मुमोच ह ।
शुष्काशनिसमाकीर्णं महोल्काभिश्च भारत ६३ पांसुवर्षेण महता मेघ-

---

करूं लागला असतां ५३ त्या विद्युत्पातासारिख्या ध्वनीनें प्राणी त्रस्त होऊं लागले. तेव्हां दाशरथि राम परशुरामांना ह्मणाला ५४ " हे ब्रह्मन्, आपल्या आज्ञप्रमाणें ह्या धनुष्याला प्रत्यंचा चढविली; आतां मी आपणांकरितां आणखी काय करूं ?" (ह्याप्रमाणें रामानें सांगितलें असतां) जमदग्निपुत्र परशुरामांनीं महात्म्या रामाला एक दिव्य बाण दिला आणि " धनुष्याला लावून हा कानापर्यंत ओढ " ह्मणून त्याला सांगितलें ५५. लोमश सांगतातः—हें ऐकून क्रोधानें जसा कांहीं प्रदीप्त झालेला राम ह्मणाला " हे भार्गवा, तूं गर्वानें भरला आहेस असें ऐकण्यांत येत आहे; परंतु, ह्याबद्दल मी तुझी क्षमा करितों ५६. क्षत्रियांना जिंकून विशेषतः पितामहाच्या प्रसादानें तुला तेज प्राप्त झालें आहे व त्यामुळेंच निःसंशय तूं माझी निंदा करीत आहेस ५७; परंतु, माझें स्वरूप तूं अवलोकन कर; मी तुला (दिव्य) दृष्टि देतों. तदनंतर रामाच्या शरीराकडे भार्गवराम पाहूं लागला असतां त्याचे ठिकाणीं ५८ आदित्य, वसु, रुद्र, साध्य, मरुद्गण, पितर, अग्नि, नक्षत्र, ग्रह ५९, गंधर्व, राक्षस, यक्ष, नद्या, तीर्थे, ब्रह्मस्वरूप बनलेले सनातन वालखिल्य ऋषि ६०, सर्व देवर्षि, समुद्र, पर्वत, वेद, उपनिषदें, वषट्कार, यज्ञ ६१, सचेतन सामें, धनुर्वेद, मेघसमुदाय, पर्जन्य आणि विद्युल्लता हीं, हे भरतकुलोत्पन्ना युधिष्ठिरा, त्यानें अवलोकन केलीं ६२. तदनंतर, हे भरतकुलोत्पन्ना युधिष्ठिरा, " रामरूपानें अवतीर्ण झालेल्या त्या भगवान् विष्णूनें मोठमोठ्या उल्का

वर्षैश्च भूतलम् । भूमिकंपैश्च निर्घातैर्नादैश्च विपुलैरपि ६४ स रामं
विह्वलं कृत्वा तेजश्चाक्षिप्य केवलम् । आगच्छज्ज्वलितो बाणो रामबाहु-
प्रचोदितः ६५ स तु विह्वलतां गत्वा प्रतिलभ्य च चेतनाम् । रामः
प्रत्यागतप्राणः प्राणमद्विष्णुतेजसम् ६६ विष्णुना सोऽभ्यनुज्ञातो महेन्द्रम-
गमत्पुनः । भीतस्तु तत्र न्यवसद्व्रीडितस्तु महातपाः ६७ ततः संवत्सरे-
ऽतीते ह्रतौजसमवस्थितम् । निर्मदं दुःखितं दृष्ट्वा पितरो राममब्रुवन् ६८
पितर ऊचुः॥ न वै सम्यगिदं पुत्र विष्णुमासाद्य वै कृतम् । स हि पूज्यश्च
मान्यश्च त्रिषु लोकेषु सर्वदा ६९ गच्छ पुत्र नदीं पुण्यां वधूसरकृता-
ह्वयाम् । तत्रोपस्पृश्य तीर्थेषु पुनर्वपुरवाप्स्यसि ७० दीप्तोदं नाम तत्तीर्थं
यत्र ते प्रपितामहः । भृगुर्देवयुगे राम तप्तवानुत्तमं तपः ७१ तत्तथा कृत-
वान्रामः कौन्तेय वचनात्पितुः । प्राप्तवांश्च पुनस्तेजस्तीर्थेऽस्मिन्पाण्डुन-
न्दन ७२ एतदीदृशकं तात रामेणाक्लिष्टकर्मणा । प्राप्तमासीन्महाराज
विष्णुमासाद्य वै पुरा ७३ [४२०८] इति श्रीमहाभारते शतसाहस्र्यां

आणि शुष्क विद्युल्लता ह्यानीं व्याप्त झालेला तो बाण सोडिला ६३. तेव्हां धुळीचा मोठा वर्षाव होऊं लागला, मेघांचे वर्षाव होऊ लागले, भूकंप झाले, मोठमोठ्या गर्जना व प्रचंड ध्वनि होऊ लागले ६४ आणि परशुरामाला विह्वल करून व फक्त त्याचे तेज नाहींसें करून रामाच्या हातांतून सुटलेला तो जाज्वल्य बाण भूतलावर येऊन पडला ६५. तेव्हां मूर्छा येऊन गेल्यानंतर तो परशुराम हालचाल करूं लागला आणि शुद्धीवर आल्यानंतर त्यानें त्या विष्णुतेजाला प्रणाम केला ६६. तदनंतर विष्णूनें अनुज्ञा दिल्यावर तो परशुराम पुनरपि महेंद्रपर्वतावर गेला व तो महातपस्वी परशुराम भयभीत व लज्जित होऊन तेथें राहिला ६७. तदनंतर एक संवत्सर लोटल्यावर ज्याचें तेज हरण झालें आहे अशा त्या परशुरामाला मदरहित व दुःखित झालेला अवलोकन करून पितर ह्मणाले ६८ " हे पुत्रा, विष्णूशीं गांठ पडल्यावर तूं हें चांगलें केलें नाहींस. तो सर्वदां त्रैलोक्यामध्ये पूज्य व मान्य आहे ६९. आतां, हे पुत्रा, वधूसर असें जिचें नांव पडलेलें आहे त्या पुण्य नदीला जा ह्मणजे तेथील तीर्थामध्यें स्नान केल्यानें तुला पुनरपि तेज प्राप्त होईल ७०. हे परशुरामा, दीप्तोद ह्मणून तें तीर्थ आहे व तेथेंच देवयुगामध्यें तुझ्या प्रपितामह भृगूनें उत्कृष्ट तप केलें आहे " ७१. सारांश, हे कुंतीपुत्रा पांडुनंदना, पित्याच्या वचनावरून परशुरामानें त्याप्रमाणें केलें आणि ह्या तीर्थाचे ठिकाणीं त्याला पुनरपि तेज प्राप्त झालें ७२. बा युधिष्ठिर महाराजा, अमोघपराक्रमी परशुरामानें पूर्वी विष्णूची गांठ

संहितायां वैयासिक्यामारण्यके पर्वणि तीर्थयात्रापर्वणि लोमशतीर्थयात्रायां जामदग्न्यतेजोहानिकथने एकोनशततमोऽध्यायः ॥ ९९ ॥

युधिष्ठिर उवाच ॥ भूय एवाहमिच्छामि महर्षेस्तस्य धीमतः। कर्मणां विस्तरं श्रोतुमगस्त्यस्य द्विजोत्तम १ लोमश उवाच ॥ शृणु राजन्कथां दिव्यामद्भुतामतिमानुषीम्। अगस्त्यस्य महाराज प्रभावममितौजसः २ आसन्कृतयुगे घोरा दानवा युद्धदुर्मदाः। कालकेया इति ख्याता गणाः परमदारुणाः ३ ते तु वृत्रं समाश्रित्य नानाप्रहरणोद्यताः। समंतात्पर्यधावन्त महेन्द्रप्रमुखान्सुरान् ४ ततो वृत्रवधे यत्नमकुर्वंस्त्रिदशाः पुरा। पुरन्दरं पुरस्कृत्य ब्रह्माणमुपतस्थिरे ५ कृताञ्जलींस्तु तान्सर्वान्परमेष्ठीत्युवाच ह। विदितं मे सुराः सर्वं यद्वः कार्यं चिकीर्षितम् ६ तमुपायं प्रवक्ष्यामि यथा वृत्रं वधिष्यथ। दधीच इति विख्यातो महानृषिरुदारधीः ७ तं गत्वा सहिताः सर्वे वरं वै संप्रयाचत। स वो दास्यति धर्मात्मा सुप्रीतेनान्तरात्मना ८ स वाच्यः सहितः सर्वैर्भवद्भिर्जयकाङ्क्षिभिः। स्वान्यस्थीनि प्रयच्छेति त्रैलोक्यस्य हिताय वै ९ स शरीरं

पडल्यावर नाहींसें झालेलें हें अशाप्रकारचें तेज पुनरपि प्राप्त करून घेतलें ७३. ह्याप्रमाणें० वनपर्वांतील तीर्थयात्रापर्वापैकीं लोमशतीर्थयात्रेसंबंधीं परशुरामाच्या तेजोहानीविषयीं नव्याण्णवावा अध्याय समाप्त झाला ॥ ९९ ॥

युधिष्ठिर ह्मणतो:—हे द्विजश्रेष्ठ, त्या बुद्धिमान् अगस्त्य महर्षींचीं कर्में सविस्तर श्रवण करण्याची आणखीही माझी इच्छा आहे १. लोमश सांगतात:—हे महाराज धर्मराजा, अत्यंत तेजस्वी अगस्त्य मुनींच्या प्रभावासंबधानें दिव्य व अमानुष अशी अद्भुत गोष्ट तू श्रवण कर २. कृतयुगीं युद्धामध्यें अजिंक्य, अत्यंत भयंकर आणि कालकेय ह्मणून प्रसिद्ध असे घोर दानव समुदायानी रहात होते ३. नानाप्रकारचीं आयुधें हातांत घेऊन वृत्रासुराचा आश्रय केलेले ते असुरगण इंद्रप्रभृति देवांवर चोहोंकडून हल्ला करीत असत ४. तदनंतर वृत्राचा वध करण्याविषयीं पूर्वी देवांनीं यत्न आरंभिला आणि इंद्राला पुढें घालून ते ब्रह्मदेवाकडे गेले ५. तेव्हां हात जोडून स्थित असलेल्या त्या सर्वांना ब्रह्मदेवानीं सांगितलें " हे देवहो, तुमच्या मनांत जे कार्य कर्तव्य आहे तें मला विदित झालें आहे ६. ज्याच्या योगानें वृत्रासुराचा तुह्मीं वध कराल तो उपाय मी तुह्मांला कथन करितों. मनानें उदार असा एक दधीच ह्मणून प्रख्यात महर्षि आहे ७. त्याच्याकडे तुह्मीं सर्व जुळून जा आणि वर मागा; ह्मणजे सुप्रसन्न अंतःकरणानें तो धर्मात्मा तुह्मांला वर देईल ८. तुह्मीं जयेच्छु देव

समुत्सृज्य स्वान्यस्थीनि प्रदास्यति । तस्यास्थिभिर्महाघोरं वज्रं संस्क्रियतां दृढम् १० महच्छत्रुहणं घोरं षडस्रि भीमनिःस्वनम् । तेन वज्रेण वै वृत्रं वधिष्यति शतक्रतुः ११ एतद्वः सर्वमाख्यातं तस्माच्छीघ्रं विधीयताम्। एवमुक्तास्ततो देवा अनुज्ञाप्य पितामहम् १२नारायणं पुरस्कृत्यदधीचस्याश्रमं ययुः। सरस्वत्याः परे पारे नानाद्रुमलतावृतम् १३ षट्पदोद्गीतनिनदैर्विघुष्टं सामगैरिव। पुंस्कोकिलरवोन्मिश्रं जीवञ्जीवकनादितम् १४ महिषैश्च वराहैश्च सृमरैश्चमरैरपि ।तत्र तत्रानुचरितं शार्दूलभयवर्जितैः १५ करेणुभिर्वारणैश्च प्रभिन्नकरटामुखैः।सरोवगाढैःक्रीडद्भिः समन्तादनुनादितम् १६ सिंहव्याघ्रैर्महानादान्नदद्भिरनुनादितम् । अपरैश्चापि संलीनैर्गुहाकन्दरशायिभिः १७ तेषु तेष्ववकाशेषु शोभितं सुमनोरमम् । त्रिविष्टपसमप्रख्यं दधीचाश्रममागमन् १८ तत्रापश्यन्दधीचं ते दिवाकर-

---

सर्व एकत्र जुळून जा आणि " त्रैलोक्याच्या हिताकरितां आपल्या अस्थि आह्मांला द्या " ह्मणून त्याची प्रार्थना करा ९. तो शरीराचा त्याग करून आपल्या अस्थि तुह्मांला देईल. त्याच्या अस्थींच्या योगानें तुह्मीं एक भयंकर, प्रचंड, शत्रुघातक, घोर, सहाकोनी आणि भयंकर ध्वनीनें युक्त असे बळकट वज्र तयार करा. त्या वज्राच्या योगानें इंद्र वृत्रासुराचा वध करील १०, ११. हे सर्व मीं तुह्मांला सांगितलें आहे, तस्मात्, ह्याप्रमाणें सत्वर तजवीज करा. " ह्याप्रमाणें ब्रह्मदेवानें सांगितलें असतां देवांनीं त्यांची अनुज्ञा घेतली १२ आणि नारायणाला पुढें करून सरस्वतीच्या पलीकडल्या तीरावर नानाप्रकारच्या वृक्षलतांनीं युक्त असलेल्या दधीच मुनींच्या आश्रमाला गेले १३. सामगायन करणाऱ्याप्रमाणें भुंग्यानीं उच्चारिलेल्या ध्वनीच्या योगानें तो आश्रम नादित झाला होता; कोकिल पक्ष्याचा ध्वनि मिश्र झालेला त्यांत ऐकूं येत होता आणि क्षुद्र प्राण्यांनीं तो नादित झाला असल्यामुळें सचेतनच आहे की काय असा भास होत होता १४. महिष, वराह आणि सृमर व चमर (ह्या जातींचे मृग) व्याघ्राचें भय न धरितां त्या आश्रमांत ठिकठिकाणी हिंडत होते १५ हत्तिणी व ज्यांच्या गंडस्थळांतून मदस्राव चालला आहे असे हत्ती सरोवरामध्यें जाऊन क्रीडा करीत असल्यामुळें तो आश्रम सभोंवती गर्जून गेलेला होता १६. मोठमोठ्या गर्जना करणारे सिंह, व्याघ्र आणि गुहा व गिरिकंदर ह्यांत निजणारे व इतरही दबा धरून बसलेले प्राणी ह्याच्या जिकडे तिकडे गर्जना ऐकूं येत होत्या १७. आणि ठिकठिकाणीं तो आश्रम सुशोभित झालेला असल्यामुळें फारच मनोहर दिसत होता. अशा त्या स्वर्गतुल्य दधीचमुनींच्या आश्रमाला देव गेले १८ आणि लक्ष्मीनें युक्त असा

समद्युतिम् । जाज्वल्यमानं वपुषा यथा लक्ष्म्या पितामहम् १९ तस्य
पादौ सुरा राजन्नभिवाद्य प्रणम्य च । अयाचन्त वरं सर्वे यथोक्तं परमे-
ष्ठिना २० ततो दधीचः परमप्रतीतः सुरोत्तमांस्तानिदमभ्युवाच । करोमि
यद्वो हितमद्य देवाः स्वं चापि देहं स्वयमुत्सृजामि २१ स एवं मुक्त्वा
द्विपदां वरिष्ठः प्राणान्वशी स्वान्सहसोत्ससर्ज । ततः सुरास्ते जगृहुः
परासोरस्थीनि तस्याथ यथोपदेशम् २२ प्रहृष्टरूपाश्च जयाय देवास्त्व-
ष्टारमागम्य तमर्थमूचुः । त्वष्टा तु तेषां वचनं निशम्य प्रहृष्टरूपः प्रयतः
प्रयत्नात् २३ चकार वज्रं भृशमुग्ररूपं कृत्वा च शक्रं स उवाच हृष्टः ।
अनेन वज्रप्रवरेण देव भस्मीकुरुष्वाद्य सुरारिमुग्रम् २४ ततो हतारिः
सगणः सुखं वै प्रशाधि कृत्स्नं त्रिदिवं दिविष्ठः । त्वष्ट्रा तथोक्तस्तु पुरन्द-
रस्तद्वज्रं प्रहृष्टः प्रयतो ह्यगृह्णात् २५ [४२३३] इति श्रीमहाभारते
शतसाहस्र्यां संहितायां वैयासिक्यामारण्यके पर्वणि तीर्थयात्रापर्वणि
लोमशतीर्थयात्रायां वज्रनिर्माणकथने शततमोऽध्यायः ॥ १०० ॥

ब्रह्मदेवाप्रमाणें स्वरूपानें जाज्वल्यमान आणि सूर्यतुल्य तेजस्वी अशा त्या दधीच
मुनींना त्या आश्रमामध्यें त्यांनीं अवलोकन केलें १९. हे राजा, देवांनीं त्यांचें पादाभि-
वंदन करून त्यांना प्रणाम केला आणि ब्रह्मदेवाच्या सांगण्याप्रमाणें त्या सर्वांनीं
त्यांच्यापाशीं वर मागितला २०. तेव्हां दधीच मुनि अतिशय संतुष्ट होऊन त्या सुर-
श्रेष्ठांना ह्मणाले " हे देवहो, मी आज तुमचें हित करीन आणि आपल्या देहाचाही
स्वतः त्याग करीन " २१. ह्याप्रमाणें देवांना सांगितल्यानंतर त्या जितेंद्रिय व पुरुषश्रेष्ठ
दधीच मुनींनीं एकदम आपले प्राण सोडिले व तदनंतर गतप्राण झालेल्या त्या मुनींच्या
अस्थींचा ब्रह्मदेवांनीं सांगितल्याप्रमाणें देवांनीं स्वीकार केला २२ व जयप्राप्तीविषयीं
आनंदित झालेल्या त्या देवांनी (त्वष्ट्याकडे येऊन) त्याला ती गोष्ट निवेदन केली.
तेव्हां त्यांचें भाषण श्रवण करून त्वष्टा आनंदित झाला आणि तत्पर राहून प्रयत्न-
पूर्वक २३ दिसण्यांतही अत्यंत उग्र असें वज्र तयार करून आनंदानें इंद्राला ह्मणाला
"हे देव, ह्या श्रेष्ठ वज्रानें तूं आज भयंकर शत्रूचें भस्म करून टाक २४ आणि देवशत्रूचें
भस्म करून टाकिल्यानंतर ज्याच्या शत्रूचा वध झाला आहे असा तूं स्वर्गांत राहून
आपल्या अनुयायांसहवर्तमान संपूर्ण स्वर्गाचें सुखानें राज्य कर. " ह्याप्रमाणें त्वष्ट्यानें
सांगितल्यावर इंद्र आनंदित झाला आणि मोठ्या तत्परतेनें त्यानें तें वज्र धतलें २५.
ह्याप्रमाणें ० वनपर्वांतील तीर्थयात्रापर्वापैकीं लोमशतीर्थयात्रेसंबंधीं वज्र निर्माण करू-
ण्याविषयीं शंभरावा अध्याय समाप्त झाला ॥ १०० ॥

लोमश उवाच ॥ ततः स वज्री बलिभिर्दैवतैरभिरक्षितः। आससाद ततो वृत्रं स्थितमावृत्य रोदसी १ कालकेयैर्महाकायैः समन्तादभिरक्षितम्। समुद्यतप्रहरणैः सशृङ्गैरिव पर्वतैः २ ततो युद्धं समभवद्देवानां दानवैः सह। मुहूर्तं भरतश्रेष्ठ लोकत्रासकरं महत् ३ उद्यतप्रतिपिष्टानां खड्गानां वीरबाहुभिः। आसीत्सुतुमुलः शब्दः शरीरेष्वभिपात्यताम् ४ शिरोभिः प्रपतद्भिश्चाप्यन्तीरक्षान्महीतलम्। तालैरिव महाराज वृन्ताद्भ्रष्टैरदृश्यत ५ ते हेमकवचा भूत्वा कालेयाः परिघायुधाः। त्रिदशानभ्यवर्तन्त दावदग्धा इवाद्रयः ६ तेषां वेगवतां वेगं साभिमानं प्रधावताम्। न शेकुस्त्रिदशाः सोढुं ते भग्नाः प्राद्रवन्भयात् ७ तान्दृष्ट्वा द्रवतो भीतान्सहस्राक्षः पुरन्दरः। वृत्रे विवर्धमाने च कश्मलं महदाविशत् ८ कालेयभयसंत्रस्तो देवः साक्षात्पुरन्दरः। जगाम शरणं शीघ्रं तं तु नारायणं प्रभुम् ९ तं शक्रं कश्मलाविष्टं दृष्ट्वा विष्णुः सनातनः। स्वतेजो व्यदधच्छक्रे बलमस्य विवर्धयन् १० विष्णुना गोपितं शक्रं दृष्ट्वा देवगणास्ततः। सर्वे तेजः समादध्युस्तथा

लोमश सांगतातः—तदनंतर आपल्या शरीरानें आकाश व पृथ्वी व्यापून टाकणाऱ्या वृत्रासुराशीं, बलवान् देवांनीं ज्याचें रक्षण केलें आहे असा, इंद्र हातामध्यें वज्र घेऊन युद्ध करण्यास प्रवृत्त झाला १. सशृंगपर्वताप्रमाणें हातामध्यें आयुधें घेऊन तयार असलेल्या मोठमोठ्या धिप्पाड राक्षसांनीं चोहोंकडून त्या वृत्रासुराचें रक्षण केलें होतें २. देवांचें दानवांसहवर्तमान एक मुहूर्तभर सामान्यतः युद्ध झाल्यानंतर, हे भरतवंशजश्रेष्ठा, शेवटीं शेवटीं लोकांना त्रास उत्पन्न होण्यासारिखें तुंबळ युद्ध होऊं लागलें ३. तेव्हां वीरांनीं आपल्या हातामध्यें धरलेल्या खड्गांचा योद्ध्यांच्या शरीरावर प्रहार होतांक्षणीं त्यापासून अत्यंत भयंकर असा शब्द झाला ४ व, हे महाराज, देठांपासून सुटलेल्या ताड वृक्षाच्या फळांनीं ज्याप्रमाणें पृथ्वी आच्छादित होते त्याप्रमाणें आकाशांतून पडणाऱ्या मस्तकांच्या योगानें हें महीतल आच्छादित झालें ५. नंतर कालेयानीं सुवर्णाचीं कवचें घातल्यावर अडसर हींच आयुधें करून वणव्यानें जळलेल्या पर्वताप्रमाणें दिसणारे ते देवांच्या अंगावर धांवले ६. तेव्हां ते मोठ्या तोऱ्यानें धांवत आहेत असें पाहतांक्षणीं त्या वेगवानांचा वेग सहन न झाल्यामुळें उत्साहरहित झालेले ते देव भयभीत होऊन पळूं लागले ७. याप्रमाणें देव पळून जाऊं लागले व वृत्रासुराचें शरीर आपोआप वाढूं लागलें असें अवलोकन करितांच इंद्राला मोठी चिंता उत्पन्न झाली ८ तदनंतर कालेयांच्या भीतीनें भयभीत झालेला पुरंदर इंद्र सर्वसाक्षी व व्यापक नारायणदेवाला सत्वर शरण गेला ९. तेव्हां पुराणपुरुष विष्णूनें इंद्र चिंताक्रांत झाला आहे असें पाहून त्याच्या बलाची वृद्धि

ब्रह्मर्षयोमलाः ११ स समाप्यायितः शक्रो विष्णुना दैवतैः सह । ऋषि-
भिश्चमहाभागैर्बलवान्समपद्यत १२ ज्ञात्वा बलस्थं त्रिदशाधिपं तु ननाद
वृत्रो महतो निनादान् । तस्य प्रणादेन धरा दिशश्च खं द्यौर्नगाश्चापि
चचाल सर्वम् १३ ततो महेन्द्रः परमाभितप्तः श्रुत्वा रवं घोररूपं महान्तम् ।
भये निमग्नस्त्वरितो मुमोच वज्रं महत्तस्य वधाय राजन् १४ स शक्रव-
ज्राभिहतः पपात महासुरः काञ्चनमाल्यधारी । यथा महाशैलवरः पुर-
स्तात्स मन्दरो विष्णुकराद्विमुक्तः १५ तस्मिन्हते दैत्यवरे भयार्तः शक्रः
प्रदुद्राव सरः प्रवेष्टुम् । वज्रं स मेने न कराद्विमुक्तं वृत्रं भयाच्चापि हतं
न मेने १६ सर्वे च देवा मुदिताः प्रहृष्टा महर्षयश्चेन्द्रमभिष्टुवन्तः । सर्वांश्च
दैत्यांस्त्वरिताः समेत्य जघ्नुः सुरा वृत्रवधाभितप्तान् १७ तैस्त्रास्यमाना-
स्त्रिदशैः समेतैः समुद्रमेवाविविशुर्भयार्ताः १८ प्रविश्य चैवोदधिमप्रमेयं

करण्याकरितां त्याच्या शरीरांत आपलें तेज प्रविष्ट केलें असतां १० विष्णूनें आपलें तेज इंद्राचे ठिकाणीं स्थापित केलें असें पाहिल्यावर देवगण व निष्पाप ब्रह्मर्षि ह्या सर्वांनींही तसेंच आपलें तेज त्याचे ठिकाणीं स्थापित केलें ११. ह्याप्रमाणें देव व महाभाग्यवान् ऋषि ह्यांसहवर्तमान विष्णूनें आपलें तेज इंद्राचे शरीरांत स्थापन केल्यावर तो इंद्र मोठा बलवान् झाला १२. सारांश, स्वर्गाधिपति महेंद्र अशारीतीनें सबल झालेला पाहतांच वृत्रासुर मोठमोठ्यानें ओरडूं लागला व त्याच्या त्या ओरडण्यानें पृथ्वी, दिशा, आकाश, अंतरिक्ष आणि पर्वत हीं सर्व थरथर कांपूं लागलीं १३. तदनंतर, हे राजा, त्याचा तो घोर व महान् असा शब्द श्रवण करितांक्षणीं त्या इंद्रानें अत्यंत क्षुब्ध होऊन भयपूर्वक त्याच्या वधाकरितां सत्वर मोठें वज्र सोडिलें १४. तेव्हां इंद्रानें वज्राचा प्रहार केला असतां, ज्याप्रमाणें पूर्वी विष्णूच्या हातांतून पर्वतश्रेष्ठ मंदर पर्वत पडला त्याप्रमाणें, सुवर्णाच्या माळा धारण करणारा असा तो महासुर वृत्र घायाळ होऊन पडला १५. अशारीतीनें दैत्यश्रेष्ठ वृत्रासुराचा वध झाला; परंतु, भीतीमुळें आपण आपल्या हातांतून वज्र सोडिलें नाहीं व वृत्रासुराचा वधही केला नाहीं असें त्या इंद्राला वाटूं लागल्यामुळेंच तो भयभीत होऊन लपण्याकरितां सरोवराकडे धांवला १६. (ह्याप्रमाणें वृत्रासुराचा वध झाला) असें पाहून सर्व देव व महर्षि ह्यांना फार आनंद झाला; ते इंद्राची स्तुति करूं लागले आणि वृत्रासुराच्या वधानें खवळून गेलेल्या त्या सर्व दैत्यांना एकत्र होऊन मारूं लागले १७. नंतर देवांनीं एकत्र जमून आपल्याला त्रास देण्यास आरंभ केला असें पाहून ते भयभीत झालेले दैत्य समुद्रांत लपून बसण्याकरितां गेले १८. ह्याप्रमाणें मत्स्यांनीं युक्त व मगरांनीं

झषाकुलं नक्रसमाकुलं च । तदा स्म मन्त्रं सहिताः प्रचक्रुस्त्रैलोक्यनाशार्थमभिस्मयन्तः । तत्र स्म केचिन्मतिनिश्चयज्ञास्तांस्तानुपायाननुवर्णयन्ति १९ तेषां तु तत्र क्रमकालयोगाद्घोरामतिश्चिन्तयतां बभूव । ये सन्ति विद्यातपसोपपन्नास्तेषां विनाशः प्रथमं तु कार्यः २० लोका हि सर्वे तपसा ध्रियन्ते तस्मात्त्वरध्वं तपसः क्षयाय २१ ये सन्ति केचिच्च वसुंधरायां तपस्विनो धर्मविदश्च तज्ज्ञाः । तेषां वधः क्रियतां क्षिप्रमेव तेषु प्रनष्टेषु जगत्प्रनष्टम् २२ एवं हि सर्वे गतबुद्धिभावा जगद्विनाशे परमप्रहृष्टाः । दुर्गं समाश्रित्य महोर्मिमन्तं रत्नाकरं वरुणस्यालयं स्म २३[४२५६]

इति श्रीमहाभारते० वैयासिक्यामारण्यके पर्वणि तीर्थयात्रापर्वणि लोमशतीर्थयात्रायां वृत्रवधोपाख्याने एकाधिकशततमोऽध्यायः ॥ १०१ ॥

लोमश उवाच ॥ समुद्रं ते समाश्रित्य वरुणं निधिमम्भसः । कालेयाः संप्रवर्तन्त त्रैलोक्यस्य विनाशने १ ते रात्रौ समभिक्रुद्धा भक्षयन्ति सदा मुनीन् । आश्रमेषु च ये संति पुण्येष्वायतनेषु च २ वसिष्ठस्याश्रमे विप्रा भक्षितास्तैर्दुरात्मभिः । अशीतिः शतमष्टौ च नव चान्ये तपस्विनः ३

सेवित अशा अगाध समुद्राच ठिकाणीं प्रवेश केल्यावर मोठ्या गर्वानें युक्त झालेले ते, त्रैलोक्याच्या नाशाकरितां मसलती करूं लागले व कित्येक विचारी ह्मणविणाऱ्या दैत्यांनीं आपल्याकडून तत्संबधीं कांहीं उपायही सुचविले १९. तेव्हां अशारीतीनें विचार करीत बसलेल्या त्या दैत्यांना कालगतीनें असा एक घोर विचार सुचला कीं, " जे कोणीं विद्यासंपन्न व तपश्चर्या करणारे असतील त्यांचा प्रथम नाश करावा २०. कारण, सर्व लोक तपाच्याच आधारावर राहिलेले आहेत. ह्मणून तपाचाच सत्वर नाश करावा २१. सारांश, या पृथ्वीवर जे कोणी तपस्वी, धर्मवेत्ते व ज्ञाते असतील यांचा प्रथम सत्वर नाश करावा ह्मणजे जगताचा नाश होईल २२. " (असें वाटून) ते दानव, वरुणालय व मोठमोठ्या लाटांनीं युक्त अशा रत्नाकरसंज्ञक समुद्ररूप किल्ल्याचा आश्रय करून जगताच्या नाशाविषयीं (निश्चित होऊन) अविचारीपणामुळें परम आनंदित झाले २३. ह्याप्रमाणें० वनपर्वांतील तीर्थयात्रापर्वापैकीं लोमशतीर्थयात्रेसंबंधीं वृत्रवधाविषयीं एकशें एकावा अध्याय समाप्त झाला ॥ १०१ ॥

लोमश सांगतातः—ह्याप्रमाणें उदकाचा निधि व वरुणाचें गृह जो समुद्र त्याचा आश्रय करून ते कालेय (कालानामक कश्यप भार्येचे पुत्र) त्रैलोक्याचा नाश करण्यास प्रवृत्त झाले १ आणि ते क्रोधाच्या आवेशामुळें रात्रीं अधेरांत आश्रमामध्यें व पवित्र स्थलांचे ठिकाणीं रहाणाऱ्या मुनींना भक्षण करूं लागले २. त्या दुष्टात्म्यांनीं

च्यवनस्याश्रमं गत्वा पुण्यं द्विजनिषेवितम् । फलमूलाशनानां हि मुनीनां भक्षितं शतम् ४ एवं रात्रौ स्म कुर्वन्ति विविशुश्चार्णवं दिवा ५ भरद्वाजाश्रमे चैव नियता ब्रह्मचारिणः । वाय्वाहाराम्बुभक्षाश्च विंशतिः संनिषूदिताः ६ एवं क्रमेण सर्वांस्तानाश्रमान्दानवास्तदा । निशायां परिबाधन्ते मत्ता भुजबलाश्रयात् ७ कालोपसृष्टाः कालेया घ्नन्तो द्विजगणान्बहून् । न चैनानन्वबुध्यन्त मनुजा मनुजोत्तम ॥ एवंप्रवृत्तान्दैत्यांस्तांस्तापसेषु तपस्विषु ८ प्रभाते समदृश्यन्त नियताहारकर्शिताः । महीतलस्था मुनयः शरीरैर्गतजीवितैः ९ क्षीणमांसैर्विरुधिरैर्विमज्जान्त्रैर्विसंधिभिः । आकीर्णैराबभौ भूमिः शङ्खानामिव राशिभिः १० कलशैर्विप्रविद्धैश्च स्रुवैर्भग्नैस्तथैव च । विकीर्णैरग्निहोत्रैश्च भूर्बभूव समावृता ११ निःस्वाध्यायवषट्कारं नष्टयज्ञोत्सवक्रियम् । जगदासीन्निरुत्साहं कालेयभयपीडितम् १२ एवं संक्षीयमाणाश्च मानवा मनुजेश्वर । आत्मत्राणपरा भीताः प्राद्रवन्त दिशो भयात् १३ केचिद्गुहाः प्रविविशुर्निर्झरांश्चापरे

वसिष्ठांच्या आश्रमामध्यें जाऊन (अनुक्रमें) ऐंशीं, एकशें आठ व नऊ असे तपस्वी ब्राह्मण भक्षण केले ३ व तेथून पवित्र द्विजांनीं सेवित अशा च्यवनाच्या आश्रमांत गेल्यावर फलमूलांवर उपजीविका करणाऱ्या शंभर मुनींना त्यांनीं भक्षण करून टाकिलें ४. ह्याप्रमाणें ते रात्रीं भयंकर प्रकार करून दिवसा समुद्रांत दडून वमत असत ५; इतकेंच नव्हे तर, भरद्वाज ऋषींच्या आश्रमाला जाऊन वायु व उदक भक्षण करणारे व नियमानें ब्रह्मचर्यव्रत धारण करणारे असे वीस ब्राह्मणही त्यांनीं मारून टाकिले ६. ह्याप्रमाणें रात्रीं हिंडून क्रमाक्रमानें त्या मत्त दानवांनीं आपल्या बाहुबलानें ते सर्व आश्रम उध्वस्त करून टाकिले ७. हे पुरुषश्रेष्ठा, अशारीतीनें तप करणाऱ्या मुनींचा नाश करण्यास प्रवृत्त झालेल्या व कालानें प्रेरणा केल्यामुळें पुष्कळ ब्राह्मणांचा वध करीत सुटलेल्या त्या कालेय दैत्यांचा कोणालाही पत्ता लागला नाहीं ८ ; परंतु, प्रातःकालीं पहावें तों मिताहारानें कृश झालेल्या मुनींचीं गतप्राण झालेलीं शरीरें मात्र पृथ्वीतलावर पडलेलीं दिसत ९. सारांश, फुटलेल्या कलशांनीं, मोडलेल्या स्रुवां (यज्ञपात्रां)नीं, अस्ताव्यस्त झालेल्या अग्निहोत्र सामग्रीनें आणि शंखाच्या राशींनीं ज्याप्रमाणें पृथ्वी शोभते त्याप्रमाणें मांस, रक्त आणि मज्जा ह्यांनीं रहित व छिन्नभिन्न झालेल्या आंतड्यांनीं ती (रणभूमि) शोभूं लागली १०,११. तात्पर्य, त्या कालेय दैत्यांच्या भीतीनें ह्या पृथ्वीतलावर वेदाध्ययन, वषट्कार व यज्ञयागादि क्रिया अगदीं बंद होऊन तें अतिशय उदास दिसूं लागलें १२. हे पुरुषश्रेष्ठा, ह्याप्रमाणें (कालेयांपासून) आपला नाश होत आहे असें पाहिल्यानंतर लोक भीतीनें आपल्या रक्षणा-

तथा। अपरे मरणोद्विग्ना भयात्प्राणान्समुत्सृजन् १४ केचिदत्र महेष्वासाः शूराः परमहर्षिताः। मार्गमाणाः परं यत्नं दानवानां प्रचक्रिरे १५ न चैतानधिजग्मुस्ते समुद्रं समुपाश्रितान्। श्रमं जग्मुश्च परममाजग्मुः क्षयमेव च १६ जगत्युपशमं याते नष्टयज्ञोत्सवक्रिये। आजग्मुः परमामार्ति त्रिदशा मनुजेश्वर १७ समेत्य समहेन्द्राश्च भयान्मन्त्रं प्रचक्रिरे। शरण्यं शरणं देवं नारायणमजं विभुम् १८ तेभिगम्य नमस्कृत्य वैकुण्ठमपराजितम्। ततो देवाः समस्तास्ते तदोचुर्मधुसूदनम् १९ त्वं नः स्रष्टा च भर्ता च हर्ता च जगतः प्रभो। त्वया सृष्टमिदं विश्वं यच्चेङ्गं यच्च नेङ्गति २० त्वया भूमिः पुरा नष्टा समुद्रात्पुष्करेक्षण। वाराहं वपुराश्रित्य जगदर्थे समुद्धृता २१ आदिदैत्यो महावीर्यो हिरण्यकशिपुः पुरा। नारसिंहं वपुः कृत्वा सूदितः पुरुषोत्तम २२ अवध्यः सर्वभूतानां बलिश्चापि महासुरः। वामनं वपुराश्रित्य त्रैलोक्याद्भ्रंशितस्त्वया २३ असुरश्च महेष्वासो जम्भ इत्यभिविश्रुतः। यज्ञक्षोभकरः क्रूरस्त्वयैव

करितां दशदिशेला पळूं लागले १३. कांहींनीं मरणाला भिऊन गुहांचा आश्रय केला, कांहीं ओढ्यांत दडून बसले व कांहींनीं तर भयानें प्राण सोडिले १४. त्यांपैकीं कांहीं जे शूर व मोठमोठीं धनुष्यें धारण करणारे होते ते मोठ्या आनंदानें दानवांच्या शोधाविषयीं फार यत्न करूं लागले असतां १५ त्यांना ते सांपडले तर नाहींच परंतु, अतिशय श्रम झाल्यामुळें मृत्युमुखीं मात्र पडावें लागलें १६. सारांश, जगतामध्यें जिकडे तिकडे शुकशुकाट झाला व यज्ञयागादि क्रिया अगदीं बंद झाल्या असें पाहून, हे पुरुषश्रेष्ठा युधिष्ठिरा, देवांना अतिशय चिंता उत्पन्न झाली १७ आणि इंद्रासहवर्तमान त्या भयभीत झालेल्या देवांनीं मसलत करून शरण जाण्यास योग्य व जन्मरहित अशा व्यापक नारायण देवाला शरण जाण्याचें ठरविलें १८ व शरण गेल्यानंतर अपराजित अशा वैकुंठनामक विष्णूला नमस्कार करून ते सर्व त्या मधुसूदनाची स्तुति करूं लागले कीं, १९, "हे प्रभो, आपण आमचें व ह्या जगताचें उत्पत्ति, स्थिति व नाश करणारे असून हें स्थावरजंगमात्मक जगत् आपणच उत्पन्न केलें आहे २०. हे कमलनयना, पूर्वी आपणच ह्या जगताच्या कल्याणाकरितां वराहरूप धारण करून समुद्रांत बुडालेली पृथ्वी वर काढिलींत २१ व नारसिंह रूप धारण करून, हे पुरुषोत्तमा, महावीर्यवान् आदिदैत्य जो हिरण्यकशिपु त्याचाही वध केलांत २२. हे प्रभो, आपणच वामन अवतार घेऊन सर्वांना अवध्य असा जो महासुर बली त्याच्या-

विनिपातितः २४ एवमादीनि कर्माणि येषां संख्या न विद्यते। अस्माकं भयभीतानां त्वं गतिर्मधुसूदन २५ तस्मात्त्वां देवदेवेश लोकार्थं ज्ञापयामहे। रक्ष लोकांश्च देवांश्च शक्रं च महतो भयात् २६ [४२८०]

इति श्रीमहाभारते ० वैयासिक्यामारण्यके पर्वणि तीर्थयात्रापर्वणि लोमशतीर्थयात्रायां विष्णुस्तवे द्व्यधिकशततमोऽध्यायः ॥ १०२ ॥

देवा ऊचुः ॥ तव प्रसादाद्वर्धन्ते प्रजाः सर्वाश्चतुर्विधाः। ता भाविता भावयन्ति हव्यकव्यैर्दिवौकसः १ लोका ह्येवं विवर्धन्ते ह्यन्योन्यं समुपाश्रिताः। त्वत्प्रसादान्निरुद्विग्नास्त्वयैव परिरक्षिताः २ इदं च समनुप्राप्तं लोकानां भयमुत्तमम्। न च जानीम केनेमं रात्रौ वध्यन्ति ब्राह्मणाः ३ क्षीणेषु च ब्राह्मणेषु पृथिवी क्षयमेष्यति। ततः पृथिव्यां क्षीणायां त्रिदिवं क्षयमेष्यति ५ त्वत्प्रसादान्महाबाहो लोकाः सर्वे जगत्पते। विनाशं नाधिगच्छेयुस्त्वया वै परिरक्षिताः ५ विष्णुरुवाच ॥ विदितं मे सुराः

पासून त्रैलोक्याचें राज्य हरण केलें २३ व त्याचप्रमाणें मोठें धनुष्य धारण करणारा, यज्ञाचा विध्वंस करणारा व जंभ ह्मणून प्रसिद्ध असलेल्या क्रूर असुराचेंही आपणच निर्दलन केलेंत २४. हे प्रभो, ह्याप्रमाणें आपले असंख्य असे किती ह्मणून पराक्रम वर्णन करावेत ? असो. हे मधुसूदना, भयभीत झालेल्या आमचें रक्षण करणारे आपणच आहांत २५. ह्यास्तव, हे देवांमध्यें श्रेष्ठ प्रभो, लोकांच्या कल्याणाकरितां आह्मी आपली विनति करीत आहोत. तरी देव, इंद्र व लोक ह्यांचें ह्या भयापासून रक्षण करा २६. ह्याप्रमाणें ० वनपर्वांतील तीर्थयात्रापर्वापैकीं लोमशतीर्थयात्रेसंबंधीं विष्णुस्तवाविषयीं एकशें दुसरा अध्याय समाप्त झाला ॥ १०२ ॥

देव ह्मणतात:—हे प्रभो, तुझ्या कृपेनेंच सर्व चतुर्विध (देव, मनुष्य, तिर्यक् व स्थावर) प्रजा वृद्धिंगत होतात व अशारीतीनें वाढलेल्या प्रजांचें देवांनीं पालन केलें असतां त्या प्रजा हव्य (देवांकरितां दिलें जाणारें) व कव्य (पितृउद्देशानें दिलें जाणारें) यांच्या योगानें देवांचें आराधन करितात १. हे लोकपालका, ह्याप्रमाणें लोक एकमेकांच्या आश्रयांनीं वाढले असतां आपल्याच प्रसादानें उपद्रवरहित व सुरक्षित होऊन रहातात २; परंतु, सांप्रत कालीं हे लोकांना अतिशय मोठें भय प्राप्त झालें आहे कीं, हे (कालेय) कोणाच्या मदतीनें रात्रीं ब्राह्मणांचा वध करितात हें समजत नाहीं ३. असा ब्राह्मणांचा क्षय झाला असतां पृथ्वी नाश पावेल व पृथ्वीचा नाश झाला असतां त्रिदिव (स्वर्ग, मृत्यु व पाताल) सुद्धां नाहींसें होऊन जाईल. ह्याकरितां, हे महाबाहो, हे जगत्पालका, आपण रक्षण केलेले हे सर्व लोक आपल्या प्रसादानें

सर्वं प्रजानां क्षयकारणम् । भवतां चापि वक्ष्यामि शृणुध्वं विगतज्वराः ६
कालेय इति विख्यातो गणः परमदारुणः । तैश्च वृत्रं समाश्रित्य जग-
त्सर्वं प्रमाथितम् ७ ते वृत्रं निहतं दृष्ट्वा सहस्राक्षेण धीमता । जीवितं
परिरक्षन्तः प्रविष्टा वरुणालयम् ८ ते प्रविश्योदधिं घोरं नक्रग्राहसमाकु-
लम् । उत्सादनार्थं लोकानां रात्रौ घ्नन्ति ऋषीनिह ९ न तु शक्याः
क्षयं नेतुं समुद्राश्रयगा हि ते । समुद्रस्य क्षये बुद्धिर्भवद्भिः संप्रधार्यताम् १०
अगस्त्येन विना को हि शक्तोऽन्योऽर्णवशोषणे । अन्यथा हि न शक्यास्ते
विना सागरशोषणम् ११ एतच्छ्रुत्वा तदा देवा विष्णुना समुदाहृतम् ।
परमेष्ठिनमाज्ञाप्य अगस्त्यस्याश्रमं ययुः १२ तत्रापश्यन्महात्मानं वारुणिं
दीप्ततेजसम् । उपास्यमानमृषिभिर्देवैरिव पितामहम् १३ तेऽभिगम्य महा-
त्मानं मैत्रावरुणिमच्युतम् । आश्रमस्थं तपोराशिं कर्मभिः स्वैरभि-
ष्टुवन् १४ देवा ऊचुः ॥ नाहुषेणाभितप्तानां त्वं लोकानां गतिः पुरा ।
भ्रंशितश्च सुरैश्वर्याल्लोकार्थं लोककण्टकः १५ क्रोधात्प्रवृद्धः सहसा

नाश पावणार नाहीत अशी व्यवस्था करा ४,५. विष्णु ह्मणतातः—हे देव हो, तुमच्या व प्रजाच्या नाशाचें कारण मला कळून आलें आहे. तरी स्वस्थ अंतःकरणपूर्वक मी सांगतो तें ऐका ६. कालेयनामक प्रख्यात असलेल्या अत्यंत घोर अशा दैत्यसमुदायानें वृत्रासुराचा आश्रय करून सर्व जगताचा नायनाट केला ७. तेव्हां सहस्रनयन व बुद्धिमान् अशा इंद्रानें वृत्रासुराचा वध केला हें पाहून त्यांनीं आपल्या जीविताच्या रक्षणाकरितां वरुणाचें गृह जो समुद्र त्यामध्यें प्रवेश केला ८. मगर व सुसरी ह्यांनीं भरलेल्या अशा घोर समुद्रांत प्रवेश केल्यानंतर ते येथें येऊन लोकांना त्रास देण्याकरितां रात्रीं ऋषींचा वध करूं लागले ९. तस्मात्, समुद्राचा आश्रय केलेल्या त्या कालेयसंज्ञक दानवांचा नाश करणें फार दुर्घट आहे. ह्मणून तुह्मी विचारपूर्वक एकादी समुद्रशोषणाची युक्ति काढा १०. (मला विचाराल तर) अगस्त्य मुनीवाचून समुद्राचें शोषण करण्यास कोणीही समर्थ नाहीं व सागराचें शोषण झाल्यावाचून त्यां (कालेयां) चा नाश करणें तर मुळींच शक्य नाहीं ११. ह्याप्रमाणें विष्णूचें बोलणें श्रवण करून व त्याचा निरोप घेऊन ते देव अगस्त्य ऋषींच्या आश्रमाला आले १२. तेथें येतांच देवांनीं सेवित अशा ब्रह्मदेवाप्रमाणें ऋषिसमुदायांनीं परिवेष्टित व तेजस्वी असे मित्रावरुणपुत्र अगस्त्य ऋषि त्यांच्या दृष्टीं पडले १३. नंतर ते आश्रमामध्यें बसलेल्या त्या तपोराशींच्या समीप जाऊन त्या महात्म्याचें स्तवन करूं लागले १४. (ते ह्मणाले) " पूर्वी नहुषराजापासून लोकांना त्रास

भास्करस्य नगोत्तमः । वचस्तवानतिक्रामन्विंध्यः शैलो न वर्धते १६
तमसा चावृते लोके मृत्युनाभ्यर्दिताः प्रजाः । त्वामेव नाथमासाद्य निर्वृर्तिं परमां गताः १७ अस्माकं भयभीतानां नित्यशो भगवान्गतिः । ततस्त्वार्ताः प्रयाचामो वरं त्वां वरदो ह्यसि १८ [४३००] इति श्रीमहाभारते० वैयासिक्यामारण्यके पर्वणि तीर्थयात्रापर्वणि लोमशतीर्थयात्रायामगस्त्यमाहात्म्यकथने त्र्यधिकशततमोऽध्यायः ॥ १०३ ॥

युधिष्ठिर उवाच ॥ किमर्थं सहसा विंध्यः प्रवृद्धः क्रोधमूर्च्छितः । एतदिच्छाम्यहं श्रोतुं विस्तरेण महामुने १ लोमश उवाच ॥ अद्रिराजं महाशैलं मेरुं कनकपर्वतम् । उदयास्तमने भानुः प्रदक्षिणमवर्तत २ तं तु दृष्ट्वा तथा विंध्यः शैलः सूर्यमथाब्रवीत् । यथा हि मेरुर्भवता नित्यशः परिगम्यते ३ प्रदक्षिणश्च क्रियते मामेवं कुरु भास्कर । एवमुक्तस्ततः सूर्यः शैलेन्द्रं प्रत्यभाषत ४ नाहमात्मेच्छया शैलं करोम्येनं प्रदक्षिणम् । एष मार्गः प्रदिष्टो मे यैरिदं निर्मितं जगत् ५ एवमुक्तस्ततः

झाला असतां, हे ब्रह्मन्, त्या लोककंटकाला इंद्रपदापासून आपणच भ्रष्ट केलेंत १५. पर्वतामध्यें श्रेष्ठ असा विंध्य नांवाचा पर्वत सूर्यावर रागावून एकाएकीं वाढावयास लागला असतां आपल्या वचनाचें उल्लंघन करावयाचें नाहीं ह्मणूनच तो वाढेनासा झाला १६ आणि विंध्याचलाच्या वृद्धीनें पडलेल्या अंधकारामुळे व मृत्यूनें पीडिल्यामुळें लोकांनीं आपलेंच अवलंबन केलें व त्याच्याच योगानें ते सुखी झाले १७. तस्मात्, भयभीत झालेल्या आह्मां सर्वांची आपणच गति आहांत. करितां, वर देणारे जे आपण त्या आपणापाशीं सर्वांच्या रक्षणाविषयीं दीन होऊन आह्मी वर मागत आहोंत १८. ह्याप्रमाणें ० वनपर्वांतील तीर्थयात्रापर्वांपैकीं लोमशतीर्थयात्रेसंबंधीं अगस्त्यमाहात्म्यकथनाविषयी एकशें तिसरा अध्याय समाप्त झाला ॥ १०३ ॥

युधिष्ठिर ह्मणतातः — हे मुनिश्रेष्ठ, विंध्यपर्वत रागारागानें एकाएकीं कां वाढूं लागला हें सविस्तर श्रवण करण्याची माझी इच्छा आहे १. लोमश सांगतात:— हे महाराज, सूर्य, उदयापासून अस्ताच्या आंत पर्वतांचा राजा जो सुवर्णमय महापर्वत मेरु त्याला प्रदक्षिणा करीत असतो २. हें सूर्याचें (प्रदक्षिणारूप) कृत्य पाहून विंध्यपर्वत त्याला ह्मणाला " हे सूर्यनारायणा, ज्याप्रमाणें तूं प्रत्येक दिवशीं मेरुपर्वताच्या सभोंवतीं हिंडून ३ त्याला प्रदक्षिणा घालतोस त्याप्रमाणें मलाही, हे भास्करा, तूं प्रदक्षिणा घालीत जा. " हें ऐकल्यावर पर्वतश्रेष्ठ विंध्याला सूर्य ह्मणाला ४, " हे विंध्याचला, मी या पर्वताला स्वेच्छेनें प्रदक्षिणा घालीत नाहीं; तर ज्यांनीं

क्रोधात्प्रवृद्धः सहसाचलः । सूर्याचन्द्रमसोर्मार्गं रोद्धुमिच्छन्परंतप ६ ततो देवाः सहिताः सर्व एव विंध्यं समागम्य महाद्रिराजम् । निवारयामासु-रुपायतस्तं न च स्म तेषां वचनं चकार ७ अथाभिजग्मुर्मुनिमाश्रमस्थं तपस्विनं धर्मभृतां वरिष्ठम् । अगस्त्यमत्यद्भुतवीर्यवन्तं तं चार्थमूचुः सहिताः सुरास्ते ८ देवा ऊचुः ॥ सूर्याचन्द्रमसोर्मार्गं नक्षत्राणां गतिं तथा । शैलराजावृणोत्येष विंध्यः क्रोधवशानुगः ९ तं निवारयितुं शक्तो नान्यः कश्चिद्द्विजोत्तम । ऋते त्वां हि महाभाग तस्मादेनं निवारय १० तच्छ्रुत्वा वचनं विप्रः सुराणां शैलमभ्यगात् । सोऽभिगम्याब्रवीद्विंध्यं सदारः समुपस्थितम् ११ मार्गमिच्छाम्यहं दत्तं भवता पर्वतोत्तम । दक्षिणामभिगन्तास्मि दिशं कार्येण केनचित् १२ यावदागमनं मह्यं तावत्त्वं प्रतिपालय । निवृत्ते मयि शैलेन्द्र ततो वर्धस्व कामतः १३ एवं स समयं कृत्वा विंध्येनामित्रकर्शन । अद्यापि दक्षिणाद्देशाद्वारुणिर्न निवर्तते १४ एतत्ते

हें जगत् निर्माण केलें त्यांनींच मला हा मार्ग नेमून दिला आहे " ५ ह्याप्रमाणें सुर्यानें सांगितलें असतां तो अचल (विंध्यपर्वत) क्रोधानें सूर्य व चंद्र ह्यांच्या मार्गाचा रोध करण्याच्या इच्छेनें, हे शत्रुपक्षीयवीरनाशका युधिष्ठिरा, एकाएकीं वाढूं लागला ६. तेव्हां सर्व देव एकत्र होऊन पर्वतश्रेष्ठ विंध्याचलाकडे आले आणि युक्तिप्रयुक्तीनें त्याला ह्मणाले की, " हे विंध्या, तूं वाढूं नकोस; परंतु, त्यानें तें त्या देवांचें वचन ऐकिलें नाहीं ७. (तें पाहून) आश्रमाचे ठिकाणीं बसलेल्या, धर्म पालन करणाऱ्यांमध्यें श्रेष्ठ व अद्भुत वीर्यानें युक्त अशा तपस्वी अगस्त्य मुनीकडे ते देव जमून आले आणि ती गोष्ट (विंध्याचलाचें वाढणें) त्याच्या कानावर घालून ८ ते ह्मणाले " हे मुनिश्रेष्ठ, पर्वतराज विंध्य क्रोधावेशानें सूर्यचंद्राच्याच मार्गाचा रोध करीत आहे असें नाहीं तर त्यानें नक्षत्रांच्याही गतीला प्रतिबंध आणिला आहे ९. ह्यास्तव, हे महाभाग्यवान् द्विजश्रेष्ठ, त्याचें निवारण करण्यास आपणांवांचून दुसरा कोणीही समर्थ नाहीं. ह्मणून आपणच त्याचें निवारण करावें " १०. हें त्या देवांचें भाषण श्रवण केल्यावर ते (अगस्त्य) मुनि आपल्या पत्नीसहवर्तमान त्या पर्वताकडे गेले व तेथें असलेल्या त्या विंध्यपर्वताला ह्मणाले ११ " हे पर्वतश्रेष्ठा, कांहीं कारणामुळें दक्षिणदिशेकडे जाण्याचें माझ्या मनांत आहे १२. तरी तूं मला वाट दे आणि माझ्या आज्ञेनें मी परत येईपर्यंत तूं वाढूं नकोस; नंतर खुशाल वाढ १३. ह्याप्रमाणें विंध्याचलाशीं नियम करून, हे शत्रुपक्षीय वीरनाशका युधिष्ठिरा, ते अगस्त्य मुनि दक्षिणदिशेकडे गेले ते अद्यापही परत आले नाहींत १४. असो. ह्याप्रमाणें

सर्वमाख्यातं यथा विंध्यो न वर्धते । अगस्त्यस्य प्रभावेण यन्मां त्वं परिपृच्छसि १५ कालेयास्तु यथा राजन्सुरैः सर्वैर्निषूदिताः । अगस्त्याद्वरमासाद्य तन्मे निगदतः शृणु १६ त्रिदशानां वचः श्रुत्वा मैत्रावरुणिरब्रवीत् । किमर्थमभियाताः स्थ वरं मत्तः कमिच्छथ । एवमुक्तास्ततस्तेन देवता मुनिमब्रुवन् १७ एवं त्वयेच्छाम कृतं हि कार्यं महार्णवं पीयमानं महात्मन् । ततो वधिष्याम सहानुबन्धान्कालेयसंज्ञान्सुरविद्विषस्तान् १८ त्रिदशानां वचः श्रुत्वा तथेति मुनिरब्रवीत् । करिष्ये भवतां कामं लोकानां च महत्सुखम् १९ एवमुक्त्वा ततोगच्छत्समुद्रं सरितां पतिम् । ऋषिभिश्च तपःसिद्धैः सार्धं देवैश्च सुव्रत २० मनुष्योरगगन्धर्वयक्षकिंपुरुषास्तथा । अनुजग्मुर्महात्मानं द्रष्टुकामास्तदद्भुतम् २१ ततोभ्यगच्छन्सहिताः समुद्रं भीमनिःस्वनम् । नृत्यन्तमिव चोर्मीभिर्वल्गन्तमिव वायुना २२ हसंतमिव फेनौघैः स्खलन्तं कन्दरेषु च । नानाग्राहसमाकीर्णं नानाद्विजगणान्वितम् २३ अगस्त्यसहिता देवाः सगन्धर्वमहो-

---

" अगस्त्य ऋषींच्या प्रभावानें विंध्याचल कसा वाढत नाहीं ह्मणून जें तूं मला विचारिलेस तें मीं तुला सविस्तर कथन केलें १५. आतां हे राजा, अगस्त्यापासून वर प्राप्त करून घेऊन सर्व देवांनीं त्या कालेयांचा कसा नाश केला हें तूं माझ्यापासून श्रवण कर १६. देवांचें वचन ऐकिलें असतां मैत्रावरुणि (अगस्त्य) बोलूं लागले कीं, " हे देवांनों, तुह्मी माझ्याकडे कां आलां आहांत व माझ्यापासून तुह्मांला कोणता वर पाहिजे तें सांगा " हें ऐकतांक्षणीं देव त्या अगस्त्यमुनींला ह्मणाले १७ " हे महात्म्या, आपण महार्णव जो समुद्र त्याचें प्राशन करून टाकावें ह्मणजे देवांचे द्वेष्टे जे कालेयसंज्ञक दैत्य त्यांचा आह्मीं सैन्यासहवर्तमान नाश करून टाकूं " १८. ह्याप्रमाणें त्रिदशांचें वाक्य श्रवण केल्यावर असें केलें असतां यांत देवांचा मनोरथ पूर्ण होऊन लोकांनाही मोठें सुख होणार आहे असा विचार करून " बरें आहे " असें मुनि ह्मणाले १९. ह्याप्रमाणें देवांना सांगून ते अगस्त्य मुनि, ऋषी, तपस्वी व देव ह्यांसहवर्तमान, हे सुव्रता, नद्यांचा पति जो समुद्र त्याजकडे गेले २०. तेव्हां तें अद्भुत कर्म अवलोकन करण्याकरितां त्या महात्म्या मुनींच्या मागोमाग मनुष्य, उरग, गंधर्व व तसेच किंपुरुष जाऊं लागले २१. त्या समुद्राजवळ येतांच त्यांनीं गर्जना करणारा, लाटांच्या योगानें नाचणारा, वायूच्या योगानें शब्द करणारा, फेंसांच्या योगानें हास्यमुख दिसणारा, (आपल्या पोटांत असलेल्या) खडकाला अडखळणारा व नानाप्रकारच्या मगरांनीं व पक्ष्यांनीं

रगाः । ऋषयश्च महाभागाः समासेदुर्महोदधिम् २४ [४३२४] इति श्रीमहाभारते ० वैयासिक्यामारण्यके पर्वणि तीर्थयात्रापर्वणि लोमशतीर्थयात्रायामगस्त्योपाख्याने चतुरधिकशततमोऽध्यायः ॥ १०४ ॥

लोमश उवाच ॥ समुद्रं स समासाद्य वारुणिर्भगवानृषिः । उवाच सहितान्देवानृषींश्चैव समागतान् १ अहं लोकहितार्थं वै पिबामि वरुणालयम् । भवद्भिर्यदनुष्ठेयं तच्छीघ्रं संविधीयताम् २ एतावदुक्त्वा वचनं मैत्रावरुणिरच्युतः । समुद्रमपिबत्क्रुद्धः सर्वलोकस्य पश्यतः ३ पीयमानं समुद्रं तं दृष्ट्वा सेन्द्रास्तदामराः । विस्मयं परमं जग्मुः स्तुतिभिश्चाप्यपूजयन् ४ त्वं नस्त्राता विधाता च लोकानां लोकभावन । त्वत्प्रसादात्समुच्छेदं न गच्छेत्सामरं जगत् ५ स पूज्यमानस्त्रिदशैर्महात्मा गन्धर्वतूर्येषु नदत्सु सर्वशः । दिव्यैश्च पुष्पैरवकीर्यमाणो महार्णवं निःसलिलं चकार ६ दृष्ट्वा कृतं निःसलिलं महार्णवं सुराः समस्ताः परमप्रहृष्टाः । प्रगृह्य दिव्यानि वरायुधानि तान्दानवाञ्जघ्नुरदीनसत्वाः ७ ते वध्यमा-

---

युक्त अशा समुद्राला अवलोकन केलें २२ ,२३ व गंधर्व, महोरग, भाग्यमान ऋषि आणि अगस्त्यमुनि ह्यांसहवर्तमान देव त्या महान् समुद्राच्या कांठावर बसले २४. ह्याप्रमाणें० वनपर्वांतील तीर्थयात्रापर्वापैकीं लोमशतीर्थयात्रेसंबधी अगस्त्यमुनीच्या आख्यानाविषयीं एकशें चवथा अध्याय समाप्त झाला ॥ १०४ ॥

लोमश सांगतातः— ते भगवान् मैत्रावरुणि ऋषि समुद्राजवळ आल्यानंतर तेथें आलेले देव व ऋषी यांना ह्मणाले १ " मी लोकांच्या हिताकरितां वरुणाचें गृह जो समुद्र त्याचें प्राशन करितोच; परंतु, तुह्मांला जें कांहीं करावयाचें असेल त्याची मात्र सत्वर तयारी ठेवा "२. असें सांगितल्यावर त्या अगस्त्य ऋषींनीं क्रुद्ध होऊन सर्व लोकांच्या समक्ष समुद्राचें प्राशन केलें ३ व तें पहातांक्षणीं इंद्रादि देवांना मोठें आश्चर्य वाटून त्यांनीं त्या ऋषींचें स्तुतिपूर्वक मोठें पूजन केलें ४ आणि (ते ह्मणाले) " हे लोकपालका, आपणच आमचें व लोकांचें रक्षण करणारे व उत्पत्ति करणारे आहांत. तेव्हां आपल्या प्रसादानेंच देवांसहवर्तमान ह्या जगताचा नाश न होवो " ५. ह्याप्रमाणें देव स्तवन करीत आहेत, चोहोंकडे गंधर्वांचीं वाद्यें वाजत आहेत व दिव्य पुष्पांची वृष्टि होत आहे अशा वेळीं त्या महात्म्या मुनींनें तो महार्णव जलरहित करून टाकिला ६. अशारीतीनें समुद्र शुष्क झालेला पाहिल्यावर सर्व देव परम आनंदित झाले आणि श्रेष्ठ व उज्ज्वल अशीं आयुधें धारण करून मोठ्या जोरानें त्या दानवांना मारूं लागले ७. ह्याप्रमाणें महाबलाढ्य, वेगवान् व मोठमोठ्यानें ओरड-

नास्त्रिदशैर्महात्मभिर्महाबलैर्वेगिभिरुन्नदद्भिः । न सेहिरे वेगवतां महात्मनां वेगं तदा धारयितुं दिवौकसाम् ८ ते वध्यमानास्त्रिदशैर्दानवा भीमनिःस्वनाः । चक्रुः सुतुमुलं युद्धं मुहूर्तमिव भारत ९ ते पूर्वं तपसा दग्धा मुनिभिर्भावितात्मभिः । यतमानाः परं शक्त्या त्रिदशैर्विनिषूदिताः १० ते हेमनिष्काभरणाः कुण्डलाङ्गदधारिणः । निहता बह्वशोभन्त पुष्पिता इव किंशुकाः ११ हतशेषास्ततः केचित्कालेया मनुजोत्तम । विदार्य वसुधां देवीं पातालतलमास्थिताः १२ निहतान्दानवान्दृष्ट्वा त्रिदशा मुनिपुंगवम् । तुष्टुवुर्विविधैर्वाक्यैरिदं वचनमब्रुवन् १३ त्वत्प्रसादान्महाबाहो लोकैः प्राप्तं महत्सुखम् । त्वत्तेजसा च निहताः कालेयाः क्रूरविक्रमाः १४ पूरयस्व महाबाहो समुद्रं लोकभावन । यत्त्वया सलिलं पीतं तदस्मिन्पुनरुत्सृज १५ एवमुक्तः प्रत्युवाच भगवान्मुनिपुंगवः । जीर्णं तद्धि मया तोयमुपायोन्यः प्रचिन्त्यताम् । पूरणार्थं समुद्रस्य भवद्भिर्यत्नमास्थितैः १६ एतच्छ्रुत्वा तु वचनं महर्षेर्भावितात्मनः । विस्मिताश्च विषण्णाश्च बभूवुः सहिताः सुराः १७ पर-

णाऱ्या देवांचे प्रहार सहन न होऊन ते दानव देवांपासून आपलें रक्षण करण्यास असमर्थ झाले ८. अशारीतीनें मारले जाणाऱ्या व भयंकर शब्द करणाऱ्या दानवांनीं एक मुहूर्तपर्यंत मोठ्या आणीबाणीचें युद्ध केलें ९. तेव्हां जितेंद्रिय मुनींनीं तपोबलानें आधींच जाळून टाकिलेले ते दानव मोठ्या शक्तीनें यत्नपूर्वक युद्ध करीत असतांही देवांनीं त्यांना नाहींसें करून टाकिलें १०. ते सुवर्णाच्या कंठ्या, कुंडलें, बाहुभूषणें वगैरे धारण करणारे दानव मरून पडले असतां प्रफुल्लित झालेल्या पलाश वृक्षाप्रमाणें शोभूं लागले ११. हे पुरुषश्रेष्ठा, जे कोणी न मरतां अवशिष्ट राहिले होते त्यांनीं पृथ्वी देवीचें विदारण करून पातालामध्यें गमन केलें १२. ह्याप्रमाणें दानवांचा नाश होतांक्षणीं ते देव नानाप्रकारच्या वाक्यांनीं मुनिश्रेष्ठ अगस्त्यांचें स्तवन करून बोलूं लागले १३. (ते ह्मणाले) " हे महाबाहो, आपल्याच प्रसादानें लोकांना हे महत्सौख्य प्राप्त होऊन आपल्याच तेजानें त्या भयंकर पराक्रमी कालेयांचाही नाश झाला आहे १४. करितां, हे लोकपालका, हे महाबाहो, आपण जें उदक प्राशन केलें आहे तें पुन्हां परत टाकून हा समुद्र (पूर्वीप्रमाणें) पूर्ण करा " १५. हें त्यांचें भाषण श्रवण केल्यावर ते भगवान् मुनिश्रेष्ठ अगस्त्य ऋषि ह्मणाले " हे देवहो, तें उदक तर मीं जिरवून टाकिलें तेव्हां तुह्मीं अत्यंत दक्ष राहून समुद्राच्या पूरणाचा दुसरा कांहीं उपाय योजा " १६. ह्याप्रमाणें त्या विचारी

स्परमनुज्ञाप्य प्रणम्य मुनिपुंगवम् । प्रजाः सर्वा महाराज विप्रजग्मुर्य-
थागतम् १८ त्रिदशा विष्णुना सार्धमुपजग्मुः पितामहम् १९ पूरणार्थं
समुद्रस्य मन्त्रयित्वा पुनः पुनः । ऊचुः प्राञ्जलयः सर्वे सागरस्याभिपूर-
णम् २० [४३४४] इति श्रीमहाभारते० मारण्यके पर्वणि तीर्थयात्रापर्वणि
लोमशतीर्थयात्रायामगस्त्योपाख्याने पञ्चाधिकशततमोऽध्यायः॥ १०५ ॥

लोमश उवाच ॥ तानुवाच समेतांस्तु ब्रह्मा लोकपितामहः । गच्छध्वं
विबुधाः सर्वे यथाकामं यथेप्सितम् १ महता कालयोगेन प्रकृतिं यास्य-
तेर्णवः । ज्ञातींश्च कारणं कृत्वा महाराज्ञो भगीरथात् २ पितामहवचः
श्रुत्वा सर्वे विबुधसत्तमाः । कालयोगं प्रतीक्षन्तो जग्मुश्चापि यथागतम् ३
युधिष्ठिर उवाच ॥ कथं वै ज्ञातयो ब्रह्मन्कारणं चात्र किं मुने । कथं
समुद्रः पूर्णश्च भगीरथप्रतिश्रयात् ४ एतदिच्छाम्यहं श्रोतुं विस्तरेण
तपोधन । कथ्यमानं त्वया विप्र राज्ञां चरितमुत्तमम् ५ वैशम्पायन
उवाच ॥ एवमुक्तस्तु विप्रेन्द्रो धर्मराज्ञा महात्मना । कथयामास माहात्म्यं
सगरस्य माहात्मनः ६ लोमश उवाच ॥ इक्ष्वाकूणां कुले जातः सगरो

महर्षींचें भाषण श्रवण करितांक्षणीं सर्व देव खिन्न होऊन विस्मय करूं लागले १७ व एकमेकांच्या अनुमतानें त्या मुनिश्रेष्ठाला नमस्कार करून, हे महाराज, ते सर्व आल्यामार्गानें परत गेले १८. तदनंतर विष्णूसहवर्तमान देव पितामह ब्रह्मदेवाकडे गेल्यावर समुद्राच्या पूर्ततेविषयीं वारंवार विचार करून व हात जोडून प्रार्थना करूं लागले १९,२०. ह्याप्रमाणें० वनपर्वांतील तीर्थयात्रापर्वांपैकीं लोमशतीर्थयात्रेसंबंधीं अगस्त्यमुनींच्या आख्यानाविषयीं एकशें पांचवा अध्याय समाप्त झाला ॥ १०५ ॥

लोमश सांगतातः— तदनंतर लोकांचे पितामह ब्रह्मदेव तेथें जुळून आलेल्या देवांना ह्मणाले " हे देवहो, तुह्मीं सर्वजण जिकडे वाटेल तिकडे खुशाल जा १. बराचसा काल गेल्यानंतर महाराज भगीरथ पूर्वजांना निमित्त करून हा समुद्र पूर्वस्थितीला आणून ठेवील " २. असें पितामह ब्रह्मदेवाचें वचन श्रवण केलें असतां ते सर्व देवश्रेष्ठ योग्य वेळेची वाट पहात आले तसे निघून गेले ३. युधिष्ठिर ह्मणतातः—हे मुने, हे ब्रह्मन्, भगीरथानें आपल्या पूर्वजांनीं निमित्त करून समुद्र कसा पूर्ण केला ? ४ हें राजांचें उत्तम चरित्र आपल्यापासून आपण सांगितलें असतां, हे तपोधन, तें सविस्तर श्रवण करण्याची माझी इच्छा आहे ५. वैशंपायन सांगतातः—ह्याप्रमाणें विप्रश्रेष्ठ लोमशमहर्षींनीं महात्म्या धर्मराजाचा प्रश्न श्रवण केल्यावर श्रेष्ठ सगराचें महात्म्य सांगण्यास आरंभ केला ६. लोमश सांगतातः—इक्ष्वाकूंच्या कुलामध्यें

नाम पार्थिवः । रूपसत्वबलोपेतः सचापुत्रः प्रतापवान् ७ स हैहयान्स-
मुत्साद्य तालजंघांश्च भारत । वशे च कृत्वा राजन्यान्स्वराज्यमन्वशा-
सत ८ तस्य भार्ये त्वभवतां रूपयौवनदर्पिते । वैदर्भी भरतश्रेष्ठ शैब्या च
भरतर्षभ ९ स पुत्रकामो नृपतिस्तप्यते स्म महत्तपः । पत्नीभ्यां सह
राजेन्द्र कैलासं गिरिमाश्रितः १० स तप्यमानः सुमहत्तपो योगसम-
न्वितः । आससाद महात्मानं त्र्यक्षं त्रिपुरमर्दनम् ११ शंकरं भवमी-
शानं पिनाकिं शूलपाणिनम् । त्र्यम्बकं शिवमुग्रेशं बहुरूपमुमापतिम् १२
स तं दृष्ट्वैव वरदं पत्नीभ्यां सहितो नृपः । प्रणिपत्य महाबाहुः पुत्रार्थे
समयाचत १३ तं प्रीतिमान्हरः प्राह सभार्यं नृपसत्तमम् । यस्मिन्वृतो
मुहूर्तेहं त्वयेह नृपते वरम् १४ षष्टिः पुत्रसहस्राणि शूराः परमदर्पिताः ।
एकस्यां संभविष्यन्ति पत्न्यां नरवरोत्तम १५ ते चैव सर्वे सहिताः क्षयं
यास्यन्ति पार्थिव । एको वंशधरः शूर एकस्यां संभविष्यति १६ एव-
मुक्त्वा तु तं रुद्रस्तत्रैवान्तरधीयत । स चापि सगरो राजा जगाम स्वं

पृथ्वीचें पालन करणारा असा एक सगर नांवाचा राजा झाला. तो महापराक्रमी, रूप, सत्वगुण व बल ह्यांनीं युक्त असून निपुत्रिक होता ७. हे भरतकुलोत्पन्ना, त्यानें हैहय व तालजंघ ह्यांचा नाश केल्यावर व इतर राजांना आपल्या स्वाधीन करून घेतल्यानंतर आपल्या राज्याचें पालन करूं लागला ८. हे भरतवंशजश्रेष्ठा, त्याला एक वैदर्भी व दुसरी शैब्या अशा दोन सुंदर व तरुण स्त्रिया होत्या ९. तो राजा कैलासपर्वताचें अवलंबन करून दोघी स्त्रियांसहवर्तमान पुत्रप्राप्तीकरितां तपश्चर्या करूं लागला १०. ह्याप्रमाणें योगाचा आश्रय करून तो त्रिपुराचा नाश करणाऱ्या महात्म्या त्रिनयन शंकराचें अराधन करूं लागला ११. तो शंकर—भव, ईशान पिनाकपाणी, शूलपाणी, त्रिनयन, शिव, उग्र, ईश, बहुरूप व उमापति—अशा नांवांनीं प्रसिद्ध आहे १२. ह्याप्रमाणें (शंकराचें आराधन झालें असतां) तो वर देण्याकरितां प्राप्त झाला आहे, असें पाहून त्या राजानें दोघी स्त्रियांसहवर्तमान त्यांना नमस्कार केला व " मला पुत्र द्या " असें तो महाबाहु ह्मणाला १३. हें ऐकतांच प्रसन्न झालेले शंकर त्या नृपश्रेष्ठाला ह्मणाले " हे नृपते, ज्यावेळीं तूं मला वर मागितलास त्या वेळेवरून एका पत्नीचे ठिकाणीं मोठे शूर व महान् गर्विष्ठ असे साठ हजार मुलगे होतील १४,१५. (अशी ती वेळ आहे) व ते सर्व, हे पृथ्वीपालका, एकदम नष्ट होतील; परंतु, दुसरीला वंशधारण करणारा व शूर असा एकच मुलगा होईल १६. ह्याप्रमाणें त्याला वर देऊन रुद्र तेथेंच अंतर्धान पावले आणि तो राजाही आपल्या

निवेशनम् १७ पत्नीभ्यां सहितस्तत्र सोतिहृष्टमनास्तदा । तस्य ते मनुजश्रेष्ठ भार्ये कमललोचने १८ वैदर्भी चैव शैब्या च गर्भिण्यौ संबभूवतुः । ततः कालेन वैदर्भी गर्भालाबुं व्यजायत १९ शैब्या च सुषुवे पुत्रं कुमारं देवरूपिणम् । तदालाबुं समुत्स्रष्टुं मनश्चक्रे स पार्थिवः २० अथान्तरिक्षाच्छुश्राव वाचं गम्भीरनिःस्वनाम् । राजन्मा साहसं कार्षीः पुत्रान्न त्यक्तुमर्हसि २१ अलाबुमध्यान्निष्कृष्य बीजं यत्नेन गोप्यतां । सोपस्वेदेषु पात्रेषु घृतपूर्णेषु भागशः २२ ततः पुत्रसहस्राणि षष्टिं प्राप्स्यसि भारत । महादेवेन दिष्टं ते पुत्रजन्म नराधिप । अनेन क्रमयोगेन मा ते बुद्धिरतोन्यथा २३ [४३६७] इति श्रीमहाभारते॰ आरण्यके॰ तीर्थयात्रापर्वणि लोमशतीर्थयात्रायां सगरसंततिकथने षडधिकशततमोध्यायः ॥ १०६ ॥

लोमश उवाच ॥ एतच्छ्रुत्वान्तरिक्षाच्च स राजा राजसत्तमः । यथोक्तं तच्चकाराथ श्रद्दधद्भरतर्षभ १ एकैकशस्ततः कृत्वा बीजं बीजं नराधिपः । घृतपूर्णेषु कुम्भेषु तान्भागान्विदधे ततः २ धात्रीश्चैकैकशः प्रादात्पुत्ररक्षणतत्परः । ततः कालेन महता समुत्तस्थुर्महाबलाः ३ षष्टिः पुत्रसह-

---

घरीं गेला १७. घरीं गेल्यावर, हे पुरुषश्रेष्ठा, कमलपत्राप्रमाणें ज्यांचे नेत्र आहेत अशा त्याच्या दोघी स्त्रिया व तो राजा असे मोठ्या आनंदानें राहू लागले १८. तदनंतर ती वैदर्भी व शैब्या ह्या दोघीही गर्भार झाल्या असतां पुढें कांही कालानें वैदर्भीला एक भोपळा झाला १९ आणि शैब्येला देवाप्रमाणे सुंदर असा एक कुमार झाला. तेव्हां तो भोपळा टाकून द्यावा असें राजाने मनांत आणिले असतां २० त्यानें गंभीर स्वरानें युक्त अशी आकाशवाणी ऐकिली कीं, " हे राजा, साहस करून पुत्राचा नाश करू नकोस २१. अरे हा भोपळा फोडून त्याच्यांतील बीं काढ व तें अर्धें तूप आणि अर्धें उष्णोदक यांनीं भरलेल्या भांड्यामध्यें टाक म्हणजे, हे पुरुषश्रेष्ठा, महादेवानें सांगितल्याप्रमाणे तुला साठ हजार मुलगे होतील. हे भरतकुलोत्पन्ना, याप्रमाणेंच तूं वाग; आतां आपला विचार बदलू नकोस " २२,२३. ह्याप्रमाणें॰ वनपर्वांतील तीर्थयात्रापर्वापैकीं लोमशतीर्थयात्रेसंबंधीं सगरसंततिकथनाविषयीं एकशें सहावा अध्याय समाप्त झाला ॥ १०६ ॥

लोमश म्हणतातः—हे भरतवंशजश्रेष्ठा, ह्याप्रमाणें आकाशवाणी ऐकिली असतां त्या राजश्रेष्ठ सगर राजानें श्रद्धापूर्वक जसें सांगितले तसें केलें १. म्हणजे एक एक बीं निरनिराळें करून घृतानें भरलेल्या कलशाचे ठिकाणीं टाकिले २ आणि त्या पुत्ररक्षणाविषयीं तत्पर असलेल्या राजानें त्यावर एक एक दाईचीही योजना

स्राणि तस्याप्रतिमतेजसः । रुद्रप्रसादाद्राजर्षेः समजायन्त पार्थिव ४
ते घोराः क्रूरकर्माण आकाशपरिसर्पिणः । बहुत्वाच्चावजानन्तः सर्वा-
ल्लोकान्सहामरान् ५ त्रिदशांश्चाप्यबाधन्त तथा गन्धर्वराक्षसान् । सर्वाणि
चैव भूतानि शूराः समरशालिनः ६ बध्यमानास्ततो लोकाः सागरैर्म-
न्दबुद्धिभिः । ब्रह्माणं शरणं जग्मुः सहिताः सर्वदैवतैः ७ तानुवाच महा-
भागः सर्वलोकपितामहः । गच्छध्वं त्रिदशाः सर्वे लोकैः सार्धं यथाग-
तम् ८ नाति दीर्घेण कालेन सागराणां क्षयो महान् । भविष्यति महाघोरः
स्वकृतैः कर्मभिः सुराः ९ एवमुक्तास्तु ते देवा लोकाश्च मनुजेश्वर ।
पितामहमनुज्ञाप्य विप्रजग्मुर्यथागतम् १० ततः काले बहुतिथे व्यतीते
भरतर्षभ । दीक्षितः सगरो राजा हयमेधेन वीर्यवान् ११ तस्याश्वो
व्यचरद्भूमिं पुत्रैः स परिरक्षितः । समुद्रं स समासाद्य निस्तोयं भीमद-
र्शनम् १२ रक्ष्यमाणः प्रयत्नेन तत्रैवान्तरधीयत । ततस्ते सागरास्तात

केली. तदनंतर, हे पृथ्वीपते, बराच काल लोटल्यावर शंकराच्या प्रसादानें त्या तेजस्वी राजाला महाबलाढ्य (असे त्या कलशापासून निघालेले) साठ हजार मलगे झाले ३, ४. ते भयंकर, क्रूर कर्म करणारे, आणि अंतरिक्षांत गमन करणारे होते व पुष्कळ असल्यामुळें देवांसहवर्तमान सर्व लोकांचा ते अवमान करूं लागले ५; इतकेंच नव्हे परंतु, ते शूर व युद्धप्रिय सागरपुत्र देव, गंधर्व, राक्षस व त्याचप्रमाणें सर्व प्राणी ह्यांनाही पीडा करूं लागले ६. ह्याप्रमाणें मंदबुद्धि सागरांनीं त्रास देण्यास आरंभ केला असता सर्व देवांसहवर्तमान लोक ब्रह्मदेवाला शरण गेले ७. तेव्हां, " हे देवहो, सर्व लोकांसहवर्तमान आल्या मार्गानेंच चालते व्हां " असें महाभाग्यवान् व सर्व लोकांचे पितामह ब्रह्मदेव त्यांना ह्मणाले ८. (आणखीही) ते ह्मणाले " हे सुरहो, थोडक्याच दिवसांत त्यांनीं स्वतः केलेल्या कर्मांच्या योगानें त्या दुष्ट सागरांचा क्षय होईल " ९. हें ऐकून, हे नराधिपते, ते देव व लोक ह्यांनीं त्या ब्रह्मदेवाचा निरोप घेतल्यावर आपआपल्या ठिकाणीं चालते झाले १०. तदनंतर बराच काल लोटल्यावर, हे भरतवंशजश्रेष्ठा, त्या महापराक्रमी सगरराजानें अश्वमेध यज्ञ करण्याच्या उद्देशानें दीक्षा धारण करून ११ पृथ्वीवर संचार करण्याकरितां घोडा सोडिला आणि त्याचें रक्षण करण्याविषयीं आपल्या पुत्रांची योजना केली. तेव्हां तो अश्व (फिरत फिरत) उदकरहित व भयंकर अशा समुद्राजवळ येऊन पोंचला १२ व तेथें आल्यावर जरी त्या अश्वाचें त्यांनीं अतिशय यत्नपूर्वक रक्षण केलें होतें तरी तो त्याच

हृतं मत्वा हयोत्तमम् १३ आगम्य पितुराचख्युरदृश्यं तुरगं हृतम्। तेनोक्ता दिक्षु सर्वासु सर्वे मार्गत वाजिनम् १४ ततस्ते पितुराज्ञाय दिक्षु सर्वासु तं हयम्। अमार्गन्त महाराज सर्वं च पृथिवीतलम् १५ ततस्ते सागराः सर्वे समुपेत्य परस्परम्। नाध्यगच्छन्त तुरगमश्वहर्तारमेव च १६ आगम्य पितरं चोचुस्ततः प्राञ्जलयोऽग्रतः। ससमुद्रवनद्वीपा सनदीनदकन्दरा १७ सपर्वतवनोद्देशा निखिलेन मही नृप। अस्माभिर्विचिता राजञ्शासनात्तव पार्थिव १८ न चाश्वमधिगच्छामो नाश्वहर्तारमेव च। श्रुत्वा तु वचनं तेषां स राजा क्रोधमूर्च्छितः १९ उवाच वचनं सर्वांस्तदा दैववशान्नृप। अनागमाय गच्छध्वं भूयो मार्गत वाजिनम् २० यज्ञियं तं विना ह्यश्वं नागन्तव्यं हि पुत्रकाः। प्रतिगृह्य तु संदेशं पितुस्ते सगरात्मजाः २१ भूय एव महीं कृत्स्नां विचेतुमुपचक्रमुः। अथापश्यन्त ते वीराः पृथिवीमवदारिताम् २२ समासाद्य बिलं तच्चाप्यखनन्सगरात्मजाः। कुद्दालैर्ह्रेषुकैश्चैव समुद्रं यत्नमास्थिताः २३ स खन्यमानः महितैः सागरैर्वरुणालयः। अगच्छत्परमामार्तिं दीर्यमाणः

ठिकाणीं नाहींसा झाला. तेव्हां त्याला कोणी तरी चोरून नेलं असावें असेंच त्या सागरांना वाटलें १३ व नंतर ते आपल्या पित्याकडे जाऊन त्याला तो घोडा नेल्याचें वर्तमान सांगू लागले. तेव्हां तो ह्मणाला " तर्ही त्या अश्वाचा चोहोंकडे शोध करा १४. तदनंतर हे महाराज, त्या सागरांनीं बापाच्या आज्ञेनें, सर्व पृथ्वी व दशदिशा ह्यांचे ठिकाणीं त्या अश्वाचा शोध केला १५; परंतु, अश्वाचा अथवा अश्व हरण करणाऱ्याचा शोध लागला नाहीं असें त्यांनीं आपल्या बापाला परत येऊन सांगितलें १६ व पुन्हां हात जोडून पित्याच्या अग्रभागीं ह्मणाले कीं, हे " राजा, हे पृथ्वीपते, आपल्या आज्ञेवरून आह्मीं समुद्र, वनें, बेटें, नद्या, गुहा, पर्वत व त्यांच्या सभोंवतालचे प्रदेश आणि पृथ्वी या सर्व ठिकाणीं शोध केला १७,१८; परंतु अश्वाचा अथवा अश्व नेणाऱ्याचा आह्मांस पत्ता लागला नाहीं. " हें त्यांचें भाषण श्रवण करितांक्षणीं राजाला अत्यंत क्रोध आला व तो ह्मणाला १९ " फिरून एकदां तुह्मीं सर्वजण त्या घोड्याचा शोध करून त्याला येथें घेऊन या २०. हे पुत्रहो, त्या यज्ञसंबंधीं घोड्याला आणिल्याशिवाय माझ्याकडे येऊं नका " असें बापाचें ह्मणणें ऐकून ते सागर २१ पुनरपि संपूर्ण पृथ्वीचा शोध करण्याकरितां निघाले असतां पृथ्वीला एक भेग पडलेली त्या वीरांच्या दृष्टीं पडली २२ व त्या भेगेच्या जवळ आल्यावर ते सगरात्मज कुदळी व पावडीं घेऊन मोठ्या कष्टानें समुद्र खणूं लागले २३. तेव्हां ते सगरपुत्र वरुणगृह समुद्र

समन्ततः २४ असुरोरगरक्षांसि सत्वानि विविधानि च। आर्तनादम-
कुर्वन्त वध्यमानानि सागरैः २५ छिन्नशीर्षा विदेहाश्च भिन्नत्वगस्थि-
संधयः। प्राणिनः समदृश्यन्त शतशोथ सहस्रशः २६ एवं हि खनतां
तेषां समुद्रं वरुणालयम्। व्यतीतः सुमहान्कालो न चाश्वः समदृश्यत २७
ततः पूर्वोत्तरे देशे समुद्रस्य महीपते। विदार्य पातालमथ संक्रुद्धाः सग-
रात्मजाः २८ अपश्यन्त हयं तत्र विचरन्तं महीतले। कपिलं च महा-
त्मानं तेजोराशिमनुत्तमम्। तेजसा दीप्यमानं तु ज्वालाभिरिव पाव-
कम् २९ ते तं दृष्ट्वा हयं राजन्संप्रहृष्टतनूरुहाः। अनादृत्य महात्मानं
कपिलं कालचोदिताः। संक्रुद्धाः संप्रधावन्त अश्वग्रहणकाङ्क्षिणः ३०
ततः क्रुद्धो महाराज कपिलो मुनिसत्तमः। वासुदेवेति यं प्राहुः कपिलं
मुनिपुंगवम् ३१ स चक्षुर्विकृतं कृत्वा तेजस्तेषु समुत्सृजन्। ददाह सुम-
हातेजा मन्दबुद्धीन्स सागरान् ३२ तान्दृष्ट्वा भस्मसाद्भूतान्नारदः सुमहा-
तपाः। सगरान्तिकमागच्छत्तच्च तस्मै न्यवेदयत् ३३ स तच्छ्रुत्वा वचो घोरं

खणूं लागल्यामुळें ता चोहोंकडून ढासळूं लागला व त्याच्या योगानें त्याला फार त्रास झाला २४. तेव्हां सगरपुत्र असुर, सर्प, राक्षस आणि नानाप्रकारचे सजीव प्राणी मारूं लागल्यामुळें ते भयकर अरोळ्या ठोकूं लागले २५. तेव्हां मस्तकं तुटून पडलेले, गतप्राण झालेले, छिन्नभिन्न त्वचा झालेले आणि सांधे उखळलेले असे शेंकडों हजारों प्राणी (त्या ठिकाणीं) दिसूं लागले २६. ह्याप्रमाणें वरुणगृह जो समुद्र त्याला खणीत असतां बराच काल लोटला तरी त्यांना घोडा दिसला नाहीं २७. तदनंतर, हे पृथ्वीपते, त्या सगरपुत्रांनीं अत्यत क्रुद्ध होऊन समुद्राच्या ईशान्येकडील प्रदेश खणल्यावर पातालामध्यें प्रवेश केला २८ आणि तेथें (जातांच) पृथ्वीतलावर संचार करणाऱ्या अश्वाला व अग्नीच्या ज्वालेप्रमाणें देदीप्यमान् अशा तेजोराशी कपिलमहामुनींना त्यांनीं अवलोकन केलें २९ व त्यामुळें त्यांच्या आंगावर आनंदानें रोमांच उभे राहिले आणि त्या घोड्याला धरण्याकरितां कालानें प्रेरणा केलेले ते सागर महात्म्या कपिलांचा अवमान करून मोठ्या आवेशानें त्याच्याकडे धांवले ३०. तदनंतर ज्यांना मुनिश्रेष्ठ, कपिल आणि वासुदेव असें ह्मणतात. त्या कपिलमुनींना, हे महाराज, क्रोध येऊन त्यांनीं आपले डोळे वटारिले आणि त्या सागरांचे ठिकाणीं आपलें तेज प्रकाशित करून त्या मंदबुद्धि सागरांचें भस्म करून टाकिलें ३१.३२. तेव्हां महातपस्वी नारदांनीं ह्याप्रमाणें त्यांचें भस्म झालेलें पाहिल्यावर ते सगराकडे गेले आणि त्याला तें सर्व निवेदन केलें ३३. तें मुनींचें भाषण श्रवण करितांक्षणीं राजा एक मुहूर्तभर खिन्न

राजा मुनि मुखोद्गतम्। मुहूर्तं विमना भूत्वा स्थाणोर्वाक्यमचिन्तयत् ३४
अंशुमन्तं समाहूय असमञ्जसुतं तदा। पौत्रं भरतशार्दूल इदं वचनमब्र-
वीत् ३५ षष्टिस्तानि सहस्राणि पुत्राणाममितौजसाम्। कापिलं तेज
आसाद्य मत्कृते निधनं गताः ३६ तव चापि पिता तात परित्यक्तो मया-
नघ। धर्मं संरक्षमाणेन पौराणां हितमिच्छता ३७ युधिष्ठिर उवाच॥
किमर्थं राजशार्दूलः सगरः पुत्रमात्मजम्। त्यक्तवान्दुस्त्यजं वीरं तन्मे
ब्रूहि तपोधन ३८ लोमश उवाच॥ असमञ्जा इति ख्यातः सगरस्य
सुतो ह्यभूत्। यं शैब्या जनयामास पौराणां स हि दारकान् ३९ गलेषु
क्रोशतो गृह्य नद्यां चिक्षेप दुर्बलान्। ततः पौराः समाजग्मुर्भयशोक-
परिप्लुताः ४० सगरं चाभ्यभाषन्त सर्वे प्राञ्जलयः स्थिताः। त्वं नस्त्राता
महाराज परचक्रादिभिर्भयात् ४१ असमञ्जोभयाद्घोरात्ततो नस्त्रातुम-
र्हसि। पौराणां वचनं श्रुत्वा घोरं नृपतिसत्तमः ४२ मुहूर्तं विमना भूत्वा
सचिवानिदमब्रवीत्। असमञ्जाः पुराद्द्य सुतो मे विप्रवास्यताम्। यदि
वो मत्प्रियं कार्यमेतच्छीघ्रं विधीयताम् ४३ एवमुक्ता नरेन्द्रेण सचि-

---

झाला व लागलीच शंकराच्या वाक्याचे त्याला स्मरण झालें ३४. तेव्हां, हे भरतव-
शजश्रेष्ठा, असमजाचा मुलगा व आपला नातू जो अंशुमान त्याला बोलावून आणून
तो ह्मणाला की ३५, " हे पौत्रा, कपिलमहामुनीच्या तेजानें महातेजस्वी असे साठ
हजार पुत्र माझ्याकरिता दग्ध झाले आणि नागरिक जनाच्या कल्याणाच्या व
धर्मरक्षणाच्या इच्छेनें, बा निष्पापा वत्सा, तुझ्या पित्याचाही मी त्याग केला
आहे " ३६,३७. युधिष्ठिर ह्मणतातः—हे तपोधना, राजश्रेष्ठ सगरानें टाकण्यास
अयोग्य अशा आपल्या पुत्राचा कां त्याग केला हें आपण मला कथन करा ३८.
लोमश सांगतातः—सगराला शैब्येपासून झालेला असमज ह्मणून एक मुलगा होता.
तो नगरवासी जनाच्या अशक्त अशक्त मुलांना तीं ओरडूं लागलीं की, गळ्याला धरून
नदीमध्यें नेऊन टाकीत असे हें पाहून भीतीनें व शोकानें व्याप्त झालेले लोक राजा-
कडे आले ३९,४० आणि हात जोडून त्या सगर राजाला ह्मणाले की, " हे
महाराज, परचक्रासारिख्या भयापासून आमचें रक्षण करणारा तूच आहेस ४१.
ह्यास्तव, असमंजापासून होणाऱ्या घोर भयातून आमची मुक्तता कर " हे नगरवासी
लोकांचे भाषण श्रवण केलें असतां ४२ तो नृपश्रेष्ठ एक मुहूर्तभर खिन्न झाला व
आपल्या अमात्यांना ह्मणाला " हे अमात्यहो, जर तुह्मांला माझें प्रिय करावेंसें
वाटत असेल तर आजच्या आजच या असमंजाला सत्वर गांवांतून घालवून द्या " ४३.

वास्ते नराधिप । यथोक्तं त्वरिताश्चक्रुर्यथाज्ञापितवान्नृपः ४४ एतत्ते सर्वमाख्यातं यथा पुत्रो महात्मना । पौराणां हितकामेन सगरेण विवासितः ४५ अंशुमांस्तु महेष्वासो यदुक्तः सगरेण हि । तत्ते सर्वं प्रवक्ष्यामि कीर्त्यमानं निबोध मे ४६ सगर उवाच ॥ पितुश्च तेहं त्यागेन पुत्राणां निधनेन च । अलाभेन तथाश्वस्य परितप्यामि पुत्रक ४७ तस्माद्दुःखाभिसंतप्तं यज्ञविघ्नाच्च मोहितम् । हयस्यानयनात्पौत्र नरकान्मां समुद्धर ४८ अंशुमानेवमुक्तस्तु सगरेण महात्मना । जगाम दुःखात्तं देशं यत्र वै दारिता मही ४९ स तु तेनैव मार्गेण समुद्रं प्रविवेश ह । अपश्यच्च महात्मानं कपिलं तुरगं च तम् ५० स दृष्ट्वा तेजसो राशिं पुराणमृषिसत्तमम् । प्रणम्य शिरसा भूमौ कार्यमस्मै न्यवेदयत् ५१ ततः प्रीतो महाराज कपिलोंशुमतोभवत् । उवाच चैनं धर्मात्मा वरदोस्मीति भारत ५२ स वव्रे तुरगं तत्र प्रथमं यज्ञकारणात् । द्वितीयं वरकं वव्रे पितॄणां पावनेच्छया ५३ तमुवाच महातेजाः कपिलो

हे धर्मराजा, ह्याप्रमाणें राजश्रेष्ठाचें बोलणें एकतांक्षणीं अमात्यांनीं त्यानें सांगितल्याप्रमाणे सर्व केले ४४. हे युधिष्ठिरा, महात्म्या सगरानें नगरवासी लोकांचें कल्याण व्हावें ह्मणून आपल्या पुत्राला कसें हांकून दिलें हें सर्व मीं तुला कथन केलें ४५. आतां मोठें धनुष्य धारण करणाऱ्या अंशुमानाला सगरानें जें कांहीं सांगितलें तें मी तुला कथन करितों; तें तूं श्रवण कर ४६. सगर ह्मणतोः—हे पौत्रा, तुझ्या बापाला हांकून दिल्यामुळें, पुत्रमरणजन्य दुःखामुळें आणि त्याचप्रमाणें अश्व न सांपडल्यामुळें मला अगदीं चैन पडत नाहीं ४७. तस्मात्, दुःखानें पीडित झालेल्या व यज्ञाला विघ्न झाल्यामुळें मूढ झालेल्या माझें तूं घोडा आणून नरकापासून रक्षण कर ४८. ह्याप्रमाणें महात्म्या सगराचें भाषण श्रवण केल्यावर दुःखानें पीडित झालेला तो अंशुमान जेथें पृथ्वीला भेग पडली होती त्या ठिकाणी गेला ४९ आणि तेथें गेल्यावर त्याच मार्गानें तो समुद्रांत प्रविष्ट झाला असतां त्यानें महात्म्या कपिल मुनींना व त्या अश्वाला त्याच ठिकाणीं अवलोकन केलें ५० त्या तेजस्वी, वयोवृद्ध आणि ऋषिश्रेष्ठ कपिल मुनींना पहातांच त्यानें त्या मुनींना साष्टांग नमस्कार घातला व त्यांना आपलें येण्याचें कारण निवेदन केलें ५१. तेव्हां हे भरतवंशजश्रेष्ठ महाराज युधिष्ठिरा, कपिलमहामुनि त्या अंशुमानावर प्रसन्न होऊन "माझ्यापासून तूं वर मागून घे" असे ह्मणाले ५२. तदनंतर त्यानें यज्ञाकरितां घोडा मिळण्याबद्दल एक व आपल्या पितराच्या शुद्धतेबद्दल दुसरा असे दोन वर मागितले ५३. तेव्हां मुनिश्रेष्ठ व महातेजस्वी कपिल त्याला ह्मणाले "तुझें

मुनिपुंगवः। ददानि तव भद्रं ते यद्यत्प्रार्थयसेनघ ५४ त्वयि क्षमा च धर्मश्च सत्यं चापि प्रतिष्ठितम्। त्वया कृतार्थः सगरः पुत्रवांश्च त्वया पिता ५५ तव चैव प्रभावेण स्वर्गं यास्यन्ति सागराः। पौत्रश्च ते त्रिपथगां त्रिदिवादानयिष्यति। पावनार्थं सागराणां तोषयित्वा महेश्वरम् ५६ हयं नयस्व भद्रं ते यज्ञियं नरपुंगव। यज्ञः समाप्यतां तात सगरस्य महात्मनः ५७ अंशुमानेवमुक्तस्तु कपिलेनमहात्मना ५८ आजगाम हयं गृह्य यज्ञवाटं महात्मनः। सोऽभिवाद्य ततः पादौ सगरस्य महात्मनः ५९ मूर्ध्नि तेनाप्युपाघ्रातस्तस्मै सर्वं न्यवेदयत्। यथादृष्टं श्रुतं चापि सागराणां क्षयं तथा ६० तं चास्मै हयमाचष्ट यज्ञवाटमुपागतम्। तच्छ्रुत्वा सगरो राजा पुत्रजं दुःखमत्यजत् ६१ अंशुमन्तं च सम्पूज्य समापयत तं क्रतुम्। समाप्तयज्ञः सगरो देवैः सर्वैः सभाजितः ६२ पुत्रत्वे कल्पयामास समुद्रं वरुणालयम्। प्रशास्य सुचिरं कालं राज्यं राजीवलोचनः ६३ पौत्रे भारं समावेश्य जगाम त्रिदिवं तदा। अंशुमानपि धर्मात्मा महीं सागरमेखलाम् ६४ प्रशशास महाराज यथैवास्य पितामहः। तस्य पुत्रः सम-

---

देव बरें करो. हे निष्पापा, जें कांहीं तूं मागत आहेस तें मी तुला देतों. तुझें ठिकाणीं क्षमा, धर्म आणि सत्य हीं रहातील; तुझ्यामुळें सगर धन्य होईल आणि तुझ्यामुळेंच तुझा पिता पुत्रवान् होईल ५४, ५५. तुझ्याच सामर्थ्यानें हे सागर स्वर्गास जातील व तुझा नातू (स्वर्ग, मृत्यु व पाताल ह्या) तिन्ही लोकांमध्यें संचार करणाऱ्या गंगेला सागरांच्या शुद्धीकरितां महादेवांना प्रसन्न करून आणील ५६ हे पुरुषश्रेष्ठा, तुझें कल्याण असो, हा आपला घोडा घे आणि महात्म्या सगराचा यज्ञ शेंवटास ने"५७. हें त्या महात्म्या कपिलमुनीचें भाषण श्रवण करून ५८. त्यानें तो घोडा घेतला व अंशुमानानें महात्म्या सगराच्या यज्ञमंडपांत येऊन त्याला अभिवंदन केलें ५९. तदनंतर मस्तकीं अवघ्राण केलेल्या अंशुमानानें सागरांच्या नाशाचें व यज्ञमंडपाचे ठिकाणीं अश्व आणिल्याचें वगैरे वर्तमान त्याला कळविलें आणि तें ऐकतांच त्या सगरराजानें पुत्रमरणजन्य दुःखाचाही त्याग केला ६०, ६१ व अंशुमानाची मोठी वहावा करून तो यज्ञ शेवटास नेला. तेव्हां सर्व देवांनीं त्याचें मोठें अभिनंदन केलें ६२. तदनंतर त्या कमलपत्राक्ष सगर राजानें वरुणालय जो समुद्र त्याला आपला पुत्र समजून ह्या पृथ्वीचें पुष्कळ दिवसपर्यंत राज्य केलें ६३ आणि शेंवटीं आपल्या नातवावर राज्यभार सोपवून आपण स्वर्गाला निघून गेला. नंतर, हे महाराज युधिष्ठिरा, तो धर्मनिष्ठ अंशुमान आपल्या आजाप्रमाणें समुद्रवलयांकित पृथ्वीचें पालन

भवद्दिलीपो नाम धर्मवित् ६५ तस्मै राज्यं समाधाय अंशुमानपि संस्थितः । दिलीपस्तु ततः श्रुत्वा पितॄणां निधनं महत् ६६ पर्यतप्यत दुःखेन तेषां गतिमचिन्तयत् । गङ्गावतरणे यत्नं सुमहच्चाकरोन्नृपः ६७ न चावतारयामास चेष्टमानो यथाबलम् ६८ तस्य पुत्रः समभवच्छ्रीमान्धर्मपरायणः । भगीरथ इति ख्यातः सत्यवागनसूयकः॥ अभिषिच्य तु तं राज्ये दिलीपो वनमाश्रितः ६९ तपःसिद्धिसमायोगात्स राजा भरतर्षभ । वनाज्जगाम त्रिदिवं कालयोगेन भारत ७० [४४३७] इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यामारण्यके पर्वणि तीर्थयात्रापर्वणि लोमशतीर्थयात्रायामगस्त्यमाहात्म्यकथने सप्ताधिकशततमोध्यायः ॥ १०७ ॥

लोमश उवाच ॥ स तु राजा महेष्वासश्चक्रवर्ती महारथः । बभूव सर्वलोकस्य मनोनयननन्दनः १ स शुश्राव महाबाहुः कपिलेन महात्मना । पितॄणां निधनं घोरमप्राप्तिं त्रिदिवस्य च २ स राज्यं सचिवे न्यस्य हृदयेन विदूयता । जगाम हिमवत्पार्श्वं तपस्तप्तुं नरेश्वर ३ आरिराधयिषुर्गङ्गां तपसा दग्धकिल्बिषः । सोपश्यत नरश्रेष्ठ हिमवन्तं नगोत्तमम् ४

करीत असतां त्याला एक धर्मवेत्ता दिलीप या नांवाचा पुत्र झाला ६४, ६५. पुढें अंशुमानही आपल्या मुलाला राज्यावर बसवून परलोकाला गेला. तेव्हां दिलीपानें आपल्या पूर्वजांचें ते मरणवृत्त श्रवण करून फार दुःख झाल्यामुळे त्यांच्या उद्धाराकरितां गंगेला आणण्याविषयी अतिशय श्रम केले ६६, ६७; परंतु, गंगेला पृथ्वीवर आणण्यास तो समर्थ झाला नाहीं ६८ त्याला— सत्य व धर्म यांचे ठिकाणीं रत असून अदोषदृष्टि व सत्य भाषण करणारा— भगीरथ ह्मणून मुलगा झाला. त्या भगीरथाला राज्याभिषेक करून तो दिलीप वनांत गेला ६९. हे भरतवंशजश्रेष्ठा, पुढें तप व सिद्धि ह्यांचें अवलंबन करून कांहीं कालानें तो राजा वनांतून स्वर्गाला गेला ७०. ह्या० वनपर्वांतील तीर्थयात्रापर्वांपैकीं लोमशतीर्थयात्रेसंबंधी अगस्त्यमहात्म्यकथनाविषयीं एकशें सातवा अध्याय समाप्त झाला॥ १०७॥

लोमश सांगतातः—मोठें धनुष्य धारण करणारा व महारथी असा भगीरथराजा सर्व लोकांच्या अंतःकरणाला व नेत्रांना आनंद देणारा होऊन राज्य करूं लागला १. महात्म्या कपिलमुनींने आपल्या पितरांचें (क्रोधाग्नीनें) दहन केल्यामुळें त्यांचा स्वर्गमार्ग कुंठित झाला असें त्या महाबाहूनें श्रवण केल्यावर २ राज्यभार प्रधानावर सोंपवून खिन्न झालेला तो राजा—हे पुरुषश्रेष्ठा, तपश्चर्या करण्याकरितां हिमालय पर्वतावर जाऊन तपाच्या योगानें पाप नाहींसें झाल्यावर गंगेचें आराधन करावें अशा उद्देशानें—निघाला असतां पर्वतश्रेष्ठ हिमालय त्यानें अवलोकन केला ३, ४. तो निरनिराळ्या आकारांच्या

शृङ्गैर्बहुविधाकारैर्धातुमद्भिरलङ्कृतम् । पवनालम्बिभिर्मेघैः परिषिक्तं समन्ततः ५ नदीकुञ्जनितम्बैश्च प्रासादैरुपशोभितम् । गुहाकन्दरसंलीनसिंहव्याघ्रनिषेवितम् ६ शकुनैश्च विचित्राङ्गैः कूजद्भिर्विविधा गिरः । भृङ्गराजैस्तथा हंसैर्दात्यूहैर्जलकुक्कुटैः ७ मयूरैः शतपत्रैश्च जीवञ्जीवककोकिलैः । चकोरैरसितापाङ्गैस्तथा पुत्रप्रियैरपि ८ जलस्थानेषु रम्येषु पद्मिनीभिश्च संकुलम् । सारसानां च मधुरैर्व्याहृतैः समलङ्कृतम् ९ किन्नरैरप्सरोभिश्च निषेवितशिलातलम् । दिग्वारणविषाणाग्रैः समन्ताद्घृष्टपादपम् १० विद्याधरानुचरितं नानारत्नसमाकुलम् । विषोल्बणभुजङ्गैश्च दीप्तजिह्वैर्निषेवितम् ११ क्वचित्कनकसंकाशं क्वचिद्रजतसंनिभम् । क्वचिदञ्जनपुञ्जाभं हिमवन्तमुपागमत् १२ स तु तत्र नरश्रेष्ठस्तपो घोरं समाश्रितः । फलमूलाम्बुसंभक्षः सहस्रपरिवत्सरान् १३ संवत्सरसहस्रे तु गते दिव्ये महानदी । दर्शयामास तं गङ्गा तदा मूर्तिमती स्वयम् १४ गङ्गोवाच ॥

पुष्कळ शृगांनीं व निरनिराळ्या रंगांच्या खनिज पदार्थांनीं सुशोभित असून वायूचें अवलंबन करून भ्रमणाऱ्या मेघांच्या बारिक बारिक तुषारांनीं येथें चोहोंकडून वृष्टि झालेली आहे असा दिसत होता ५ नद्या, वृक्षांचा समुदाय व मोठाल्या राजवाड्यासारिखे दिसणारे कडे ह्यांनीं तो पर्वत युक्त असून गुहा व गिरिकंदर ह्यांमध्ये निजणारे सिंह व व्याघ्र ह्यांनींही तो सेवित होता ६. त्याचप्रमाणें चित्रविचित्र रंगाच्या शरीरानीं युक्त अशा पक्ष्यांच्या व मधुकराच्या नानाप्रकारच्या शब्दांनीं तो नादित असून हंस, पाणकावळे, पाणकोंबडे ७, मयूर, शभर पंखाचे पक्षी, कोकिलपक्षी, ज्यांचे नेत्रप्रांत काळे आहेत असे चकोरपक्षी व आपल्या पुत्रांवर प्रेम करणारे पक्षी ह्यांच्या योगानें तो सचेतन आहे कीं काय असा भासत होता ८ उदक व स्थल ह्यांचे ठिकाणीं असणाऱ्या कमलिनींनीं तो युक्त असून सारसपक्ष्यांच्या मधुर गायनानें तो फारच आनंद देत होता ९. त्याच्या शिलातलाचे ठिकाणीं किन्नर व अप्सरा नेहमीं बसत असत आणि दिग्गज त्यावरील झाडांना आपल्या दांतांनीं सभोंवती घासीत असत १०. तो नानाप्रकारच्या रत्नांनीं युक्त असून महाविषारी व लकलकणाऱ्या जिह्वा असलेल्या सर्पांनीं व त्याचप्रमाणें विद्याधरांनीं सेवित होता ११. तो कोठें कोठें सुवर्णाप्रमाणें, कोठें रुप्याप्रमाणें व कोठें काजळाच्या राशीप्रमाणें दिसत होता १२. तेथें गेल्यावर त्या नरश्रेष्ठ भगीरथानें फळें, मुळें व उदक ह्यांवर उपजीविका करून एक हजार वर्षेपर्यंत घोर तप केलें १३ देवांचीं हजार वर्षे लोटल्यानंतर महानदी गंगा त्याच्या समोर मूर्तिमंत येऊन उभी राहिली आणि ह्मणाली १४ " हे महाराज, माझ्यापासून तुला काय पाहिजे व मी तुला काय

किमिच्छसि महाराज मत्तः किं च ददानि ते। तद्ब्रवीहि नरश्रेष्ठ करिष्यामि वचस्तव १५ एवमुक्तः प्रत्युवाच राजा हैमवतीं तदा। पितामहा मे वरदे कपिलेन महानदि १६ अन्वेषमाणास्तुरगं नीता वैवस्वतक्षयम्। षष्टिस्तानि सहस्राणि सागराणां महात्मनाम् १७ कपिलं देवमासाद्य क्षणेन निधनं गताः। तेषामेवं विनष्टानां स्वर्गे वासो न विद्यते १८ यावत्तानि शरीराणि त्वं जलैर्नाभिषिञ्चसि। तावत्तेषां गतिर्नास्ति सागराणां महानदि १९ स्वर्गं नय महाभागे मत्पितॄन्सगरात्मजान्। तेषामर्थेन याचामि त्वामहं वै महानदि २० लोमश उवाच॥ एतच्छ्रुत्वा वचो राज्ञो गङ्गा लोकनमस्कृता। भगीरथमिदं वाक्यं सुप्रीता समभाषत २१ करिष्यामि महाराज वचस्ते नात्रसंशयः। वेगं तु मम दुर्धार्यं पतन्त्या गगनाद्भुवम् २२ न शक्तास्त्रिषु लोकेषु कश्चिद्धारयितुं नृप। अन्यत्र विबुधश्रेष्ठान्नीलकण्ठान्महेश्वरात् २३ तं तोषय महाबाहो तपसा वरदं हरम्। स तु मां प्रच्युतां देवः शिरसा धारयिष्यति २४ स करिष्यति ते कामं पितॄणां हितकाम्यया। एतच्छ्रुत्वा ततो राजन्महाराजो भगीरथः २५ कैलासं पर्वतं गत्वा तोषयामास शङ्करम्। तपस्तीव्रमुपागम्य

देऊं हें तूं मला कथन कर ह्मणजे मी तसें करीन " १५. हें ऐकून राजा ह्मणाला " हे वरदे, हे महानदि, माझे महात्म्ये साठ हजार पूर्वज—घोड्याचा शोध करीत असतां कपिलमहामुनींची गांठ पडून (त्यांच्या क्रोधामुळें) एका क्षणांत दग्ध होऊन—यमलोकाला गेले आणि ह्मणूनच त्यांना स्वर्गलोक प्राप्त झाला नाहीं १६, १७, १८. हे गंगे, जोंपर्यंत तुझ्या उदकाचा व त्यांच्या शरीराचा संबंध झाला नाहीं तोंपर्यंत त्यांना गति नाहीं १९. ह्यास्तव, हे महाभागे, माझे पितर व सगराचे पुत्र जे सागर त्यांना तूं स्वर्गाला न्यावें; असें मी तुझ्याजवळ मागत आहें " २०. लोमश ह्मणतात:—ह्याप्रमाणें लोकवंद्य गंगेनें राजाचें बोलणें श्रवण केल्यावर प्रसन्न अंतःकरणानें ती त्या भगीरथाला ह्मणाली २१ " हे महाराज, तूं ह्मणतोस त्याप्रमाणें मी निःसंशय करीन; परंतु, आकाशांतून मी खालीं येऊं लागलें असतां देवश्रेष्ठ व नीलकंठ महादेवावांचून ह्या त्रैलोक्याचे ठिकाणीं माझा वेग सहन करण्याला दुसरा कोणीही समर्थ नाहीं २२,२३. ह्यास्तव, हे महाबाहो, प्रथम त्या वरद शंकराला तूं तपश्चर्येनें प्रसन्न करून घे ह्मणजे ते खालीं येणाऱ्या मला आपल्या मस्तकीं धारण करितील २४ व तुझ्या पितरांच्या उद्धाराकरितां ते तुझा हा मनोरथ परिपूर्णही करतील. " ह्याप्रमाणें महाराज भगीरथानें गंगेचें वचन श्रवण करितांक्षणीं २५ तो कैलास पर्वतावर गेला व उग्र तपश्चर्या

कालयोगेन केनचित् २६ अगृह्णाच्च वरं तस्माद्गङ्गाया धारणे नृप। स्वर्गे वासं समुद्दिश्य पितृणां स नरोत्तमः २७ [४४६४] इति श्रीमहाभारते० वैयासिक्यामारण्यके पर्वणि तीर्थयात्रापर्वणि लोमशतीर्थयात्रायामगस्त्योपाख्याने अष्टाधिकशततमोऽध्यायः ॥ १०८ ॥

लोमश उवाच ॥ भगीरथवचः श्रुत्वा प्रियार्थं च दिवौकसाम्। एवमस्त्विति राजानं भगवान्प्रत्यभाषत १ धारयिष्ये महाभाग गगनात्प्रच्युतां शिवाम्। दिव्यां देवनदीं पुण्यां त्वत्कृते नृपसत्तम २ एवमुक्त्वा महाबाहो हिमवन्तमुपागमत्। वृतः पारिषदैर्घोरैर्नानाप्रहरणोद्यतैः ३ तत्र स्थित्वा नरश्रेष्ठं भगीरथमुवाच ह। प्रयाचस्व महाबाहो शैलराजसुतां नदीम् ४ पतमानां सरिच्छ्रेष्ठां धारयिष्ये त्रिविष्टपात्। एतच्छ्रुत्वा वचो राजा शर्वेण समुदाहृतम् ५ प्रयतः प्रणतो भूत्वा गङ्गां समनुचिन्तयत्। ततः पुण्यजला रम्या राज्ञा समनुचिन्तिता। ईशानं च स्थितं दृष्ट्वा गगनात्सहसा च्युता ६ तां प्रच्युतामथो दृष्ट्वा देवाः सार्धं महर्षिभिः। गन्धर्वोरगयक्षाश्च समाजग्मुर्दिदृक्षवः ७ ततः

करूं लागला. तेव्हां कांहीं कालानें त्या नरश्रेष्ठ भगीरथानें शंकराला प्रसन्न करून घेतलें व त्यांच्यापासून आपल्या पितरांना स्वर्गप्राप्ति व्हावी या उद्देशानें मस्तकीं गंगा धारण करण्याविषयींचा वर मागून घेतला २६, २७. ह्याप्रमाणें० वनपर्वांतील तीर्थयात्रापर्वापैकीं लोमशतीर्थयात्रासंबंधीं अगस्त्योपाख्यानाविषयीं एकशें आठवा अध्याय समाप्त झाला ॥ १०८ ॥

लोमश सांगतात:—ह्याप्रमाणें भगीरथाचें तें भाषण श्रवण केलें असतां देवांचें प्रिय करण्याकरितां भगवान् शंकर ह्मणाले १ "ठीक आहे, हे नृपश्रेष्ठा, तुझ्याकरितां त्या आकाशांतून पडणाऱ्या दिव्य व कल्याणकारक गंगेला मी धारण करीन" २. असें बोलून, हे महाबाहो, नानाप्रकारचीं आयुधें धारण करणाऱ्या भयंकर पार्षदगणांनीं परिवेष्टित असे ते शंकर हिमाचलाकडे आले ३ व तेथें आल्यावर पुरुषश्रेष्ठ भगीरथाला ह्मणाले "हे महाबाहो, पर्वतश्रेष्ठ हिमालयाची कन्या जी गंगा तिची तूं प्रार्थना कर ४. ह्मणजे आकाशांतून ती खालीं पडूं लागतांक्षणीं मी त्या श्रेष्ठ नदीचें धारण करीन" असें शंकराचें भाषण श्रवण केल्यावर शुचिर्भूत व नम्र होऊन तो भगीरथ गंगेचें चिंतन करूं लागला ५. तेव्हां रम्य व पुण्यकारक जलानें युक्त अशी गंगा, शंकर तेथें बेऊन बसले आहेत व राजानें आपलें चिंतन केलें असें पाहून, एकाएकीं आकाशांतून उतरूं लागली ६. तदनंतर ती उतरत आहे असें पाहिल्यावर गंधर्व, सर्प, यक्ष व

पपात गगनाद्गङ्गा हिमवतः सुता ८ समुद्धृतमहावर्ता मीनग्राहसमाकुला ।
तां दधार हरो राजन्गङ्गां गगनमेखलाम् ९ ललाटदेशे पतितां मालां
मुक्तामयीमिव । सा बभूव विसर्पन्ती त्रिधा राजन्समुद्रगा १० फेन-
पुञ्जाकुलजला हंसानामिव पङ्क्तयः । क्वचिदाभोगकुटिला प्रस्खलन्ती
क्वचित्क्वचित् ११ सा फेनपटसंवीता मत्तेव प्रमदाव्रजत् । क्वचित्सा
तोयनिनदैर्नदन्ती नादमुत्तमम् १२ एवंप्रकारान्सुबहून्कुर्वती गगना-
च्युता । पृथिवीतलमासाद्य भगीरथमथाब्रवीत् १३ दर्शयस्व महाराज
मार्गं केन व्रजाम्यहम् । त्वदर्थमवतीर्णास्मि पृथिवीं पृथिवीपते १४ एत-
च्छ्रुत्वा वचो राजा प्रातिष्ठित भगीरथः । यत्र तानि शरीराणि साग-
राणां महात्मनाम् । प्लावनार्थं नरश्रेष्ठ पुण्येन सलिलेन च १५ गङ्गाया
धारणं कृत्वा हरो लोकनमस्कृतः । कैलासं पर्वतश्रेष्ठं जगाम त्रिदशैः
सह १६ समासाद्य समुद्रं च गङ्गया सहितो नृपः । पूरयामास वेगेन
समुद्रं वरुणालयम् १७ दुहितृत्वे च नृपतिर्गङ्गां समनुकल्पयत् । पितॄणां

महर्षि ह्यांसहवर्तमान देव तेथें आले ७ आणि हिमाचलाची कन्या गंगा आकाशांतून उत-
रत आहे असें त्यांच्या दृष्टीं पडलें ८. तदनंतर, हे राजा, जिला मोठमोठे भोंवरे पडत
आहेत, जिच्यामध्यें मत्स्य व मगरी आहेत व जी आकाशाचें भूषण आहे अशा
गंगेला शंकरांनीं धारण केलें ९. तेव्हां मस्तकावर पडलेली ती गंगा तीन मार्गांनीं जाऊं
लागली असतां तीन पदरांची मोत्याची कंठीच कीं काय अशी शोभूं लागली १०.
तिच्यावरील फेंसाचे पुंजके जणू काय हंसांच्या पंक्तिच आहेत कीं काय असे भासत
असून ती कोठें कोठें वळणावळणांनीं वहात होती व कोठें कोठें अडखळत होती ११.
ती फेनरूप वस्त्र परिधान करून मत्त झालेल्या स्त्रीप्रमाणें जातांना भासत असून कोठें
कोठें आपल्या उदकाच्या खळाळीनें ती शब्द करीत असल्यासारिखी वाटत होती १२.
अशारीतीनें ती आकाशांतून पृथ्वीवर आली आणि भगीरथाला ह्मणाली कीं १३,
" हे महाराजा, मला रस्ता दाखीव; मी कोणच्या मार्गानें जाऊं ? हे पृथ्वीपते, ह्या
पृथ्वीवर मी तुझ्याकरितांच अवतीर्ण झालें आहे " १४. हें ऐकून, हे पुरुषश्रेष्ठा, तो
भगीरथ जेथें महात्म्या सागरांचीं शरीरें पडलीं होतीं तेथें, पुण्य उदकानें त्यांना स्नान
घालण्याकरितां, तिला घेऊन निघाला १५. इकडे लोकवंद्य शंकर गंगेचें धारण करून
देवांसहवर्तमान कैलास पर्वताकडे निघून गेले १६. तदनंतर गंगेसहवर्तमान भगीरथ
समुद्राजवळ घेऊन त्यानें तो वरुणालय समुद्र भरून टाकिला १७ आणि तेव्हांपा-
सून तो भगीरथ गंगेला आपल्या कन्येप्रमाणें मानूं लागला. तात्पर्य, ह्याप्रमाणें आपल्या

चादकं तत्र ददौ पूर्णमनोरथः १८ एतत्ते सर्वमाख्यातं गङ्गा त्रिपथगा यथा १९ पूरणार्थं समुद्रस्य पृथिवीमवतारिता । समुद्रश्च यथा पीतः कारणार्थं महात्मना २० वातापिश्च यथा नीतः क्षयं स ब्रह्महा प्रभो । अगस्त्येन महाराज यन्मां त्वं परिपृच्छसि २१ [४४८५] इति श्रीमहाभारते० वैयासिक्यामारण्यके पर्वणि तीर्थयात्रापर्वणि लोमशतीर्थयात्रायामगस्त्यमाहात्म्यकथने नवाधिकशततमोऽध्यायः ॥ १०९ ॥

वैशम्पायन उवाच ॥ ततः प्रयातः कौन्तेयः क्रमेण भरतर्षभ । नन्दामपरनन्दां च नद्यौ पापभयापहे १ पर्वतं स समासाद्य हेमकूटमनामयम् । अचिन्त्यानद्भुतान्भावान्ददर्श सुबहून्नृपः २ वाताबद्धा भवन्मेघा उपलाश्च सहस्रशः । नाशक्नुवंस्तमारोढुं विषण्णमनसो जनाः ३ वायुर्नित्यं ववौ तत्र नित्यं देवश्च वर्षति । स्वाध्यायघोषश्च तथा श्रूयते न च दृश्यते ४ सायं प्रातश्च भगवान्दृश्यते हव्यवाहनः । मक्षिकाश्चादशंस्तत्र तपसः प्रतिघातिकाः ५ निर्वेदो जायते तत्र गृहाणि स्मरते च नः । एवं बहुविधान्भावानद्भुतान्वीक्ष्य पाण्डवः । लोमशं पुनरेवाथ पर्यपृच्छत्तदद्भुतम् ६

पूर्वजांना गंगोदक समर्पण करून तो राजा कृतकृत्य झाला १८. अशारीतीनें, हे राजा, गंगा त्रिपथगा कशी झाली, तिनें पृथ्वीवर येऊन समुद्राचें पूरण कसें केलें, महात्म्या अगस्त्यानें समुद्राचें प्राशन कसें केलें आणि ब्रह्महत्या करणाऱ्या वातापीचा नायनाट कसा केला वगैरे तूं जें मला विचारिलेस तें मीं तुला कथन केलें १९, २०, २१. ह्याप्रमाणें० वनपर्वांतील तीर्थयात्रापर्वापैकीं लोमशतीर्थयात्रेसंबधीं अगस्त्यमहात्म्यकथनाविषयीं एकशें नववा अध्याय समाप्त झाला ॥ १०९ ॥

वैशंपायन सांगतातः—हे भरतवंशजश्रेष्ठा जनमेजया, नंतर कुंतीपुत्र धर्मराज पापसंबंधीं भयाचा नाश करणाऱ्या नदा व परमानंदा नांवाच्या नद्याकडे हळू हळू जाऊं लागला असतां १ जेथें कोणत्याही प्रकारची भीति नाहीं अशा हेमकूट पर्वताजवळ आल्यावर तेथें अचिंत्य व आश्चर्यकारक असे पुष्कळ पदार्थ त्यानें अवलोकन केले २. (त्या ठिकाणीं) वाऱ्यावांचूनच गारांचा वर्षाव होत असे व ह्मणूनच मोठ्या कष्टानेंही मनुष्यांना त्याच्यावर चढतां येत नसे ३. तेथें नेहमीं मोठ्या सोसाट्याचा वारा सुटत असे, निरंतर पाऊस पडत असे आणि सदोदित वेदघोषही ऐकूं येत असे; परंतु, वेद ह्मणणारा मात्र दृष्टीं पडत नसे ४. त्याचप्रमाणें तेथें प्रातःकालीं व सायंकालीं भगवान् अग्नि दिसत असून तपश्चर्येला विघ्न करणाऱ्या मक्षिकाही तेथें दंश करीत असत ५; इतकेंच नव्हे परंतु, तेथं गेल्याबरोबर आपण येथें कोठून आलों असें वाटून स्त्रीपुत्रादिकांचें स्मरण होत असे. ह्याप्रमाणें धर्म-

लोमश उवाच ॥ यथा श्रुतमिदं पूर्वमस्माभिररिकर्शन । तदेकाग्रमना राजन्निबोध गदतो मम ७ अस्मिन्नृशभकूटेभूदृषभो नाम तापसः । अनेकशतवर्षायुस्तपस्वी कोपनो भृशम् ८ स वै संभाष्यमाणोन्यैः कोपाद्गिरिमुवाच ह । इह व्याहरेत्कश्चिदुपलानुत्सृजेस्तथा ९ वातं चाहूय मा शब्दमित्युवाच स तापसः । व्याहरंश्चेह पुरुषो मेघशब्देन वार्यते १० एवमेतानि कर्माणि राजंस्तेन महर्षिणा । कृतानि कानिचित्क्रोधात्प्रतिनिषिद्धानि कानिचित् ११ नन्दां त्वभिगता देवाः पुरा राजन्निति श्रुतिः। अन्वपद्यन्त सहसा पुरुषा देवदर्शिनः १२ ते दर्शनं त्वनिच्छन्तो देवाः शक्रपुरोगमाः । दुर्गं चक्रुरिमं देशं गिरिं प्रत्यूहरूपकम् १३ तदाप्रभृति कौन्तेय नरा गिरिमिमं सदा । नाशक्नुवन्नभिद्रष्टुं कुत एवाधिरोहितुम् १४ नातप्ततपसा शक्यो द्रष्टुमेष महागिरिः । आरोढुं वापि कौन्तेय तस्मान्नियतवाग्भव १५ इह देवास्तदा सर्वे यज्ञानाजह्रुरुत्तमान् । तेषामेतानि लिङ्गानि दृश्यन्तेद्यापि भारत १६ कुशाकारेव दूर्वेयं संस्तीर्णेव च भूरि-

---

राजानें अद्भुत चमत्कार अवलोकन केल्यावर पांडुपुत्र धर्मराज त्यासंबंधानें लोमशमहर्षींना विचारूं लागला असतां ६ लोमश ह्मणाले:—हे शत्रुतापना धर्मराजा, मीं पूर्वीं ज्याप्रमाणें हें वृत्त श्रवण केलें आहे त्याप्रमाणें तुला कथन करितो; तें तूं एकाग्र अंतःकरणानें माझ्यापासून ऐकून घे ७. ह्या ऋषभकूटपर्वतावर अत्यंत कोपिष्ट व शेंकडों वर्षांचा असा एक ऋषभ नावाचा तपस्वी तपश्चर्या करीत होता ८. त्या ऋषीला कांहींजण येऊन बोलवूं लागले असतां मोठ्या रागानें त्यानें पर्वताला हाक मारून "हे पर्वता, जो कोणी येथें बोलेल त्याला तूं दगड मार व, हे वायो, तूं शब्द करूं नकोस" असें सांगितलें. आणखीही तो असें ह्मणाला कीं, "जो कोणी येथें बोलूं लागेल त्याचें मेघाच्या गर्जनेमुळें निवारण होईल ९,१०. ह्याप्रमाणें, हे राजा, त्या महर्षीनें, क्रोधामुळें अशाप्रकारचे अद्भुत व निषिद्ध प्रकार केले ११. असो. हे राजा, पूर्वीं ह्या नंदानामक नदीवर देव आलेले पाहून पुरुषही त्यांच्या मागोमाग दर्शनाकरितां गेले असें आमच्या ऐकण्यांत आहे १२. तेव्हां त्यांना आपलें दर्शन न व्हावें ह्मणून इंद्रादि देवांनीं हा पर्वत त्यांना विघ्न केलें १३ आणि तेव्हांपासून, हे कुंतीपुत्रा धर्मराजा, लोकांना नेहमीं ह्या पर्वताकडे पहावत नाहीं मग चढण्याची गोष्ट कशाला पाहिजे १४. हे धर्मराजा, तपश्चर्या न केलेल्या मनुष्याला याजकडे पहावत नाहीं; इतकेंच नाही तर, त्यावर चढवतही नाहीं. ह्यास्तव, तूं आतां मौन धारण कर १५. हे भरतकुलोत्पन्ना धर्मराजा, ह्या ठिकाणीं देवांनीं मोठमोठे यज्ञ केले असल्यामुळें अद्याप त्यांच्या येथें खुणा दिसत आहेत १६. ही पहा दूर्वा-

यम् । यूपप्रकारा बहवो वृक्षाश्चेमे विशाम्पते १७ देवाश्च ऋषयश्चैव वसन्त्यद्यापि भारत । तेषां सायं तथा प्रातर्दृश्यते हव्यवाहनः १८ इहाप्लुतानां कौन्तेय सद्यः पाप्माभिहन्यते । कुरुश्रेष्ठाभिषेकं वै तस्मात्कुरु महानुजः १९ ततो नन्दाप्लुतां गस्त्वं कौशिकीमभियास्यसि । विश्वामित्रेण यत्रोग्रं तपस्तप्तमनुत्तमम् २० वैशम्पायन उवाच ॥ ततस्तत्र समाप्लुत्य गात्राणि सगणो नृपः । जगाम कौशिकीं पुण्यां रम्यां शीतजलां शुभाम् २१ लोमश उवाच ॥ एषा देवनदी पुण्या कौशिकी भरतर्षभ । विश्वामित्राश्रमो रम्य एष चात्र प्रकाशते ॥ आश्रमश्चैव पुण्याख्यः काश्यपस्य महात्मनः २२ ऋश्यशृङ्गः सुतो यस्य तपस्वी संयतेन्द्रियः । तपसो यः प्रभावेण वर्षयामास वासवम् । २३ अनावृष्ट्यां भयाद्यस्य ववर्ष बलवृत्रहा २४ मृग्यां जातः स तेजस्वी काश्यपस्य सुतः प्रभुः । विषये लोमपादस्य यश्चकाराद्भुतं महत् २५ निर्वर्तितेषु सस्येषु यस्मै शान्तां

दर्भाच्या आकाराची दिसत असून ही पृथ्वीहि दर्भमयच झाली आहे. त्याचप्रमाणें, हे प्रजाधिपते, यज्ञस्तंभांच्या आकाराचे हे हजारों वृक्षही येथें दिसत आहेत १७. हे भरतकुलोत्पन्ना, अद्यापि देव व ऋषि येथें रहात असून सायंकालीं व प्रभातकालीं हे त्यांचेच अग्नि दिसत असतात १८. हे कुंतीपुत्रा, येथें स्नान करणाऱ्यांचें पातक एका क्षणांत नाहींसें होतें ह्मणून तूं आपल्या कनिष्ठ भ्रात्यांसहवर्तमान येथें स्नान कर १९ व स्नान झाल्यानंतर ज्या ठिकाणीं विश्वामित्रानें उग्र तपश्चर्या केली त्या कौशिकी नदीला आपण जाऊं २०. वैशंपायन सांगतात:—हे जनमेजया, (ह्याप्रमाणें श्रवण केल्या) नंतर परिवारासहवर्तमान धर्मराजानें तेथें स्नान केल्यावर पुण्यकारक, शुभ, रम्य व थंड उदक असलेल्या कौशिकी नदीला तो आला २१. लोमश ह्मणतात:—हे भरतवंशजश्रेष्ठा, ही पुण्यकारक व देवांनीं सेवित अशी कौशिकी नदी, हिच्या कांठीं असलेला हा दैदीप्यमान् व रम्य असा विश्वामित्रांचा आश्रम व त्याचप्रमाणें महात्म्या कश्यपांचा (विभांडकाचा) पुण्यनामक आश्रम तूं अवलोकन कर २२. त्या कश्यप मुनींना इंद्रियांचें दमन करणारा, उज्ज्वल कांतीनें युक्त व तपस्वी असा एक हरिणीचे ठिकाणीं ऋश्यशृंगनांवाचा[१] पुत्र झाला. त्यानें अवर्षण पडलें असतां आपल्या तपःसामर्थ्यानें इंद्राला पर्जन्यवृष्टि करावयास भाग पाडून लोमपादराजाच्या देशांत पडलेलें भयंकर दुर्भिक्ष नाहींसें करून टाकिलें २३, २४, २५. ह्याप्रमाणें दुष्काळ जाऊन धान्यसमृद्धि झाली

---

१ ऋश्यशृंग ह्या पदांत श तालव्यादि असावयाचा; परंतु, त्या ठिकाणीं मूर्धन्य ष लिहून तें शुद्ध आहे असें मानण्याचा बऱ्याच अर्वाचीन विद्वानांचा समज झालेला दिसतो; परंतु, तें प्रमादिक आहे.

ददौ नृपः । लोमपादो दुहितरं सावित्रीं सविता यथा २६ युधिष्ठिर उवाच ॥ ऋश्यश्रृङ्गः कथं मृग्यामुत्पन्नः काश्यपात्मजः । विरुद्धे योनिसंसर्गे कथं च तपसा युतः २७ किमर्थं च भयाच्छक्रस्तस्य बालस्य धीमतः । अनावृष्ट्यां प्रवृत्तायां ववर्ष बलवृत्रहा २८ कथंरूपा च सा शान्ता राजपुत्री यतव्रता । लोभयामास या चेतो मृगभूतस्य तस्य वै २९ लोमपादश्च राजर्षिर्यदाश्रूयत धार्मिकः । कथं वै विषये तस्य नावर्षत्पाकशासनः ३० एतन्मे भगवन्सर्वं विस्तरेण यथातथम् । वक्तुमर्हसि शुश्रूषोर्ऋश्यश्रृङ्गस्य चेष्टितम् ३१ लोमश उवाच ॥ विभाण्डकस्य विप्रर्षेस्तपसा भावितात्मनः । अमोघवीर्यस्य सतः प्रजापतिसमद्युतेः ३२ श्रृणु पुत्रो यथा जात ऋश्यश्रृङ्गः प्रतापवान् । महाहृदस्य महातेजा बालः स्थविरसंमतः ३३ महाह्रदं समासाद्य काश्यपस्तपसि स्थितः । दीर्घकालं परिश्रान्त ऋषिः स देवसम्मितः ३४ तस्य रेतः प्रचस्कंद दृष्ट्वाप्सरसमुर्वशीम् । अप्सूपस्पृशतो राजन्मृगी तच्चापिबत्तदा । सह तोयेन तृषिता गर्भिणी चाभवत्ततः ३५ सा पुरोक्ता भगवता ब्रह्मणा लोककर्तृणा । देवकन्या मृगी भूत्वा मुनिं सूय विमोक्ष्यसे ३६ अमोघत्वाद्विधेश्चैव

असतां ज्याप्रमाणें सूर्यानें सावित्री दिली त्याप्रमाणें लोमपाद राजानें आपली शांता नांवाची कन्या त्यांना समर्पण केली २६. युधिष्ठिर ह्मणतोः—हे मुनिश्रेष्ठ, कश्यपात्मज ऋश्यश्रृंग मृगीचे ठिकाणीं कसा उत्पन्न झाला ? तो मृगयोनिसंभव असतां तपस्वी कसा झाला ? २७ अनावृष्टि झाली असतां त्या बुद्धिमान् बालकाच्या भीतीनें इंद्रानें पर्जन्यवृष्टि कशी केली? २८. सुंदर अशा शांता राजकन्येनें त्या मृगरूप ऋषीचें अंतःकरण कसें मोहित केलें ? लोमपादराजाच्या राज्यांत पर्जन्य कां पडला नाहीं ? व हें पाहून त्या लोमपादराजानें काय केलें? २९,३० हें सर्व ऋश्यश्रृंगाचें चरित्र श्रवण करणाऱ्या मला आपण कथन करा ३१. लोमश सांगतातः—हे युधिष्ठिरा, अमोघपराक्रमी, ब्रह्मदेवासमान तेजस्वी व तपश्चर्येच्या योगानें आत्मस्वरूप जाणून घेणाऱ्या अशा द्विजश्रेष्ठ महात्म्या विभांडकाला वृद्धांनीं मान देण्यास योग्य, महातेजस्वी व पराक्रमी असा ऋष्यश्रृंग कसा झाला हें तूं श्रवण कर ३२,३३. (पूर्वी) तो देवतुल्य कश्यप महाह्रदाला येऊन पुष्कळ दिवसपर्यंत घोर तप करीत असतां स्नान करतेवेळीं उर्वशीला पाहून त्याचें रेतस्खलन झालें व तें रेत उदकाबरोबर एका मृगीनें प्राशन केलें व त्यामुळें ती गर्भिणी झाली ३४,३५. ती देवकन्या असून शापानें मृगी झाली होती; परंतु, " तुला ऋश्यश्रृंग मुलगा झाला ह्मणजे तूं पुनरपि शापमुक्त होशील "

भावित्वाद्दैवनिर्मितात् ३७ तस्यां मृग्यां समभवत्तस्य पुत्रो महानृषिः। ऋश्यशृङ्गस्तपोनित्यो वन एवाभ्यवर्तत ३८ तस्यर्षेः शृङ्गं शिरसि राजन्नासीन्महात्मनः। तेनर्श्यशृङ्ग इत्येवं तदा स प्रथितोऽभवत् ३९ न तेन दृष्टपूर्वोन्यः पितुरन्यत्र मानुषः। तस्मात्तस्य मनो नित्यं ब्रह्मचर्येऽभवन्नृप ४० एतस्मिन्नेव काले तु सखा दशरथस्य वै। लोमपाद इति ख्यातो ह्यंगानामीश्वरोऽभवत् ४१ तेन कामात्कृतं मिथ्या ब्राह्मणस्येति नः श्रुतिः। स ब्राह्मणैः परित्यक्तस्ततो वै जगतः पतिः ४२ पुरोहितापचाराच्च तस्य राज्ञो यदृच्छया। न ववर्ष सहस्राक्षस्ततोऽपीड्यन्त वै प्रजाः ४३ स ब्राह्मणान्पर्यपृच्छत्तपोयुक्तान्मनीषिणः। प्रवर्षणे सुरेन्द्रस्य समर्थान्पृथिवीपते ४४ कथं प्रवर्षेत्पर्जन्य उपायः परिदृश्यताम्। तमूचुश्चोदितास्ते तु स्वमतानि मनीषिणः ४५ तत्र त्वेको मुनिवरस्तं राजानमुवाच ह। कुपितास्तव राजेन्द्र ब्राह्मणा निष्कृतिं चर ४६ ऋश्यशृङ्गं मुनिसुतमानयस्व च पार्थिव। वानेयमनभिज्ञं च नारीणामार्जवे रतम् ४७ स चेदवतरेद्रा-

---

असें जगदुत्पादक ब्रह्मदेवानें पूर्वी तिला सांगितलें होतें ३६ नंतर ब्रह्मदेवाचें वाक्य व दैवानें ठरवून ठेविलेल्या गोष्टी निष्फल होणाऱ्या नसल्यामुळें त्या हरिणीचे ठिकाणीं तो महाऋषि ऋश्यशृंग जन्मास येऊन नित्य तपश्चर्या करीत त्या वनांतच वास्तव्य करीत होता ३७, ३८. हे राजा, त्या महात्म्या ऋषीच्या मस्तकीं एक शृंग होतें ह्मणून ऋश्यशृंग ह्या नांवानें तो प्रसिद्ध झाला ३९. तो निरंतर ब्रह्मचर्याचेंच अवलंबन करून असे. कारण, पित्यावाचून दुसरा कोणीही मनुष्य त्याच्या दृष्टीं पडत नसे ४०. त्यावेळीं दशरथाचा मित्र आणि लोमपादनांवानें विख्यात असलेला राजा अंगदेशाचा अधिपति होता ४१ असें सांगतात की, त्यानें कोणा एका ब्राह्मणाला प्रथमतः मी काहीं तुला देईन असें सांगून नंतर तुझें कांहीं लागत नाहीं व पुरोहितानें अपराध केला नसतां तू अपराधी आहेस असें त्या दोघांबरोबर मिथ्या भाषण केल्यामुळें ब्राह्मणांनीं त्याचा परित्याग केला व ह्मणूनच पर्जन्य न पडून प्रजेला पीडा सोसावी लागली ४२, ४३. हे पृथ्वीपते, तदनंतर " माझ्या राज्यांत पर्जन्य पडण्याला कांहीं उपाय आहे काय ? " असें विचारी, तपोयुक्त व समर्थ अशा ब्राह्मणांना त्यानें विचारिलें असतां ते त्याला आपआपले विचार कळवूं लागले ४४, ४५ व त्यांपैकीं एक जण " हे राजेंद्रा, ब्राह्मणांचा तुझ्यावर रोष झाला आहे. करितां तूं प्रायश्चित्त घे ४६ आणि स्त्रियाविषयीं केवळ अज्ञान अशा मुनिपुत्र ऋश्यशृंगाला स्त्रियांना पाठवून आणीव ४७ ह्मणजे त्या महातपस्व्यानें तुझ्या राज्यांत पाऊल टाकतांक्षणी पर्जन्यवृष्टि

जन्विषयं ते महातपाः । मयः प्रवर्षेत्पर्जन्य इति मे नात्र संशयः ४८
एतच्छ्रुत्वा वचो राजन्कृत्वा निष्कृतिमात्मनः । स गत्वा पुनरागच्छत्प्रस-
न्नेषु द्विजातिषु ४९ राजानमागतं श्रुत्वा प्रतिसंजहृषुः प्रजाः । ततोऽङ्गप-
तिराहूय सचिवान्मन्त्रकोविदान् ५० ऋश्यशृङ्गागमे यत्नमकरोमन्त्रनि-
श्चये । सोऽध्यगच्छदुपायं तु तैरमात्यैः सहाच्युतः ५१ शास्त्रज्ञैरलमर्थज्ञै-
र्नीत्यां च परिनिष्ठितैः । ततश्चानाययामास वारमुख्या महीपतिः ५२
वेश्याः सर्वत्र निष्णातास्ता उवाच स पार्थिवः । ऋश्यशृङ्गमृषेः पुत्रमान-
यध्वमुपायतः ५३ लोभयित्वाभिविश्वास्य विषयं मम शोभनाः । ता राज
भयभीताश्च शापभीताश्च योषितः ५४ अशक्यमूचुस्तत्कार्यं विवर्णा गत-
चेतसः । तत्र त्वेका जरद्योषा राजानमिदमब्रवीत् ५५ प्रयतिष्ये महाराज
तमानेतुं तपोधनम् । अभिप्रेतांस्तु मे कामांस्त्वमनुज्ञातुमर्हसि ५६ ततः
शक्ष्याम्यानयितुमृश्यशृङ्गमृषेः सुतम् । तस्याः सर्वमभिप्रेतमन्वजानात्स
पार्थिवः ५७ धनं च प्रददौ भूरि रत्नानि विविधानि च। ततो रूपेण संपन्ना
वयसा च महीपते । स्त्रिय आदाय काश्चित्सा जगाम वनमं-

होईल अशी माझी पक्की खात्री आहे " असें त्याला ह्मणाला ४८. तें ऐकतांक्षणीं राजाने स्वत: प्रायश्चित्त घेतलें ब्राह्मण प्रसन्न झालेले पाहून तो पुनरपि आपल्या राजधानीमध्ये आला असतां ४९ प्रजाजनाला मोठा आनंद झाला. नंतर तो अंगदेशाधिपति मसलत करण्याविषयीं चतुर अशा आपल्या सचिवांना बोलावून ऋश्यशृंगाला आणण्याविषयीं यत्नपूर्वक मसलत करू लागला. तेव्हां शास्त्रवेत्ते, नीतिमान् व समयसूचक अशा अमात्यांनीं त्याला एक उपाय सुचविला असतां त्या अच्युत अशा भूपतीनें मुख्य मुख्य वेश्या आणवून ५०,५१,५२ " हरप्रयत्नानें ऋषिपुत्र ऋश्यशृंगाला तुह्मी घेऊन या" असें सर्व कृत्यांत परम निष्णात अशा त्या वेश्यांना सांगितलें ५३. (आणखी) तो ह्मणाला " अहो सुंदरीनो,लोभ दाखवून अथवा विश्वास उत्पन्न करून त्याला माझ्या राज्यांत आणा " हे ऐकतांक्षणीं " न गेलों तर राजा दंड करील व गेलों तर मुनि शाप देईल " ह्या भीतीनें गांगरून गेलेल्या त्या वेश्या " हें करणें अशक्य आहे " असें ह्मणून अत्यंत खिन्न व म्लानवदन झाल्या ५४. तेव्हां त्यांपैकी एक वृद्ध वेश्या ह्मणाली " हे राजा, मला लागणारी सामग्री जर आपण पुरवाल तर, हे महाराज, मी त्या तपोधन ऋषिपुत्र ऋश्यशृंगाला आणण्याविषयीं शक्य तो प्रयत्न करीन." हे त्या वेश्येचें भाषण श्रवण केलें असतां तिला लागणाऱ्या वस्तू देण्याचें मनांत आणून ५५,५६,५७ राजानें तिला पुष्कळ द्रव्य व नानाप्रकारचीं रत्नें दिलीं. तेव्हां, हे राजा, तिनें लावण्य

जसा ५८ [४५४३] इति श्रीमहाभारते ०मारण्यके पर्वणि तीर्थयात्रापर्वणि लोमशतीर्थयात्रायामृश्यशृङ्गोपाख्याने दशाधिकशततमोऽध्यायः ॥११०॥

लोमश उवाच । सा तु नाव्याश्रमं चक्रे राजकार्यार्थसिद्धये । संदेशाच्चैव नृपतेः स्वबुद्ध्या चैव भारत १ नानापुष्पफलैर्वृक्षैः कृत्रिमैरुपशोभितैः । नानागुल्मलतोपेतैः स्वादुकामफलप्रदैः २ अतीव रमणीयं तदतीव च मनोहरम् । चक्रे नाव्याश्रमं रम्यमद्भुतोपमदर्शनम् ३ ततो निबध्य तां नावमदूरे काश्यपाश्रमात् । चारयामास पुरुषैर्विहारं तस्य वै मुनेः ४ ततो दुहितरं वेश्यां समाधायेतिकार्यताम् । दृष्ट्वान्तरं काश्यपस्य प्राहिणोद्बुद्धिसंमताम् ५ सा तत्र गत्वा कुशला तपोनित्यस्य संनिधौ । आश्रमं तं समासाद्य ददर्श तमृषेः सुतम् ६ वेश्योवाच ॥ कच्चिन्मुने कुशलं तापसानां कच्चिच्च वो मूलफलं प्रभूतम् । कच्चिद्भवानमते चाश्रमेऽस्मिंस्त्वां वै द्रष्टुं सांप्रतमागतोऽस्मि ७ कच्चित्तपो वर्धते तापसानां पिता च ते कच्चिदहीनतेजाः । कच्चित्त्वया प्रीयते चैव विप्र कच्चित्स्वाध्यायः क्रियते चर्श्यशृङ्ग ८ ऋश्यशृङ्ग उवाच ॥ ऋद्ध्या भवाञ्ज्योतिरिव प्रकाशते मन्ये

व तारुण्य ह्यांनीं सपन्न अशा कांहीं स्त्रिया बरोबर घेऊन, वनामध्यें गमन केलें ५८.

ह्याप्रमाणे ०वनपर्वांतील तीर्थयात्रापर्वांपैकीं लोमशतीर्थयात्रेसंबंधी ऋश्यशृंगाच्या उपाख्यानाविषयीं एकशे दहावा अध्याय समाप्त झाला ॥११०॥

लोमश ह्मणतातः—हे भरतकुलोत्पन्ना धर्मराजा, तदनंतर राजाचें काम शेवटास नेण्याकरितां तिनें त्याच्या आज्ञेवरून आपल्या बुद्धीच्या योगानें नौकारूप आश्रम तयार केला १. तो आश्रम नानाप्रकारचीं फळें व पुष्पें यणाऱ्या आणि मधुर व अभिलषित फल देणाऱ्या कृतीच्या वृक्षांनीं व तऱ्हेतऱ्हेच्या वेलींनी युक्त असून अत्यंत सुंदर, मनोवेधक व आश्चर्यकारक असा तयार केला होता २,३ तेथें गल्यानंतर कश्यपाच्या आश्रमाजवळच आपली नांव नांगरून आपल्या दूतांना त्या मुनींच्या आश्रमांत सचार करण्याविषयीं तिनें प्रेरणा केली ४ आणि त्याचप्रमाणें आपल्या मुलीलाही काय काय करावयाचें तें सांगितल्यावर तिनें कश्यपमुनि बाहेर गेले आहेत असें पाहून त्या आश्रमांत पाठविलें ५. त्या आश्रमांत गल्यावर तिनें तपश्चर्येचे ठिकाणी रत असलेल्या त्या ऋषिपुत्राला अवलोकन केलें आणि ह्मणाली ६ " हे मुने, तापसांचें कुशल आहे ना ? आपणांला कंदमूलफलांची समृद्धि आहे नां ? आणि ह्याच आश्रमाचे ठिकाणीं आपण वास्तव्य करितां नां ? खरोखर मी तुह्मांला पहाण्याकरितां येथें आलें आहे ७. त्याचप्रमाणें तपस्व्यांच्या तपाची वृद्धि आहे नां ? आपल्या पित्याच्या तेजाची हानि नाहीं नां ? व, हे मुने, आपण त्यांना

चाहं त्वामभिवादनीयम् । पाद्यं वै ते संप्रदास्यामि कामाद्यथाधर्मं फलमूलानि चैव ९ कौश्यां बृस्यामास्व यथोपजोषं कृष्णाजिनेनावृतायां सुखायाम् । क चाश्रमस्तव किं नाम चेदं व्रतं ब्रह्मंश्चरसि हि देववत्त्वं १० वेश्यांवाच ॥ ममाश्रमः काश्यपपुत्र रम्यस्त्रियोजनं शैलमिमं परेण । तत्र स्वधर्मो नाभिवादनं मे न चोदकं पाद्यमुपस्पृशामि ११ भवता नाभिवाद्योहमभिवाद्यो भवान्मया । व्रतमेतादृशं ब्रह्मन्परिष्वज्यो भवान्मया १२ ऋश्यशृङ्ग उवाच ॥ फलानि पक्कानि ददानि ते हं भल्लातकान्यामलकानि चैव । करूषकानींगुदधन्वनानि पिप्पलानां कामकारं कुरुष्व १३ लोमश उवाच ॥ सा तानि सर्वाणि विवर्जयित्वा भक्ष्याण्यनर्हाणि ददौ ततोस्य । तान्यृश्यशृङ्गस्य महारमानि भृशं सुरूपाणि रुचिं ददुर्हि १४ ददौ च माल्यानि सुगन्धवन्ति चित्राणि वासांसि च भानुमन्ति । पयानि चाग्र्याणि ततो मुमोद चिक्रीड चैव प्रजहास चैव १५ सा कन्दुकेनारमतास्य

प्रसन्न करून घेऊन वेदपठण करीत आहांत नां ? ८. ऋश्यशृंग ह्मणतात:—हे भगवन्, आपण अग्नीसारिखे तेजस्वी असून वंदन करण्याला योग्य आहांत असे मला वाटतें करिता, यथाविधिपाद्य समर्पण करून हीं कंद, मळें व फळें मी तुह्मांला अंतःकरणपूर्वक देतों ९. हे मुने, जिच्यावर कृष्णाजिन घातलें आहे अशा ह्या सुखदायक दर्भाच्या चटईवर आपण खुशाल बसा. हे ब्रह्मन्, आपला आश्रम कोठें आहे ? देवाप्रमाणें असलेल्या आपलें आगमन कोणीकडे झालें व हीं आपण कोणची दिक्षा धारण केली आहे ?" १०. हे एकून वेश्या ह्मणाली " हे कश्यपपुत्रा, ह्या डोंगराच्या पलीकडे तीन योजनावर माझा आश्रम असून माझा धर्म ह्मणजे लोकांकडून नमस्कार अथवा पाय धुऊन न घेणे हा होय ११. ह्यास्तव, आपण मला नमस्कार न करितां मीच आपल्याला नमस्कार करून आलिंगन द्यावें हेंच माझें व्रत आहे " १२ ऋश्यशृंग ह्मणतो:— हे ब्रह्मन्, मी आपल्याला परिपक्क झालेलीं बिब्याचीं, आवळीचीं, वालुकामय प्रदेशांत उत्पन्न झालेल्या हिंगणबेटांचीं, पिंपळाचीं व करूषकाचीं फळें देतों; त्याचा आपण प्रेमानें स्वीकार करा १३. लोमश सांगतातः— तदनंतर तिनें ती सर्व फळें बाजूला सारून त्या ऋष्यशृंगाला रसभरित व दिसण्यांत अत्यंत सुंदर अशीं फळें व भक्ष्य पदार्थ दिले व ते त्याला मोठे रुचकर लागले १४; इतकेच नव्हे तर, तिनें त्याला सुगंधि पुष्पांच्या माळा, लकलकणारीं व निरनिराळ्या रंगाचीं वस्त्र आणि अतिशय स्वादिष्ट असे पिण्याचे पदार्थही दिले. ते स्वीकारिल्यावर तो मुनि परम आनंदित होऊन खेळूं व हंसूं लागला १५. नंतर ज्याप्रमाणें फलभारानें वांकलेली लता मोडण्याची भीति असते त्याप्रमाणें कोटे-

मूले विभज्यमाना फलिता लतेव । गात्रैश्च गात्राणि निषेवमाणा समा-
श्लिषच्चासकृदृश्यशृङ्गम् १६ सर्जानशोकांस्तिलकांश्च वृक्षान्सुपुष्पितान-
वनाम्यावभज्य । विलज्जमानेव मदाभिभूता प्रलोभयामास सुतं महर्षेः १७
अथर्श्यशृङ्गं विकृतं समीक्ष्यः पुनःपुनः पीड्य च कायमस्य । अवेक्षमाणा
शनकैर्जगाम कृत्वाग्निहोत्रस्य तदापदेशम् १८ तस्यां गतायां मदनेन
मत्तो विचेतनश्चाभवदृश्यशृङ्गः । तामेव भावेन गतेन शून्ये विनिःश्वसन्ना-
र्तरूपो बभूव १९ ततो मुहूर्ताद्धरिपिङ्गलाक्षः प्रवेष्टितो रोमभिरानखा-
ग्रात् । स्वाध्यायवान्वृत्तसमाधियुक्तो विभाण्डकः काश्यपः प्रादुरासीत् २०
सोपश्यदासीनमुपेत्य पुत्रं ध्यायन्तमेकं विपरीतचित्तम् । विनिःश्वसन्तं
मुहुरूर्ध्वदृष्टिं विभाण्डकः पुत्रमुवाच दीनम् २१ न कल्प्यन्ते समिधः
किन्नु तात कच्चिद्धुतं चाग्निहोत्रं त्वयाद्य । सुनिर्णिक्तं स्रुक्स्रुवं होमधेनुः
कच्चित्सवत्साद्य कृता त्वया च २२ न वै यथापूर्वमिवासि पुत्र चिन्ता-

---

प्रदेश अत्यंत कृश असल्यामुळे तिच्या हावभावानें मोडतेच आहे कीं काय अशारीतीनें ती चेंडू घेऊन त्या ऋषीजवळ खेळू लागली; आपले अवयव त्याच्या अवयवाला लावून वरचेवर त्याला आलिंगन देऊ लागली १६ आणि प्रफुल्लित झालेल्या अशोक, तिलक व सर्ज वृक्षांना वांकवून त्यांच्या पुष्पाचे गुच्छ तोडल्यावर मदानें धुंद होऊन लाजत लाजत त्या ऋषिपुत्राकडे पाहून त्याला मोहित करूं लागली १७. तेव्हां ऋश्यशृंग अगदीं गुग होऊन गेला आहे असें पाहतांच वरचेवर तिनें त्याला कडकडून आलिंगन दिलें आणि " सांप्रत माझ्या अग्निहोत्र होमाची वेळ झाली, आतां मी जातें " असें मिष करून त्याजकडे नेत्रकटाक्षानें पहात पहात ती निघून चालती झाली १८. ती गेल्यावर मदनबाधेनें कांहीं एक सुचेनासें झालेला तो ऋश्यशृंग तिचेंच चिंतन करीत जवळ कोणी नाहीं असें पाहून व मोठ्यानें सुस्कारे टाकून अत्यंत चिंताक्रांत झाला असतां १९ नखशिखांत रोमाचांनीं भरलेला, सिंहाप्रमाणें पिंगट डोळे असलेला, वेद पठण करणारा व महायोगी असा विभांडक तेथें एका मुहूर्तांतच येऊन पोंचला २० आणि आपला मुलगा कांहीं भलभलतेंच मनामध्यें आणून चिंतन करीत आहे व आकाशाकडे दृष्टि देऊन श्वासोच्छ्वास सोडीत आहे असें पाहून तो आपल्या दीन झालेल्या मुलाला ह्मणाला २१ " बा ऋश्यशृंगा, तूं आज समिधा जुळून ठेविल्या नाहींस, अग्निहोत्राचा होम केलास नाहींस, स्रुवा व स्रुची ह्या चांगल्या धुऊन ठेविल्या नाहींस व त्याचप्रमाणें धार काढण्याकरितां वासरूं गाईजवळ नेलेंही नाहींस असें दिसतें २२. हे पुत्रा, तुझी मुद्रा पहिल्याप्रमाणें दिसत नसून ती चिंताक्रांत व खिन्न झालेली

परश्चामि विचेतनश्च । दीनोतिमात्रं त्वमिहाद्य किं तु पृच्छामि त्वां क इहाद्यागतोभूत् २३ [४५६६] इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यामारण्यके पर्वणि तीर्थयात्रापर्वणि लोमशतीर्थयात्रायामृश्यशृङ्गोपाख्यान एकादशाधिकशततमोध्यायः ॥ १११ ॥

ऋश्यशृङ्ग उवाच ॥ इहागतो जटिलो ब्रह्मचारी न वै ह्रस्वो नातिदीर्घो मनस्वी । सुवर्णवर्णः कमलायताक्षः स्वतः सुराणामिव शोभमानः १ समृद्धरूपः सवितेव दीप्तः सुश्लक्ष्णकृष्णाक्षिरतीव गौरः । नीलाः प्रसन्नाश्च जटाः सुगन्धा हिरण्यरज्जुग्रथिताः सुदीर्घाः २ आधाररूपा पुनरस्य कण्ठे विभ्राजते विद्युदिवान्तरिक्षे । द्वौ चास्य पिण्डावधरेण कण्ठादजातरोमौ सुमनोहरौ च ३ विलग्नमध्यश्च स नाभिदेशे कटिश्च तस्यातिकृतप्रमाणा । तथास्य चीरान्तरतः प्रभाति हिरण्मयी मेखला मे यथेयम् ४ अन्यच्च तस्माद्भुतदर्शनीयं विकूजितं पादयोः संप्रभाति । पाण्योश्च तद्वत्स्वनवन्निबद्धौ कलापकावक्षमाला यथेयम् ५ विचेष्टमानस्य च तस्य

दिसत आहे. तेव्हा आज ह्याप्रमाणे तुझ्या मनाला अत्यंत ताप होण्याचें कारण काय ? ह्या सर्व प्रकारांवरून येथें कोणीतरी आला असावा असा माझा तर्क आहे. तरी खरोखर येथें कोण आला होता हे तूं मला सांग २३. ह्याप्रमाणें० वनपर्वांतील तीर्थयात्रापर्वापैकीं लोमशतीर्थयात्रेसंबंधीं ऋश्यशृंगाच्या उपाख्यानाविषयीं एकशें अकरावा अध्याय समाप्त झाला ॥ १११ ॥

ऋश्यशृंग ह्मणतोः—हे जनका, येथें सुवर्णासारिखा गौरवर्ण, कमलनयन, अलंकारावांचून देवाप्रमाणे सुंदर व जटाधारण करणारा असा एक ब्रह्मचारी आला होता. तो फार बुटका व फार उंच असा नसून मोठा विचारी होता १. तो मोठा भव्य, सूर्यासारिखा तेजस्वी, गौरवर्ण व अत्यंत कृष्णवर्ण नेत्रांनी युक्त असून त्याच्या काळ्या कुळकुळीत जटा (वेणी) सुगंधि तेल लावून विंचरिल्यामुळें साफ बसलेल्या दिसत होत्या व त्या लांबलचक जटांमध्यें ओळीनें सोन्याचीं फुलें घातली होतीं २. शिवाय, आकाशांतली विद्युल्लताच कीं काय अशा हिराच्या पेट्या त्यानें गळ्यांत घातल्या असून त्याच्या खालीं केशरहित व मनोहर असे दोन गोळे (स्तन) होते ३. त्याचप्रमाणें नाभिप्रदेशाचे ठिकाणीं त्याची कटि अत्यंत कृश असून त्याने पुतळ्याची माळ घातली होती ती माझ्या मेखलेसारिखीच असून त्या सूक्ष्म वस्त्रांतून बाहेर दिसत होती ४. त्यानें आपल्या पायांत विस्मयांत चमत्कारिक व वाजणारी अशी एक वस्तु घातली असून माझ्या रुद्राक्षमालेप्रमाणें शब्द करणारीं भूषणें व (कंकणें) त्यानें आपल्या हातांत घातलीं होतीं ५ व तो संकू

तानि कूजन्ति हंसाः सरसीव मत्ताः । चीराणि तस्याद्भुतदर्शनानि नेमानि तद्वन्मम रूपवन्ति ६ वक्त्रं च तस्याद्भुतदर्शनीयं प्रव्याहृतं ह्लादयतीव चेतः। पुंस्कोकिलस्येव च तस्य वाणी तां शृण्वतो मे व्यथितोन्तरात्मा ७ यथा वनं माधवमासि मध्ये समीरितं श्वसनेनेव भाति । तथा स भात्युत्तमपुण्य गन्धी निषेव्यमाणः पवनेन तात ८ सुसंयताश्चापि जटा विषक्ता द्वैधीकृता नातिसमा ललाटे । कर्णौ च चित्रैरिव चक्रवाकैः समावृतौ तस्य सुरूपवद्भिः ९ तथा फलं वृत्तमथो विचित्रं समाहरत्पाणिना दक्षिणेन । तद्भूमिमासाद्य पुनःपुनश्च समुत्पतत्यद्भुतरूपमुच्चैः १० तच्चाभिहत्वा परिवर्ततेसौ वातेरितो वृक्ष इवावघूर्णन् । तं प्रेक्षतः पुत्रमिवामराणां प्रीतिः परा तात रतिश्च जाता ११ स मे समाश्लिष्य पुनः शरीरं जटासु गृह्याभ्यवनाम्य वक्त्रम् । वक्त्रेण वक्त्रं प्रणिधाय शब्दं चकार तन्मेजनयत्प्रहर्षम् १२ न चापि पाद्यं बहु मन्यतेसौ फलानि चेमानि मयाहृतानि । एवंव्रतोस्मीति च मामवोचत्फलानि चान्यानि ममाददन्मे १३ मयोपयुक्तानि

लागला असतां तीं सरोवरावरील मत्त आलेले हंसच शब्द करीत आहेत कीं काय असा शब्द करीत. त्याचप्रमाणें त्याचीं वल्कलें माझ्या वल्कलासारिखीं नसून तीं फारच प्रेक्षणीय व सुंदर होतीं ६. त्याचें मुख रमणीय असून मनाला आल्हाद देणारें होतें आणि त्याची वाणी कोकिलेप्रमाणें मधुर असून ती श्रवण करिताच मला मोह उत्पन्न झाला ७. हे तात, वसंत ऋतूमध्यें वारा सुटला असतां वन जसें शोभायमान दिसतें त्याप्रमाणें तो सुगंध व पुण्यकारक अशा वायूनें युक्त असल्यामुळें सुंदर दिसत होता ८. त्यानें आपल्या मस्तकीं जटांचे दोन भाग करून व त्यांच्या पट्या बसवून त्या गच्च बांधून टाकिल्या होत्या आणि कानामध्यें रूपवान् चक्रवाक पक्षीच की काय अशाप्रकारचीं भूषणें घातलीं होतीं ९. त्याचप्रमाणें उजव्या हातामध्यें एक चमत्कारिक वाटोळें फळ घेऊन वरचेवर तो तें जमीनीवर टाकी व त्याप्रमाणें तें जमीनीवर टाकिलें म्हणजे हुशी घेऊन उंच जात असे १०. नंतर तें फिरून खालीं आलें असतां त्याला प्रहार करून तो दूर झुगारून देत असे व त्यामुळें तो वाऱ्यानें हालणाऱ्या वृक्षाप्रमाणें दिसत असे. हे तात, त्याला पहातांक्षणीं देवांच्या पुत्राप्रमाणें त्याच्यावर माझें प्रेम बसलें ११. त्यानें मला वरचेवर आलिंगन दिल्यावर माझ्या जटा धरून माझें मस्तक वांकविलें व माझ्या तोंडावर आपलें तोंड ठेऊन चमत्कारिक शब्द केला व त्यापासून मला मोठा आनंद झाला १२." नंतर त्यानें तुह्मी दिलेलें पाद्य व हीं फळें मला घ्यावयाचीं नाहींत असें माझें व्रत आहे " असें सांगून दुसरीं चांगलीं फळें मला दिलीं १३. आज-

फलानि यानि नेमानि तुल्यानि रसेन तेषाम् । न चापि तेषां त्वगियं यथैषां साराणि नैषामिव सन्ति तेषाम् १४ तोयानि चैवातिरसानि मह्यं प्रादात्स वै पातुमुदाररूपः । पीत्वैव यान्यभ्यधिकः प्रहर्षो ममाभवद्भूश्चलितेव चासीत् १५ इमानि चित्राणि च गन्धवन्ति माल्यानि तस्योद्ग्रथितानि पट्टैः । यानि प्रकीर्येह गतः स्वमेव स आश्रमं तपसा द्योतमानः १६ गतेन तेनास्मि कृतो विचेता गात्रं च मे संपरिदह्यतीव । इच्छामि तस्यान्तिकमाशु गन्तुं तं चेह नित्यं परिवर्तमानम् १७ गच्छामि तस्यान्तिकमेव तात का नाम सा ब्रह्मचर्या च तस्य । इच्छाम्यहं चरितुं तेन सार्धं यथा तपः स चरत्यार्यधर्मा १८ चर्तुं तथेच्छा हृदये ममास्ति दुनोति चित्तं यदि तं न पश्ये १९ [४५८५] इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यामारण्यके पर्वणि तीर्थयात्रापर्वणि लोमशतीर्थयात्रायामृश्यशृङ्गोपाख्याने द्वादशाधिकशततमोऽध्यायः ॥ ११२ ॥

विभाण्डक उवाच ॥ रक्षांसि चैतानि चरन्ति पुत्र रूपेण तेनाद्भु-

पर्यंत मी जीं जीं फळें खात आलों तीं त्यानें दिलेल्या फलांसारिखीं रसभरीत नसून त्यांत त्यांच्यासारिखा मगज नव्हता व त्यांची सालही (त्यानें दिलेल्या) त्या फलांसारिखी नव्हती १४. त्या उदार गृहस्थानें अत्यंत मधुर मधुर अशीं पेय द्रव्यें (मद्यें) मला पिण्याकरितां दिलीं व तीं मीं प्राशन केल्यावर मला मोठा आनंद झाला आणि ही पृथ्वी फिरते आहे कीं काय असें मला वाटूं लागलें १५. नंतर ह्या रेशमाच्या सुतांत ओंवलेल्या सुगंधि पुष्पांच्या नानाप्रकारच्या माळा येथें मुद्दाम टाकून देऊन तपाच्या तेजानें देदीप्यमान् असा तो स्वतः आपल्या आश्रमाला निघून गेला १६. तो जातांक्षणीं मला कांहींएक सुचनासें होऊन माझें शरीर (मदनबाधेनें) जळूं लागलें; ह्मणून आतां त्याच्याजवळ जावें व तो नेहमीं माझ्याजवळ असावा असें मला वाटूं लागलें आहे १७. मला वाटतें ज्याप्रमाणें तो श्रेष्ठ धर्माचरण करणारा व्रतस्थ तपस्वी तप करीत आहे त्याप्रमाणें त्याच्याजवळ जाऊन आपणही तपश्चर्या करावी. हे तात, ही त्याची दीक्षा कोणच्या प्रकारची आहे ? १८ खरोखर जर तो माझ्या दृष्टीं पडला नाहीं अथवा जर मला त्याच्याबरोबर तप करावयास सांपडलें नाहीं तर माझ्या मनाला समाधान वाटणार नाहीं १९. ह्याप्रमाणें ० वनपर्वांतील तीर्थयात्रापर्वांपैकीं लोमशतीर्थयात्रासंबंधीं ऋश्यशृंगाच्या आख्यानाविषयीं एकशें बारावा अध्याय समाप्त झाला ॥ ११२ ॥

विभांडक ह्मणतातः—बा पुत्रा, दिसण्यांत अद्भुत व अतुलपराक्रमी असे राक्षस

दर्शनेन । अतुल्यवीर्याण्यभिरूपवन्ति विघ्नं सदा तपसश्चिन्तयन्ति १ सुरूपरूपाणि च तानि तात प्रलोभयन्ते विविधैरुपायैः । सुखाच्च लोकाच्च निपातयन्ति तान्युग्ररूपाणि मुनीन्वनेषु २ न तानि सेवेत मुनिर्यतात्मा सतां लोकान्प्रार्थयानः कथंचित् । कृत्वा विघ्नं तापसानां रमन्ते पापाचारास्तापसस्तान्न पश्येत् ३ असज्जनेनाचरितानि पुत्र पापान्यपेयानि मधूनि तानि । माल्यानि चैतानि न वै मुनीनां स्मृतानि चित्रोज्ज्वलगन्धवन्ति ४ रक्षांसि तानीति निवार्य पुत्रं विभाण्डकस्तां मृगयाम्बभूव । नासादयामास यदा त्र्यहेण तदा स पर्याववृते श्रमाय ५ यदा पुनः काश्यपो वै जगाम फलान्याहर्तुं विधिनाश्रावणेन । तदा पुनर्लोभयितुं जगाम सा वेषयोषा मुनिमृश्यशृङ्गम् ६ दृष्ट्वैव तामृश्यशृङ्गः प्रहृष्टः संभ्रान्तरूपोऽभ्यपतत्तदानीम् । प्रोवाच चैनां भवतो श्रमाय गच्छाव यावन्न पिता ममैति ७ ततो राजन्काश्यपस्यैकपुत्रं प्रवेश्य योगेन विमुच्य नावम् । प्रमोदयन्त्यो विविधैरुपायै राजग्मुरङ्गाधिपतेः समीपम् ८ संस्थाप्य तामाश्रमदर्शने तु

तपश्चर्येला विघ्न करण्याकरितां नेहमीं अशाप्रकारच्या सुंदर रूपांनीं येथें संचार करीत असतात १. ते उग्र रूप धारण करणारे राक्षस सुंदर रूपें धारण करून नानाप्रकारच्या युक्तिपूर्वक वनांतील मुनींना मोहित करितात आणि सुख व परलोक ह्यांपासून त्यांना च्युत करितात २. ह्यास्तव, उत्तम लोकप्राप्तीची इच्छा करणाऱ्या व जितेंद्रिय मुनीनें तपस्व्यांना विघ्न करून आनंद मानणाऱ्या पापी राक्षसांकडे कधींही अवलोकन करूं नये व त्यांचें कधीं सेवनही करूं नये ३. हे पुत्रा, तीं पापरूप मद्यें व त्या नानाप्रकारच्या सुगंधी पुष्पांच्या माळा पापी लोकांनींच सेवन करण्यास योग्य असून (स्मृतीमध्यें) मुनींना तीं निषिद्ध धरिलीं आहेत ४. ह्याप्रमाणें विभांडकांनी ते राक्षस आहेत असें सांगून पुत्राचें निवारण केल्यावर ते मुनि तिच्या शोधाकरितां गेले; परंतु, तिचा शोध न लागल्यामुळें ते तिसऱ्या दिवशीं आपल्या आश्रमाला परत आले ५. पुन्हां इष्टीकरिता फळें आणण्यासाठीं ते निघून गेले असतां ऋश्यशृंगाला पुनरपि मोहित करण्याकरितां ती वेश्या तेथें आली ६. तिला पाहिल्यावर आनंदित झालेला तो ऋश्यशृंग मोहित होऊन भूतलावर पडला व किंचित सावध होऊन "माझा पिता आला नाहीं तोंच आपण उभयतां तुझ्या आश्रमाला जाऊं" असें तिला ह्मणाला ७. हें त्याचें भाषण ऐकतांच तिनें फक्त त्या कश्यपपुत्रालाच आपल्या नौकेमध्यें घेतल्यावर ती हाकारिली आणि नानाप्रकारच्या साधनांनीं त्याला आनंदित करीतकरीत अंगदेशाधिपतीच्या जवळ ते उभयतां आले ८. ज्या नौकेनें ते तरून आले त्या नौकेतील आश्रम लोकांच्या दृष्टीं

संतारितां नावमथानिशुभ्राम् । नीगदुपादाय तथैव चक्रे नाव्याश्रमं नाम वनं विचित्रम् ९ अन्तःपुरे तं तु निवेश्य राजा विभाण्डकस्यात्मजमेकपुत्रम् । ददर्श देवं सहसाप्रविष्टमापूर्यमाणं च जगज्जलेन १० स लोमपादः परिपूर्णकामः सुतां ददावृश्यशृङ्गाय शान्ताम् । क्रोधप्रतीकारकरं च चक्रे गाश्चैव मार्गेषु च कर्षणानि ११ विभाण्डकस्यव्रजतः स राजा पशून्प्रभूतान्पशुपांश्च वीरान् । समादिशत्पुत्रगृद्धी महर्षिर्विभाण्डकः परिपृच्छेद्यदा वः १२ स वक्तव्यः प्राञ्जलिभिर्भवद्भिः पुत्रस्य ते पशवः कर्षणं च । किं ते प्रियं वै क्रियतां महर्षे दासाः स्म सर्वे तव वाचि-बद्धाः १३ अथोपायात्स मुनिश्चण्डकोपः स्वमाश्रमं मूलफलं गृहीत्वा । अन्वेषमाणश्च न तत्र पुत्रं ददर्श चुक्रोध ततो भृशं सः १४ ततः स कोपेन विदीर्यमाण आशङ्कमानो नृपतेर्विधानम् । जगाम चम्पां प्रति धक्ष्यमाणस्तमङ्गराजं सपुरं सराष्ट्रम् १५ स वै श्रान्तः क्षुधितः काश्यपस्तान्घोषान्समासादितवान्समृद्धान् । गोपैश्च तैर्विधिवत्पूज्यमानो राजेव तां रात्रिमुवास तत्र १६ अवाप्य सत्कारमतीव तेभ्यः प्रोवाच कस्य प्रथिताः स्थ

पडण्याकरितां ती श्वेतवर्ण नौका त्यांनीं तशीच ठविली व जेथें ती नौका होती त्या वनाला नाव्याश्रम असें त्यांनीं विचित्र नांव दिलें ९. तदनतर राजानें त्या विभांडकाच्या एकुलत्या एक मुलाला अतःपुरांत नेऊन ठेविताक्षणीं एकाएकी अतिशय पर्जन्यवृष्टि झाली व त्या योगानें जिकडे तिकडे जगत् जलमय झालें असतां १० मनोरथ पूर्ण झालेल्या लोमपादराजानें प्रथमतः आपली शान्तानामक कन्या ऋश्यशृंगाला दिली व नंतर विभांडकांचा राग शांत व्हावा ह्मणून त्यांच्या येण्याच्या मार्गावर गवळी वगैरेंना गाई व पुष्कळ जनावरें ह्यांसहवर्तमान पाठवून दिलें आणि त्यांना सांगितलें कीं, "हे गवळ्यांनो, पुत्रावर प्रेम करणारे विभांडकमहर्षि तुह्मांला विचारूं लागले असतां हात जोडून "ही जनावरें व शेतकीची सामग्री आपल्या पुत्राची असून आह्मीही आपलेच आज्ञाधारक दास आहोंत. करितां, आह्मी आपलें काय प्रिय करावें ?" असें त्यांना ह्मणा ११,१२,१३. इकडे अतिकोपिष्ट विभांडक ऋषि फळें व मुळें घेऊन आपल्या आश्रमाला परत आल्यावर पुत्राला शोधूं लागले असतां तो न सांपडल्यामुळें ते अत्यंत क्रुद्ध झाले १४ व कोपानें विदीर्ण होत आहेत कीं काय असे ते विभांडक "हें राजाचेंच कृत्य असावें" अशी शंका आल्यामुळें नगर व देश ह्यांसहवर्तमान राजाला (शापून भस्म करण्याकरितां) चंपानगरीकडे येण्यासाठीं निघाले १५. नंतर क्षुधा आणि श्रम ह्यांनीं पीडित झालेले ते विभांडक गुराढोरांनीं समृद्ध अशा गवळ्यांच्या घराजवळ आले असतां

गोपाः । ऊचुस्ततस्तेभ्युपगम्य सर्वे धनं तवेदं विहितं सुतस्य १७ देशेषु
देशेषु स पूज्यमानस्तां श्चैव शृण्वन्मधुरान्प्रलापान् । प्रशान्तभूयिष्ठरजाः
प्रहृष्टः समाससादाङ्गपतिं पुरस्थम् १८ स पूजितस्तेन नरर्षभेण ददर्श पुत्रं
दिवि देवं यथेन्द्रम् । शान्तां स्नुषां चैव ददर्श तत्र सौदामनीमुच्चरन्तीं
यथैव १९ ग्रामांश्च घोषांश्च सुतस्य दृष्ट्वा शान्तां च शान्तोऽस्य परः स
कोपः । चकार तस्यैव परं प्रसादं विभाण्डको भूमिपतेर्नरेन्द्र २० स तत्र
निक्षिप्य सुतं महर्षिरुवाच सूर्याग्निसमप्रभावः । जाते च पुत्रे वनमेवा-
व्रजेथा राज्ञः प्रियाण्यस्य सर्वाणि कृत्वा २१ स तद्वचः कृतवानृश्य-
शृङ्गो ययौ च यत्रास्य पिता बभूव । शान्ता चैनं पर्यचरन्नरेन्द्र खे रोहिणी
सोममिवानुकूला २२ अरुन्धती वा सुभगा वसिष्ठं लोपामुद्रा वा यथा
ह्यगस्त्यम् । नलस्य वै दमयन्ती यथाभूद्यथा शची वज्रधरस्य चैव २३
नारायणी चेन्द्रसेना बभूव वश्या नित्यं मुद्गलस्याजमीढ । तथा शान्ता

गोपांनीं त्यांचे विधिपूर्वक पूजन केल्यावर त्यांनीं तेथें ती रात्र राजाप्रमाणे काढिली १६ आणि त्यांनीं केलेल्या आदरातिथ्याचा स्वीकार केल्यानंतर "हे गोपहो, तुह्मी कोणाचे आहांत?" ह्मणून त्यांना त्यांनी विचारिलें. तव्हा ते सर्व त्यांच्याजवळ जाऊन ह्मणाले कीं, "हें धन व आह्मी आपल्या मुलाचेच आहोत" १७ ह्याप्रमाणे जागोजागी सन्मान होत असलेले व अशाप्रकारची मधुर भाषणे ऐकल्यामुळे ज्याचा बराचसा कोप शांत झाला आहे असे ते मुनि आनंदानें अंगदेशच्या राजाच्या राजधानीकडे आले असतां १८ त्या पुरुषश्रेष्ठ राजानें त्याचे आतिथ्य केले. तव्हां त्या मुनींनी तेथें बसलेला स्वर्गांतील इंद्रच कीं काय असा आपला मुलगा व वरचेवर चमकणाऱ्या विद्युल्लतेप्रमाणें तेजस्वी अशी आपली स्नुषा शांता या उभयतांस अवलोकन केलें १९. तेव्हा, हे पुरुषश्रेष्ठा, त्या विभांडक मुनींनेतीं खेडींपाडी, त्या वाड्या व त्याचप्रमाणें आपल्या पुत्राची स्त्री शांता ह्यांना अवलोकन करितांक्षणी त्यांचा क्रोध नाहीसा झाला आणि त्या पृथ्वीपतीवर ते अतिशय प्रसन्न झाले २०. नंतर सूर्य व अग्नि ह्याच्याप्रमाणे ज्यांचा पराक्रम आहे अशा त्या महर्षींनी आपल्या मुलाला तथें ठेवून "बा वत्सा, तुला पुत्र झाला असतां व राजाचे सर्व मनोरथ परिपूर्ण झाले असता तू वनामध्ये ये" असें सांगितलें २१ असो. ऋश्यशृंगही बापानें सांगितल्याप्रमाणें सर्व गोष्टी झाल्यावर ज्या वनामध्ये त्याचा पिता राहत होता तेथें गेला व, हे पुरुषश्रेष्ठा, ज्याप्रमाणे चंद्राच्या मागोमाग रोहिणी जाते त्याप्रमाणें शांताही त्याच्या मागोमाग वनांत चालती झाली २२ आणि अरुंधतीनें वसिष्ठांचें, लोपामुद्रेनें अगस्त्यांचें, दमयंतीनें नलाचें, इंद्राणीनें वज्रधारण करणाऱ्या इंद्राचें व नारायणकन्या इंद्रसेनेनें मुद्गलाचें

ऋश्यशृङ्गं वनस्थं प्रीत्या युक्ता पर्यचरन्नरेन्द्र २४ तस्याश्रमः पुण्य एषो-
वभाति महाहृदं शोभयन्पुण्यकीर्तिः । अत्र स्नातः कृतकृत्यो विशुद्धस्ती-
र्थान्यन्यान्यनुसंयाहि राजन् २५ [४६१०] इति श्रीमहाभारते शतसा-
हस्र्यां संहितायां वैयासिक्यामारण्यके पर्वणि तीर्थयात्रापर्वणि लोमशती-
र्थयात्रायामृश्यशृङ्गोपाख्याने त्रयोदशाधिकशततमोऽध्यायः ॥ ११३ ॥

वैशम्पायन उवाच ॥ ततः प्रयातः कौशिक्याः पाण्डवो जनमेजय ।
आनुपूर्व्येण सर्वाणि जगामायतनान्यथ १ स सागरं समासाद्य गङ्गायाः
संगमे नृप । नदीशतानां पञ्चानां मध्ये चक्रे समाप्लवम् २ ततः समुद्र-
तीरेण जगाम वसुधाधिपः । भ्रातृभिः सहितो वीरः कलिङ्गान्प्रति भारत ३
लोमश उवाच ॥ एते कलिङ्गाः कौन्तेय यत्र वैतरणी नदी । यत्रायजत
धर्मोपि देवाञ्शरणमेत्य वै ४ ऋषिभिः समुपायुक्तं यज्ञियं गिरिशोभि-
तम् । उत्तरं तीरमेतद्धि सततं द्विजसेवितम् ५ समानं देवयानेन पथा
स्वर्गमुपेयुषः । अत्र वै ऋषयोन्येपि पुरा क्रतुभिरीजिरे ६ अत्रैव रुद्रो
राजेन्द्र पशुमादत्तवान्मखे । पशुमादाय राजेन्द्र भागोयमिति चाब्रवीत् ७

ज्याप्रमाणे सेवन केले त्याप्रमाणेच शांता वनांत असलेल्या ऋश्यशृंगाचें सेवन करूं
लागली २३,२४. हे राजा, त्या महात्म्याचा तो हा महाऱ्हदाच्या काठीं असलेला अतिशय
शोभिवंत असा आश्रम दिसत आहे. तस्मात् , आता तूं येथें स्नान करून कृतकृत्य व शुद्ध हो
आणि दुसऱ्या तीर्थाला जा २५ ह्याप्रमाणे ०वनपर्वांतील तीर्थयात्रापर्वापैकीं लोमशतीर्थया-
त्रेसंबंधी ऋश्यशृंगाच्या आख्यानाविषयी एकशे तेरावा अध्याय समाप्त झाला ॥ ११३॥

वैशंपायन सांगतात:— हे जनमेजया, पांडुपुत्र युधिष्ठिर कौशिकी नदीपासून निघा-
ल्यावर क्रमाक्रमाने सर्व तीर्थें करीत चालला १. हे राजा, गंगेच्या व समुद्राच्या संग-
मापाशीं आल्यावर धर्मराजानें पांचशें नद्यांच्या मध्यभागीं विधिपूर्वक स्नान केलें २ आणि,
हे भरतकुलोत्पन्ना जनमेजया, तो वीर भूपति समुद्राच्या तीरातीराने आपल्या भ्रात्यांसह-
वर्तमान कलिंगनामक देशाला आला ३. लोमश सांगतात:—हे कुंतीपुत्रा युधिष्ठिरा,
वैतरणी नदी असलेले हेच ते कलिंग देश आणि ह्याच ठिकाणीं देवांना शरण गेलेल्या
साक्षात् धर्मानें यज्ञ केले होते ४. हे धर्मराजा, ऋषींनीं व ब्राह्मणांनीं सेवन केलेलें व
यज्ञसामग्रीनें युक्त अशा पर्वतानें शोभायमान झालेले असें हें (त्या नदीचें) उत्तर तीर तूं
अवलोकन कर ५. खरोखर हें स्थल स्वर्गप्राप्तीची इच्छा करणाऱ्या मनुष्याला स्वर्गाचा
मार्ग असून ह्याच ठिकाणीं ऋषींनीं व दुसऱ्याही पुष्कळांनी यज्ञ केले होते ६ हे नृपश्रेष्ठा,
येथें पूर्वी एका यज्ञामध्यें रुद्रानें पशूचें हरण केलें असतां " हा माझा भाग आहे "

हृते पशौ तदा देवास्तमूचुर्भरतर्षभ । मा परस्वमभिद्रोग्धा मा धर्मान्सकलान्वशीः ८ ततः कल्याणरूपाभिर्वाग्भिस्ते रुद्रमस्तुवन् । इष्ट्या चैनं तर्पयित्वा मानयाञ्चक्रिरे तदा ९ ततः स पशुमुत्सृज्य देवयानेन जग्मिवान् । तत्रानुवंशो रुद्रस्य तं निबोध युधिष्ठिर १० अयातयामं सर्वेभ्यो भागेभ्यो भागमुत्तमम् । देवाः संकल्पयामासुर्भयाद्रुद्रस्य शाश्वतम् ११ इमां गाथामत्र गायन्नपः स्पृशति यो नरः । देवयानोऽस्य पन्थाश्च चक्षुषाभिप्रकाशते १२ वैशम्पायन उवाच ॥ ततो वैतरणीं सर्वे पाण्डवा द्रौपदी तथा । अवतीर्य महाभागास्तर्पयांचक्रिरे पितॄन् १३ युधिष्ठिर उवाच ॥ उपस्पृश्येह विधिवदस्यां नद्यां तपोबलात् । मानुषादस्मि विषयादपेतः पश्य लोमश १४ सर्वाल्लोकान्प्रपश्यामि प्रसादात्तव सुव्रत । वैखानसानां जपतामेष शब्दो महात्मनाम् १५ लोमश उवाच ॥ त्रिशतं वै सहस्राणि योजनानां युधिष्ठिर । यत्र ध्वनिं शृण्वोष्येनं तूष्णीमास्व विशाम्पते १६ एतत्स्वयंभुवो राजन्वनं दिव्यं प्रकाशते । यत्रायजत

असें तो ह्मणाला ७. हे भरतवंशजश्रेष्ठा, ह्याप्रमाणें शंकरानें पशूचे हरण केलेलें पाहिल्यावर " हे रुद्रा, सर्व धर्मांना न जुमानितां दुसऱ्याच्या भागाचा नाश करणें तुला योग्य नाहीं " असें ते देव त्याला म्हणाले ८ व कल्याणकारक वाणीनें त्यांनी त्याचें स्तवन करून यजनपूर्वक त्याचा अतिशय संमान केला ९. तेव्हां त्या शंकरानें पशूला सोडून देऊन देव ज्या मार्गानें जातात त्या मार्गानें आपण गमन केलें. हे युधिष्ठिरा, आतां त्यानंतरचें रुद्राचें चरित्र तूं ऐक १०. हे राजा, तेव्हांपासून रुद्राला भिऊन गेलेले देव सर्वांत उत्तम व ताजा असलेला भाग शंकराला निरंतर देऊं लागले ११. आतां हे युधिष्ठिरा, ह्या ठिकाणीं जो ही कथा कथन करितो व ह्या तीर्थोदकाला स्पर्श करितो त्याला देव ज्या मार्गानें जातात तो मार्ग आपल्या डोळ्यांनी दिसूं लागतो १२. वैशंपायन सांगतातः—तदनंतर द्रौपदीसहवर्तमान त्या महाभाग्यवान् पांडवांनी वैतरणी नदीमध्यें उतरून स्नान केलें आणि आपल्या पितरांचें तर्पण केलें १३. युधिष्ठिर ह्मणतोः—हे लोमशऋषे, ह्या नदीचे ठिकाणीं विधिपूर्वक स्नान केल्यामुळें व तपःसामर्थ्यामुळें आतां मला " मी मनुष्यलोकांतून वर गेलों आहे, असें वाटतें १४. हे सुव्रता, तुझ्या प्रसादानें सांप्रत मला सर्व लोक दिसावयास लागले असून महात्म्या वनांत रहाणाऱ्या मुनींच्या जपाचा हा शब्दही ऐकूं येऊं लागला आहे १५. लोमश सांगतातः—हे युधिष्ठिरा, ज्या ठिकाणापासून हा शब्द ऐकूं येत आहे तें ठिकाण येथून तीन लाख योजनांवर आहे. हे राजा, आतां तूं कांहीं न बोलतां स्वस्थ रहा १६. हे नराधिपते,

राजेन्द्र विश्वकर्मा प्रतापवान् १७ यस्मिन्यज्ञे हि भूर्दत्ता कश्यपाय
महात्मने । सपर्वतवनोद्देशा दक्षिणार्थे स्वयंभुवा १८ अवासीदच्च कौन्तेय
दत्तमात्रा मही तदा । उवाच चापि कुपिता लोकेश्वरमिदं प्रभुम् १९
न मां मर्त्याय भगवन्कस्मैचिद्दातुमर्हसि । प्रदानं मोघमेतत्ते यास्याम्येषा
रसातलम् २० विषीदन्तीं तु तां दृष्ट्वा कश्यपो भगवानृषिः । प्रसादयां
बभूवाथ ततो भूमिं विशाम्पते २१ ततः प्रसन्ना पृथिवी तपसा तस्य
पाण्डव । पुनरुन्मज्ज्य सलिलाद्वेदीरूपा स्थिता बभौ २२ सैषा प्रकाशते
राजन्वेदी संस्थानलक्षणा । आरुह्यात्र महाराज वीर्यवान्वै भविष्यसि २३
सैषा सागरमासाद्य राजन्वेदी समाश्रिता । एतामारुह्य भद्रं ते त्वमे-
कस्तर सागरम् २४ अहं च ते स्वस्त्ययनं प्रयोक्ष्ये यथा त्वमेनामधिरोह-
सेद्य । स्पृष्टा हि मर्त्येन ततः समुद्रमेषा वेदी प्रविशत्याजमीढ २५ ओं नमो
विश्वगुप्ताय नमो विश्वपराय ते । सान्निध्यं कुरु देवेश सागरे लवणा-
म्भसि २६ अग्निर्मित्रो योनिरापोऽथ देव्यो विष्णोरेतस्त्वममृतस्य नाभिः ।

जेथे महापराक्रमी व विश्व निर्माण करणाऱ्या स्वयंभू ब्रह्मदेवानें यज्ञ केला तें हें दिव्य व प्रकाशित होणारें वन तू अवलोकन कर १७. या यज्ञाचे ठिकाणीं स्वयंभू ब्रह्मदेवानें महात्म्या कश्यपमुनींना दक्षिणा ह्मणून पर्वत व वन ह्यांसहवर्तमान पृथ्वीचें दान केलें १८. तेव्हां, हे कुंतीपुत्रा युधिष्ठिरा, ह्याप्रमाणें लोकाधिपति प्रभु ब्रह्मदेवानें आपलें कश्यपमुनीला दान केलें असें पहातांक्षणीं ती खिन्न झालेली पृथ्वी रागानें "हे भगवन्, कोणाही मनुष्याला मला देण्याला आपण योग्य नाहीं. तेव्हां आपलें देणें व्यर्थ करण्याकरितां मी रसातलाचे ठिकाणीं जातें" असें ह्मणाली १९,२०. हे नराधिपते, ह्याप्रमाणें खिन्न झालेल्या पृथ्वीला अवलोकन केल्यावर भगवान् कश्यपऋषि तिची स्तुति करूं लागले असतां २१ त्यांच्या स्तुतीनें व तपानें प्रसन्न झालेली ती पृथ्वी पुनरपि पाण्यावर येऊन वेदीरूपानें स्थित झाली २२. त्याच ह्या वेदीरूपानें स्थित झालेल्या व प्रकाशित होणाऱ्या पृथ्वीला तू अवलोकन कर व, हे महाराज, तिच्यावर चढ ह्मणजे तूं बलवान् होशील २३. ही वेदी येथपासून समुद्रापर्यंत गेलेली आहे. तस्मात्, हे राजा, तुझें कल्याण असो, तूं तिच्यावर चढ आणि ह्या समुद्राला एकटाच तरून जा २४. हे राजा, हिच्यावर चढण्याचा अधिकार तुला प्राप्त होण्याकरितां मी आज स्वस्तिपुण्याहवाचनादि कर्में करितो. कारण, अपवित्र मनुष्यानें हिला स्पर्श केला असतां ती समुद्रांत शिरते २५. ह्यास्तव, हे पांडुपुत्रा धर्मराजा, "हे प्रभो, विश्वाचें पालन करणाऱ्या व सर्वांपेक्षां श्रेष्ठ असणाऱ्या तुला नमस्कार असो. हे देवांमध्यें श्रेष्ठ प्रभो, आपण नेहमीं ह्या क्षार-

एवं ब्रुवन्पाण्डव सत्यवाक्यं वेदीमिमां त्वं तरसाधिरोह २७ अग्निश्च ते योनिरिडा च देहो रेतोधा विष्णोरमृतस्य नाभिः । एवं जपन्पाण्डव सत्यवाक्यं ततोवगाहेत पतिं नदीनाम् २८ अन्यथा हि कुरुश्रेष्ठ देवयोनिरपाम्पतिः । कुशाग्रेणापि कौन्तेय न स्प्रष्टव्यो महोदधिः २९ वैशम्पायन उवाच ॥ ततः कृतस्वस्त्ययनो महात्मा युधिष्ठिरः सागरमभ्यगच्छत् । कृत्वा च तच्छासनमस्य सर्वं महेन्द्रमासाद्य निशामुवास ३० [४६४०] इति श्रीमहाभारते० वैयासिक्यामारण्यके पर्वणि तीर्थयात्रापर्वणि लोमशतीर्थयात्रायां महेन्द्राचलगमने चतुर्दशाधिकशततमोऽध्यायः ॥ ११४ ॥

वैशम्पायन उवाच ॥ स तत्र तामुषित्वैकां रजनीं पृथिवीपतिः । तापसानां परं चक्रे सत्कारं भ्रातृभिः सह १ लोमशस्तस्य तान्सर्वानाचख्यौ तत्र तापसान् । भृगूनङ्गिरसश्चैव वासिष्ठानथ काश्यपान् २ तान्समेत्य स राजर्षिरभिवाद्य कृताञ्जलिः । रामस्यानुचरं वीरमपृच्छदकृतव्रणम् ३ कदा तु रामो भगवांस्तापसान्दर्शयिष्यति । तेनैवाहं प्रसङ्गेन द्रष्टुमिच्छामि

समुद्राच्या सन्निधच असावें २६. हे समुद्रा, तूं अग्नि, सूर्य, देवी, विष्णूचें रेत व अमृत ह्यांच्या उत्पत्तीचें स्थान असून तुझें उत्पत्तिस्थान अग्नि आहे, पृथ्वी हाच तुझा देह आहे, विष्णु हाच तुझा जीव आहे व अमृत हीच तुझी नाभी आहे" असें सत्य भाषण करून तूं ह्या वेदीवर चढ व समुद्राचे ठिकाणीं स्नान कर २७,२८. कारण, असें म्हटल्यावांचून, हे कुरुवंशजश्रेष्ठा, देवांचें वसतिस्थान व उदकाचा सांठा असा जो हा मोठा समुद्र त्याला दर्भाच्या अग्रानेंही स्पर्श करूं नये २९. वैशंपायन सांगतातः— तदनंतर स्वस्तिपुण्याहवाचन केलेल्या महात्म्या युधिष्ठिरानें समुद्रापाशीं आल्यावर लोमशऋषींच्या सांगण्याप्रमाणें सर्व केलें व महेंद्र पर्वतावर येऊन ती रात्र मोठ्या सुखानें काढिली ३०. ह्याप्रमाणें० वनपर्वांतील तीर्थयात्रापर्वांपैकीं लोमशतीर्थयात्रेसंबंधीं महेंद्राचलगमनाविषयीं एकशें चवदावा अध्याय समाप्त झाला ॥ ११४ ॥

वैशंपायन सांगतातः—त्या ठिकाणीं भूपती धर्मराजानें एक रात्र वास्तव्य करून भ्रात्यांसहवर्तमान तपस्व्यांचा मोठा सत्कार केला १. तेव्हां लोमशांनीं—हे भृगु मुनि, हे आंगिरस, हे वासिष्ठ व हे काश्यप—अशा प्रकारचीं त्या सर्व तपस्वी जनांचीं नांवें धर्मराजास कथन केलीं २. (तीं श्रवण केल्यावर) राजर्षि धर्मराजानें त्यांच्याजवळ जाऊन अभिवंदनपूर्वक हात जोडिले आणि रामाचे अनुयायी अशा महापराक्रमी अकृतव्रणाला तो विचारूं लागला कीं ३, " हे मुनिश्रेष्ठा, ते भगवान् राम आतां ह्या तपस्व्यांना भेटण्याकरितां केव्हां येतील ? माझ्या मनांत तीच संधी साधून त्यांचें दर्शन घ्यावें

भार्गवम् ४ अकृतव्रण उवाच ॥ आयत्येवास्मि विदितो रामस्य विदितात्मनः। प्रीतिस्त्वयि च रामस्य क्षिप्रं त्वां दर्शयिष्यति ५ चतुर्दशीमष्टमीं च रामं पश्यन्ति तापसाः। अस्यां रात्र्यां व्यतीतायां भवित्री श्वश्चतुर्दशी ६ युधिष्ठिर उवाच ॥ भवाननुगतो रामं जामदग्न्यं महाबलम्। प्रत्यक्षदर्शी सर्वस्य पूर्ववृत्तस्य कर्मणः ७ स भवान्कथयत्वद्य यथा रामेण निर्जिताः। आहवे क्षत्रियाः सर्वे कथं केन च हेतुना ८ अकृतव्रण उवाच ॥ हन्त ते कथयिष्यामि महदाख्यानमुत्तमम्। भृगूणां राजशार्दूल वंशे जातस्य भारत ९ रामस्य जामदग्न्यस्य चरितं देवसंमितम्। हैहयाधिपतेश्चैव कार्तवीर्यस्य भारत १० रामेण चार्जुनो नाम हैहयाधिपतिर्हतः। तस्य बाहुशतान्यासंस्त्रीणि सप्त च पाण्डव ११ दत्तात्रेयप्रसादेन विमानं काञ्चनं तथा। ऐश्वर्यं सर्वभूतेषु पृथिव्यां पृथिवीपते १२ अव्याहतगतिश्चैव रथस्तस्य महात्मनः। रथेन तेन तु सदा वरदानेन वीर्यवान् १३ ममर्द देवान्यक्षांश्च ऋषींश्चैव समन्ततः। भूतांश्चैव स सर्वांस्तु पीडयामास

असें आहे " ४. अकृतव्रण ह्मणतातः—हे राजा, त्या ज्ञानसंपन्न रामचंद्राला तूं येणार आहेस हें पूर्वींच कळलेलें असून तुझ्यावर त्यांचें फार प्रेम आहे. ह्यास्तव, ते लवकरच तुला येऊन भेटतील ५. (येथे वास्तव्य करणाऱ्या) ह्या मुनींना चतुर्दशीला व अष्टमीला राम येऊन भेटतात व ही रात्र उजाडल्यावर उद्याच चतुर्दशी आहे ६. युधिष्ठिर ह्मणतोः—हे अकृतव्रणा, ज्याअर्थी तू महाबलाढ्य जमदग्निपुत्र रामाचा अनुयायी होऊन त्यानें पूर्वी केलेल्या सर्व गोष्टी प्रत्यक्ष अवलोकन केल्या आहेस त्याअर्थी ७ त्या रामानें रणांगणाचे ठिकाणीं सर्व क्षत्रियांचा कसा पराजय केला व तो कोणत्या हेतूनें केला हें मला सांप्रत तू कथन कर ८ अकृतव्रण ह्मणतातः—हे सिंहाप्रमाणे महापराक्रमी भरतकुलोत्पन्ना धर्मराजा, मी तुला भृगुवंशांत उत्पन्न झालेल्या रामाचें श्रेष्ठ आख्यान कथन करितो ९. हें देवांना मान्य असलेलें जमदग्निपुत्र रामाचें चरित्र सांगून, हे भरतकुलोत्पन्ना, हें हैहयाधिपति कार्तवीर्याचेंही चरित्र तुला सांगतो १०. हे पांडुपुत्रा धर्मराजा, ज्या हैहयाधिपति अर्जुनाचा रामानें वध केला त्याला एक हजार बाहू होते ११ हे भूपते, तो ह्या पृथ्वीचे ठिकाणीं सर्व प्राण्यामध्यें ऐश्वर्यानें जास्त असून दत्तात्रेयांच्या कृपमुळें त्याच्याजवळ एक सुवर्णाचें विमान होतें १२. त्या महात्म्या अर्जुनापाशीं ज्याची गति कोठेंही कुंठित होत नाहीं असा एक रथ असून तो त्या रथाच्या योगानें व वर प्राप्त करून घेतल्यामुळें देव, यक्ष व सभोंवतालच्या प्रदेशांत असलेले ऋषि ह्यांचा नाश करून सर्व प्राण्यांना अतिशय त्रास देऊं

सर्वतः १४ ततो देवाः समेत्याहुर्ऋषयश्च महाव्रताः । देवदेवं सुरारिघ्नं विष्णुं सत्यपराक्रमम् १५ भगवन्भूतरक्षार्थमर्जुनं जहि वै प्रभो । विमानेन च दिव्येन हैहयाधिपतिःप्रभुः । शचीसहायं क्रीडन्तं धर्षयामास वासवम् १६ ततस्तु भगवान्देवः शक्रेण सहितस्तदा । कार्तवीर्यविनाशार्थं मन्त्रयामास भारत १७ यत्तद्भूतहितं कार्यं सुरेन्द्रेण निवेदितम् । संप्रतिश्रुत्य तत्सर्वं भगवाँल्लोकपूजितः । जगाम बदरीं रम्यां स्वमेवाश्रममण्डलम् १८ एतस्मिन्नेव काले तु पृथिव्यां पृथिवीपतिः १९ कान्यकुब्जे महानासीत्पार्थिवः सुमहाबलः । गाधीति विश्रुतो लोके वनवासं जगाम ह २० वने तु तस्य वसतः कन्या जज्ञेऽप्सरःसमा । ऋचीको भार्गवस्तां च वरयामास भारत २१ तमुवाच ततो गाधिर्ब्राह्मणं संशितव्रतम् । उचितं नः कुले किंचित्पूर्वैर्यत्संप्रवर्तितम् २२ एकतःश्यामकर्णानां पाण्डुराणां तरस्विनां । सहस्रं वाजिनां शुल्कमिति विद्धि द्विजोत्तम २३ न चापि

लागला १३,१४. तेव्हां मोठमोठ्या दीक्षा धारण करणाऱ्या ऋषींसहवर्तमान सर्व देव एकत्र जुळून देवाधिदेव, दैत्यशत्रूंचा पराजय करणारा व सत्यपराक्रमी अशा विष्णूकडे आले आणि ह्मणाले १५ " हे भगवन्, त्या दिव्य विमानांत बसून संचार करणाऱ्या हैहयाधिपतीनें इंद्राणीसहवर्तमान क्रीडा करीत असलेल्या इंद्रालाही धमकी दिली. तस्मात्, हे प्रभो, प्राणिमात्रांच्या रक्षणाकरितां त्या अर्जुनाचा आपण नाश करा " १६. हें श्रवण केल्यानंतर, हे भरतकुलोत्पन्ना युधिष्ठिरा, इंद्रासहवर्तमान भगवान् विष्णु कार्तवीर्याच्या नाशाविषयीं विचार करू लागले १७. आणि इंद्रानें सांगितल्याप्रमाणें सर्व प्राणिमात्रांचें हित करण्याची प्रतिज्ञा करून सर्व लोकांनीं पूजित असे भगवान् विष्णु सुंदर अशा आपल्या बदरिकाश्रमाला निघून गेले १८. इकडे पृथ्वीतलाचे ठिकाणीं कान्यकुब्ज देशामध्यें गाधिनावानें विख्यात असलेला व महाबलाढ्य असा राजा राज्य करीत असतां (कांहीं कारणानें) तो त्याचवेळीं वनामध्यें वास्तव्य करण्याकरितां गेला १९,२०. ह्याप्रमाणें तो वनामध्यें वास्तव्य करीत असतां, हे भरतकुलोत्पन्ना धर्मराजा, त्याला तेथें अप्सरेप्रमाणें एक कन्या झाली व तिला वरण्याचें मनामध्यें आणून २१ तो भृगुकुलोत्पन्न ऋचीक त्या गाधीकडे गेला असतां तो त्या तपोधनाला ह्मणाला " हे द्विजश्रेष्ठा, ज्यांचे कान काळे आहेत, ज्यांचा वर्ण पांढरा आहे व जे अत्यंत वेगवान् आहेत असे एक हजार घोडे कन्याधन ह्मणून मागून घेण्याची रीत आमच्या पूर्वजांनीं घालून ठेविलेली आहे २२,२३. त्याप्रमाणें ते घोडे मागावेत; परंतु, आपल्याजवळ कसे मागावेत ? माझ्या मनांतून आपल्यासारिख्या महात्म्यालाच

भगवान्वाच्यो दीयतामिति भार्गव । देया मे दुहिता चैव त्वद्विधाय महा-
त्मने २४ ऋचीक उवाच॥ एकतः श्यामकर्णानां पाण्डुराणां तरस्विनाम् ।
दास्याम्यश्वसहस्रं ते मम भार्या सुतास्तु ते २५ अकृतव्रण उवाच ॥ स
तथेति प्रतिज्ञाय राजन्वरुणमब्रवीत् । एकतः श्यामकर्णानां पाण्डुराणां
तरस्विनाम् २६ सहस्रं वाजिनामेकं शुल्कार्थं प्रतिदीयताम् । तस्मै प्रादा-
त्सहस्रं वै वाजिनां वरुणस्तदा २७ तदश्वतीर्थं विख्यातमुत्थिता यत्र ते
हयाः । गङ्गायां कान्यकुब्जे वै ददौ सत्यवतीं तदा २८ ततो गाधिः सुतां
चास्मै जन्याश्चासन्सुरास्तदा । लब्ध्वा हयसहस्रं तु तांश्च दृष्ट्वा दिवौ-
कसः २९ धर्मेण लब्ध्वा तां भार्यामृचीको द्विजसत्तमः । यथाकामं
यथाजोषं तया रेमे सुमध्यया ३० तं विवाहे कृते राजन्सभार्यमवलो-
ककः । आजगाम भृगुश्रेष्ठः पुत्रं दृष्ट्वा ननन्द ह ३१ भार्यापती तमासीनं
गुरुं सुरगणार्चितम् । अर्चित्वा पर्युपासीनौ प्राञ्जली तस्थतुस्तदा ३२
ततः स्नुषां स भगवान्प्रहृष्टो भृगुरब्रवीत् । वरं वृणीष्व सुभगे दाता ह्यस्मि

आपली कन्या द्यावी असें आहे २४. ऋचीक ह्मणतातः—एकसारिखे श्यामकर्ण, पांढरे व वेगानें गमन करणारे असे एक हजार घोडे मी तुला देईन; परंतु, तुझी कन्याच मला भार्येकरितां दे २५. अकृतव्रण ह्मणतातः—तदनतर " बरें आहे " असें राजानें ह्मणतांच ते वरुणाकडे गेले व " एकसारिखे श्यामकर्ण, पांढरे व वेगानें गमन करणारे असे मला एक हजार घोडे शुल्क देण्याकरितां दे " असें त्याला ह्मणाले असतां वरुणानें तत्काल त्यांना एक हजार घोडे दिले २६,२७. तदनंतर कान्यकुब्ज देशांत गंगेमध्यें ज्या ठिकाणापासून ते घोडे निघाले ते ठिकाण अश्वतीर्थ ह्मणून प्रसिद्ध झालें २८. त्या हजार अश्वांचा स्वीकार करून गाधिराजानें सत्यवती नांवाची आपली कन्या त्या ऋचीकाला दिली. त्या लग्नांत देव वरपक्षाकडचे वऱ्हाडी होऊन आले होते २९. ह्याप्रमाणें द्विजश्रेष्ठ ऋचीकाला धर्माच्या योगानें ती भार्या प्राप्त झाली असतां ते जिचा मध्यप्रदेश उत्तम आहे अशा आपल्या पत्नीसहवर्तमान यथेच्छ व मनसोक्त क्रीडा करूं लागले ३०. एकदां, हे राजा, ह्याप्रमाणें विवाह केलेल्या आपल्या पुत्राला भार्येसहवर्तमान अवलोकन करण्याकरितां श्रेष्ठ भृगुऋषि त्याच्या आश्रमांत आले व आपल्या पुत्राला पाहिल्यावर ते परम आनंदित झाले ३१. तेव्हां त्या स्त्रीपुरुषांनीं देवगणांनीं पूजन केलेल्या आपल्या गुरूंना बसलेले अवलोकन केल्यावर त्यांचें पूजन केलें व त्यांची सेवा करण्याकरितां ते उभयतां हात जोडून उभे राहिले असतां ३२ ते आनंदित झालेले भगवान् भृगुऋषि " हे स्नुषे, हे सुभगे, तूं माझ्यापासून वर प्राप्त करून घे. मी तुला जें पाहिजे

तदीप्सितम् ३३ सा वै प्रसादयामास तं गुरुं पुत्रकारणात्। आत्मन-श्चैव मातुश्च प्रसादं च चकार सः ३४ भृगुरुवाच ॥ ऋतौ त्वं चैव माता च स्नाते पुंसवनाय वै। आलिंगेतां पृथग्वृक्षौ साश्वत्थं त्वमुदुम्बरम् ३५ चरुद्वयमिदं भद्रे जनन्याश्च तवैव च। विश्वमावर्तयित्वा तु मया यत्नेन साधितम् ३६ प्राशितव्यं प्रयत्नेन ते त्युक्त्वादर्शनं गतः। आलिंगने चरौ चैव चक्रतुस्ते विपर्ययम् ३७ ततः पुनः स भगवान्काले बहुतिथे गते। दिव्यज्ञानाद्विदित्वा तु भगवानागतः पुनः ३८ अथोवाच महातेजा भृगुः सत्यवतीं स्नुषाम्। उपयुक्तश्चरुर्भद्रे वृक्षे चालिंगनं कृतम् ३९ विपरीतेन ते सुभ्रूर्मात्रा चैवासि वञ्चिता। ब्राह्मणः क्षत्रवृत्तिर्वै तव पुत्रो भविष्यति ४० क्षत्रियो ब्राह्मणाचारो मातुस्तव सुतो महान्। भविष्यति महावीर्यः साधूनां मार्गमास्थितः ४१ ततः प्रसादयामास श्वशुरं सा पुनः पुनः। न मे पुत्रो भवेदीदृक्कामं पौत्रो भवेदिति ४२ एवमस्त्विति सा तेन पाण्डव प्रतिनन्दिता। जम-

---

असेल तें देईन." असें ह्मणाले ३३. तेव्हां तिनें आपल्याला व आपल्या मातेला पुत्रसंतान व्हावें अशी प्रार्थना केल्यावरून प्रसन्न होऊन ते ह्मणाले ३४ " हे वत्से, तूं व तुझी माता अशा दोघींनीं ऋतुमती होऊन स्नान केलें असतां पुत्रप्राप्तीकरितां निरनिराळ्या ह्मणजे तूं उंबराला व तुझ्या मातेनें पिंपळाला आलिंगन करावें ३५ आणि, हे कल्याणि, मी विराटस्वरूपाची वारंवार आराधना करून व तत्पर राहून प्राप्त करून घेतलेले हे दोन चरु तूं व तुझ्या मातेनें मोठ्या आदरानें भक्षण करावें; (ह्मणजे तुमची कामना पूर्ण होईल.) " ह्याप्रमाणें सांगून ते भृगु अंतर्धान पावले व त्या दोघी स्त्रियांनीं वृक्षाला (त्यांनीं सांगितल्याप्रमाणें) आलिंगन केलें; परंतु, ते चरु घेण्यामध्यें मात्र अदलाबदल केली ३६, ३७. पुढें बराचसा काल लोटल्यानंतर भगवान् भृगूनें दिव्य ज्ञानानें तो प्रकार जाणिल्यावर ते महातेजस्वी पुन्हां आपल्या सत्यवती स्नुषेकडे आले व तिला ह्मणाले " हे कल्याणि, तूं चरूचा उपयोग करून वृक्षालाही आलिंगन दिलेंस ३८,३९; परंतु, हे उत्तम प्रकारच्या भृकुटि धारण करणारे स्त्रिये, तुझ्या मातोश्रीनें फसविल्यामुळें व (चरूच्या) अदलाबदलीमुळें आतां तुला ब्राह्मण असून क्षत्रियाची वृत्ति करणारा मुलगा होईल ४० व क्षत्रिय असून ब्राह्मणाचा आचार करणारा, सज्जनांच्या मार्गाचें अवलंबन करणारा व महावीर्यवान् असा तुझ्या मातेला मुलगा होईल " ४१. (हे ऐकतांच) त्या सत्यवतीनें स्तवनपूर्वक आपल्या श्वशुराला, " हे भार्गवन्, मला अशा प्रकारचा मुलगा न होतां माझ्या पुत्राला

दग्निं ततः पुत्रं जज्ञे सा काल आगते ४३ तेजसा वर्चसा चैव युक्तं भार्गवनन्दनम् । स वर्धमानस्तेजस्वी वेदस्याध्ययनेन च ४४ बहूनृषीन्महातेजाः पाण्डवेयात्यवर्तत । तं तु कृत्स्नो धनुर्वेदः प्रत्यगाद्भरतर्षभ । चतुर्विधानि चास्त्राणि भास्करोपमवर्चसम् ४५ [४६८५] इति श्रीमहाभारते० संहितायां वैयासिक्यामारण्यके पर्वणि तीर्थयात्रापर्वणि लोमशतीर्थयात्रायां कार्तवीर्योपाख्याने पञ्चदशाधिकशततमोऽध्यायः ॥ ११५ ॥

अकृतव्रण उवाच ॥ स वेदाध्ययने युक्तो जमदग्निर्महातपाः । तपस्तेपे ततो वेदान्नियमाद्वशमानयत् १ स प्रसेनजितं राजन्नधिगम्य नराधिपम् । रेणुकां वरयामास स च तस्मै ददौ नृपः २ रेणुकां त्वथ संप्राप्य भार्यां भार्गवनन्दनः । आश्रमस्थस्तया सार्धं तपस्तेपेऽनुकूलया ३ तस्याः कुमाराश्चत्वारो जज्ञिरे रामपञ्चमाः । सर्वेषामजघन्यस्तु राम आसीज्जघन्यजः ४ फलाहारेषु सर्वेषु गतेष्वथ सुतेषु वै । रेणुका स्नातुमगमत्कदाचिन्नियतव्रता ५ सा तु चित्ररथं नाम मार्तिकावतकं नृपम् ।

आपण असा मुलगा दिला तर चालेल" अशी वारंवार प्रार्थना केली असतां ४२, हे पांडुपुत्रा, "तथास्तु" असें ह्मणून त्यांनीं तिचें अभिनदन केलें. तदनंतर समय प्राप्त झाला असतां जमदग्नि ह्मणून तिला मुलगा झाला ४३. तो महातेजस्वी व मोठा बलवान् असून वेदाध्ययनाच्या योगानें आपलें तेज (प्रतिदिवशीं) वाढविणारा असा होता ४४. हे पांडुपुत्रा युधिष्ठिरा, त्या महातेजस्वी जमदग्नीनें (आपल्या विद्याबलानें) पुष्कळ ऋषींना मागे टाकिलें. हे भरतवंशजश्रेष्ठा, त्या सूर्यासारिख्या तेजस्वी जमदग्नीला सर्व धनुर्वेद येत असून तो चार प्रकारच्या अस्त्रांमध्येंही पारंगत होता ४५. ह्याप्रमाणें० श्रीमहाभारतांतर्गत वनपर्वांतील तीर्थयात्रापर्वापैकीं लोमशतीर्थयात्रेसंबंधीं कार्तवीर्याच्या आख्यानाविषयीं एकशें पंधरावा अध्याय समाप्त झाला ॥ ११५ ॥

अकृतव्रण सांगतातः—ह्याप्रमाणें वेदाध्ययनाचें ठिकाणीं तत्पर रहाणाऱ्या व महातपस्वी जमदग्नीनें तप करून नियमांच्या योगानें वेदांना आपल्या अधीन करून घेतलें १ आणि, हे राजा, त्यानें प्रसेनजित् नांवाच्या राजाकडे जाऊन रेणुकेला वरण्याची इच्छा त्याला प्रदर्शित केली असतां त्या राजानें त्याला ती दिली २. अशारीतीनें आपल्या मनाप्रमाणें वर्तन करणाऱ्या रेणुका भार्येला प्राप्त करून घेतल्यावर ते भार्गवपुत्र जमदग्नि आपल्या भार्येसहवर्तमान आश्रमाचे ठिकाणीं तपश्चर्या करूं लागले ३. तिला ज्यामध्यें राम पांचवा असे चार मुलगे झाले. तो राम वयानें लहान परंतु गुणानें मोठा होता ४. एकदां सर्व पुत्र फळें आणण्याकरितां बाहेर गेल्यावर नियमानें व्रत धारण करणारी

ददर्श रेणुका राजन्नागच्छन्ती यदृच्छया ६ क्रीडन्तं सलिले दृष्ट्वा सभार्यं पद्ममालिनम् । ऋद्धिमन्तं ततस्तस्य स्पृहयामास रेणुका ७ व्यभिचाराच्च तस्मात्सा क्लिन्नाम्भसि विचेतना । प्रविवेशाश्रमं त्रस्ता तां वै भर्तान्वबुध्यत ८ स तां दृष्ट्वा च्युतां धैर्याद्ब्राह्म्या लक्ष्म्या विवर्जिताम् । धिक्शब्देन महातेजा गर्हयामास वीर्यवान् ९ ततो ज्येष्ठो जामदग्न्यो रुमण्वान्नामनामतः । आजगाम सुषेणश्च वसुर्विश्वावसुस्तथा १० तानानुपूर्व्याद्भगवान्वधे मातुरचोदयत् । न च ते जातसंस्नेहाः किंचिदूचुर्विचेतसः ११ ततः शशाप तान्कोधात्ते शप्ताश्चेतनां जहुः । मृगपक्षिसधर्माणः क्षिप्रमासञ्जडोपमाः १२ ततो रामोऽभ्ययात्पश्चादाश्रमं परवीरहा । तमुवाच महाबाहुर्जमदग्निर्महातपाः १३ जहीमां मातरं पापां मा च पुत्र व्यथां कृथाः । तत आदाय परशुं रामो मातुः शिरोऽहरत् १४ ततस्तस्य महाराज जमदग्नेर्महात्मनः । कोपोऽभ्यगच्छत्सहसा प्रसन्नश्चाब्रवीदिदम् १५

ती रेणुका स्नान करण्याकरितां गेली असतां ५, हे राजा, चित्ररथ नांवाचा आर्तिकावतकेचा राजा सहज तिच्या दृष्टीं पडला ६. तो कमलांच्या माळा धारण करणारा व मोठा वैभवशाली राजा उदकाचे ठिकाणीं आपल्या भार्यांसहवर्तमान क्रीडा करीत असलेला पाहून त्या रेणुकेचें मन त्याचे ठिकाणीं गेलें ७ व त्यामुळें त्या सरोवराचे ठिकाणींच जिची योनि द्रवूं लागली आहे अशी ती रेणुका भयभीत व कावरी बावरी होऊन आपल्या आश्रमांत आली असतां (तिला पाहून) तिचें तें सर्व कृत्य पतीला समजलें ८. ह्याप्रमाणें धैर्यापासून च्युत झालेल्या व ब्राह्मलक्ष्मीनेंही रहित झालेल्या आपल्या पत्नीला अवलोकन करितांच ते वीर्यवान् व महातेजस्वी जमदग्नि " तुला धिक्कार असो " असें ह्मणाले ९. तदनंतर जमदग्नीनें आपला वडील मुलगा रुमण्वान् व सुषेण, वसु आणि विश्वावसु ह्यांना आलेले पहातांच अनुक्रमानें प्रत्येकाला " मातेचा वध कर " असे सांगितलें; परंतु, खिन्न झालेले ते मातृप्रेमामुळें कांहींएक बोलले नाहींत १०,११. तेव्हां जमदग्नीनें रागावून त्याना शाप दिला व त्यामुळें ते अचेतन झाले आणि मृग व पक्षी यांच्यासारिखे होऊन सत्वर पृथ्वीवर पडले १२. तदनंतर शत्रुपक्षीयवीरनाशक राम त्यांच्या मागून आश्रमाचे ठिकाणीं आला असतां ते महाबाहु व महातपस्वी असे जमदग्नि त्याला ह्मणाले १३ " हे पुत्रा, मनामध्यें कांहींएक न आणितां ह्या तुझ्या पापरूप मातेचा वध कर. " हें ऐकतांच रामानें परशु घेऊन आपल्या मातेचें मस्तक तोडिलें १४ व तें पाहून, हे महाराज युधिष्ठिरा, त्या जमदग्नीचा कोप शांत झाला आणि प्रसन्न होऊन ते ह्मणाले १५

ममेदं वचनात्तात कृतं ते कर्म दुष्करम् । वृणीष्व कामान्धर्मज्ञ यावतो वाञ्छसे हृदा १६ स वव्रे मातुरुत्थानमस्मृतिं च वधस्य वै । पापेन तेन चास्पर्शं भ्रातॄणां प्रकृतिं तथा १७ अप्रतिद्वन्द्वतां युद्धे दीर्घमायुश्च भारत । ददौ च सर्वान्कामांस्ताञ्जमदग्निर्महातपाः १८ कदाचित्तु तथैवास्य विनिष्क्रान्ताः सुताः प्रभो । अथानूपपतिर्वीरः कार्तवीर्योऽभ्यवर्तत १९ तमाश्रमपदं प्राप्तमृषिभार्या समार्चयत् । स युद्धमदसंमत्तो नाभ्यनन्दत्तथार्चनम् २० प्रमथ्य चाश्रमात्तस्माद्धोमधेनोस्तथा बलात् । जहार वत्सं क्रोशन्त्या बभञ्ज च महाद्रुमान् २१ आगताय च रामाय तदाचष्ट पिता स्वयम् । गां च रोरुदतीं दृष्ट्वा कोपो रामं समाविशत् २२ स मृत्युवशमापन्नं कार्तवीर्यमुपाद्रवत् । तस्याथ युधि विक्रम्य भार्गवः परवीरहा २३ चिच्छेद निशितैर्भल्लैर्बाहून्परिघसंनिभान् । सहस्रसंमितान्राजन्प्रगृह्य रुचिरं धनुः २४ अभिभूतः स रामेण संयुक्तः कालधर्मणा । अर्जुनस्याथ दायादा रामेण कृतमन्यवः २५ आश्रमस्थं

"बा रामा, माझ्या आज्ञेवरून तू हे मोठें दुष्कर कर्म केलेस. तस्मात्, हे धर्म जाणणाऱ्या रामा, माझ्यापासून तुझ्या मनाला वाटतील तितके तू वर मागून घे" १६. (हें श्रवण केल्या) नंतर, हे भरतकुलोत्पन्ना युधिष्ठिरा, त्या रामानें "मातोश्रीला व बंधूंना पुनरपि जिवंत करून मी मारल्याबद्दलचें माझ्या जननीला स्मरण नसावें व तिला मारल्याचें मला पातक न लागावें १७, त्याचप्रमाणें युद्धामध्यें मला कोणी जोड नसावा आणि मला दीर्घायुष्य असावें" असे वर मागितले व त्या महात्म्या जमदग्नीनें ते सर्व 'तथास्तु' ह्मणून दिले १८. हे धर्मराजा, ह्याप्रमाणें पुढें एके वेळीं त्याचे सर्व मुलगे बाहेर गेले असतां अनूपपति शूर कार्तवीर्य तेथें आला १९ व त्या आश्रमाचे ठिकाणीं तो प्राप्त झाला असतां ऋषिपत्नीनें त्याचें आदरातिथ्य केलें; परंतु, युद्धमदानें मत्त झालेल्या त्या राजानें त्याचा आदरपूर्वक स्वीकार न करितां २० त्या आश्रमाची धळदाण करून होमधेनूचें वासरू ती ओरडत असतां बलात्कारानें हरण केलें आणि मोठमोठालीं झाडें मोडून टाकिलीं २१. तेव्हां तें सर्व जमदग्नीनें वनांतून परत आलेल्या रामाला स्वतः सांगितलें. त्यामुळें व गाय रोदन करीत आहे असें पाहिल्यामुळें रामाला अतिशय क्रोध आला २२. तदनंतर शत्रुपक्षीयवीरनाशक भार्गवराम मृत्युवश झालेल्या कार्तवीर्य राजाकडे आला आणि हातामध्यें उज्ज्वल धनुष्य धारण करून त्यानें तीक्ष्ण बाणांनीं अडसरासारिखे असलेले त्याचे सहस्र बाहु रणांगणाचे ठिकाणीं तोडून टाकिले २३, २४. ह्याप्रमाणें भार्गवरामानें पराजित केलेला तो कार्तवीर्य मृत्यु पावला. नंतर रामावर

विना रामं जमदग्निमुपाद्रवन् । ते तं जघ्नुर्महावीर्यमयुध्यन्तं तपस्विनम् ।
असकृद्राम रामेति विक्रोशंतमनाथवत् २६ कार्तवीर्यस्य पुत्रास्तु जम-
दग्निं युधिष्ठिर । पीडयित्वा शरैर्जग्मुर्यथागतमरिन्दमाः २७ अपक्रान्तेषु
वै तेषु जमदग्नौ तथागते । समित्पाणिरुपागच्छदाश्रमं भृगुनन्दनः २८
स दृष्ट्वा पितरं वीरस्तथा मृत्युवशं गतम् । अनर्हन्तं तथाभूतं विललाप
सुदुःखितः २९ [४७१४] इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैया-
सिक्यामारण्यके पर्वणि तीर्थयात्रापर्वणि लोमशतीर्थयात्रायां कार्तवीर्यो-
पाख्याने जमदग्निवधे षोडशाधिकशततमोऽध्यायः ॥ ११६ ॥

राम उवाच ॥ ममापराधात्तैः क्षुद्रैर्हतस्त्वं तात बालिशैः । कार्तवी-
र्यस्य दायादैर्वने मृग इवेषुभिः १ धर्मज्ञस्य कथं तात वर्तमानस्य सत्पथे ।
मृत्युरेवंविधो युक्तः सर्वभूतेष्वनागसः २ किं नु तैर्न कृतं पापं यैर्भवांस्त-
पसि स्थितः । अयुध्यमानो वृद्धः सन्हतः शरशतैः शितैः ३ किं नु ते
तत्र वक्ष्यन्ति सचिवेषु सुहृत्सु च । अयुध्यमानं धर्मज्ञमेकं हत्वानपत्रपाः ४

रुष्ट झालेले २५ अर्जुनाचे पुत्र भार्गवराम आश्रमांत नाहा अशी संधि साधून जमद-
ग्नीच्या आश्रमांत आले व त्या महापराक्रमी परंतु, युद्ध न करणाऱ्या तपस्वी मुनीला
मारूं लागले असतां तो अनाथाप्रमाणें वारंवार "हे रामा, हे रामा, " असा आक्रोश
करूं लागला २६. सारांश, हे युधिष्ठिरा, त्या कार्तवीर्याच्या पुत्रांनीं जमदग्नीचा बाणाच्या
योगानें वध केला आणि जसे आले होते तसे निघून गेले २७. ह्याप्रमाणें जमदग्नीला
मारून टाकून ते निघून गेल्यावर तो भृगुनंदन राम समिधा घेऊन आपल्या आश्रमामध्यें
आला २८ आणि मृत्यु पावण्याला योग्य नसलेल्या आपल्या पित्याला मृत झालेला पाहून
तो वीर राम दुःखानें विलाप करूं लागला २९ ह्याप्रमाणें महामुनिव्यासप्रणीत लक्षग्रं-
थात्मक ० वनपर्वांतील तीर्थयात्रापर्वापैकीं लोमशतीर्थयात्रेसंबंधीं कार्तवीर्योपाख्यानांतील
जमदग्नीच्या वधाविषयीं एकशें सोळावा अध्याय समाप्त झाला ॥ ११६ ॥

राम ह्मणाला:— हे तात, माझ्या अपराधामुळें त्या अधम व मूर्ख कार्तवीर्याच्या
पुत्रांनीं वनांमध्यें बाण मारून मृग जसा मारावा त्याप्रमाणें तुझा वध केला १. हे तात,
सर्व प्राण्यांवर दया करणाऱ्या, चांगल्या मार्गाचें अवलंबन करणाऱ्या व धर्म जाणणाऱ्या
तुला असा कसा मृत्यु आला ? २. ज्याअर्थी कार्तवीर्याच्या पुत्रांनीं युद्ध न करणाऱ्या,
वृद्ध व तप करीत असलेल्या तुला तीक्ष्ण बाणांनीं मारून टाकिलें त्याअर्थी त्यांनीं
कोणतें बरें पातक केलें नाहीं ? ३ अरे, ते निर्लज्ज अर्जुनपुत्र युद्ध न करणाऱ्या, धर्मज्ञ
व एकाकी अशा तुला मारून आपल्या सुहृदांना व सचिवांना जाऊन काय सांगतील

लालप्यैवं सकरुणं बहु नानाविधं नृप । प्रेतकार्याणि सर्वाणि पितुश्चक्रे महातपाः ५ ददाह पितरं चाग्नौ रामः परपुरंजयः । प्रतिजज्ञे वधं चापि सर्वक्षत्रस्य भारत ६ संक्रुद्धोतिबलः संख्ये शस्त्रमादाय वीर्यवान् । जघ्निवान्कार्तवीर्यस्य सुतानेकोंतकोपमः ७ तेषां चानुगता ये च क्षत्रियाः क्षत्रियर्षभ । तांश्च सर्वानथामृद्नाद्रामः प्रहरतां वरः ८ त्रिःसप्तकृत्वः पृथिवीं कृत्वा निःक्षत्रियां प्रभुः । समंतपञ्चके पञ्च चकार रुधिरह्रदान् ९ स तेषु तर्पयामास भृगून्भृगुकुलोद्वहः । साक्षाद्ददर्श चर्चीकं स च रामं न्यवारयत् १० ततो यज्ञेन महता जामदग्न्यः प्रतापवान् । तर्पयामास देवेन्द्रमृत्विग्भ्यः प्रददौ महीम् ११ वेदीं चाप्यददद्धैमीं कश्यपाय महात्मने । दश व्यामायतां कृत्वा नवोत्सेधां विशांपते १२ तां कश्यपस्यानुमते ब्राह्मणाः खण्डशस्तदा । व्यभजंस्ते तदा राजन्प्रख्याताः खाण्डवायनाः १३ स प्रदाय महीं तस्मै कश्यपाय महात्मने । अस्मिन्महेन्द्रे शैलेन्द्रे वसत्यमितविक्रमः १४ एवं वैरमभूत्तस्य क्षत्रियैर्लोक-

---

बरें ? ४. ह्याप्रमाणें नानाप्रकारांनीं करुणा येण्यासारिखा विलाप केल्यावर त्या महात्म्या रामानें आपल्या पित्याचा और्ध्वदेहिक संस्कार केला ५ व, हे भरतकुलोत्पन्ना धर्मराजा, त्याचें दहन करून शत्रूंच्या नगराला जिंकणाऱ्या त्या रामानें सर्व क्षत्रियांच्या वधाविषयीं प्रतिज्ञा केली ६. नंतर प्रथमतः महाबलाढ्य व वीर्यवान् रामानें क्रोधावेशानें युक्त होऊन शस्त्र धरिलें आणि प्रत्यक्ष यमच कीं काय अशा रीतीनें त्या कार्तवीर्यपुत्रांचा वध केला ७ आणि, हे क्षत्रियश्रेष्ठा, नंतर प्रहार करणाऱ्यांमध्यें श्रेष्ठ अशा रामानें त्यांच्या अनुयायी अशा सर्व क्षत्रियांचाही नायनाट केला ८. ह्याप्रमाणें प्रभु रामचंद्रानें एकवीस वेळां पृथ्वी निःक्षत्रिय करून समंतपंचकाचे ठिकाणीं रक्ताचे पांच डोह केले ९ व त्या भृगुकुलश्रेष्ठानें त्या डोहाचे ठिकाणीं आपल्या पूर्वजांचें तर्पण केलें. तेव्हां ऋचीक प्रत्यक्ष रामाच्या दृष्टीं पडले व " तूं असें करूं नकोस " म्हणून त्याचें निवारण केलें १०. तदनंतर प्रतापी जमदग्निपुत्र रामानें मोठा यज्ञ करून देवेंद्राला तृप्त केलें आणि ऋत्विजांना पृथ्वीचें दान केलें ११. हे राजा, त्याचप्रमाणें चाळीस हात रुंद व छत्तीस हात उंच अशी सुवर्णमय वेदी करून ती महात्म्या कश्यपमुनीला त्यानें दान दिली १२. तेव्हां ब्राह्मणांनीं कश्यपाच्याच संमतीनें त्या वेदीचे तुकडे केले व ते आपण वाटून घेतल्यामुळें ते ब्राह्मण खांडवायन म्हणून प्रसिद्ध झाले १३. सारांश, ह्याप्रमाणें त्या महात्म्या कश्यपाला पृथ्वीचें दान करून तो अतुलपराक्रमी राम ह्या पर्वतश्रेष्ठ महेंद्राचे ठिकाणीं राहु

वासिभिः । पृथिवी चापि विजिता रामेणामिततेजसा १५ वैशम्पायन उवाच ॥ ततश्चतुर्दश्यां रामः समयेन महामनाः । दर्शयामास तान्विप्रान्धर्मराजं च सानुजम् १६ स तमानर्च राजेन्द्र भ्रातृभिः सहितः प्रभुः । द्विजानां च परां पूजां चक्रे नृपतिसत्तमः १७ अर्चयित्वा जामदग्न्यं स पूजितस्तेन चोदितः । महेन्द्र उष्य तां रात्रिं प्रययौ दक्षिणामुखः १८ [४७३२] इति श्रीमहाभारते० आरण्यके पर्वणि तीर्थयात्रापर्वणि लोमशतीर्थयात्रायां कार्तवीर्योपाख्याने सप्तदशाधिकशततमोऽध्यायः ॥ ११७ ॥

वैशम्पायन उवाच ॥ गच्छन्स तीर्थानि महानुभावः पुण्यानि रम्याणि ददर्श राजा । सर्वाणि विप्रैरुपशोभितानि क्वचित्क्वचिद्भारत सागरस्य १ स वृत्तवांस्तेषु कृताभिषेकः सहानुजः पार्थिवपुत्रपौत्रः । समुद्रगां पुण्यतमां प्रशस्तां जगाम पारिक्षित पाण्डुपुत्रः २ तत्रापि चाप्लुत्य महानुभावः संतर्पयामास पितॄन्सुरांश्च । द्विजातिमुख्येषु धनं विसृज्य गोदावरीं सागरगामगच्छत् ३ ततो विपाप्मा द्राविडेषु राजन्समुद्रमासाद्य च

लागला १४. अशारीतीने पृथ्वीतलाचे ठिकाणी वास्तव्य करणाऱ्या क्षत्रियांचें व रामाचें वैर पडलें आणि शेवटीं त्या महातेजस्वी रामानें ही पृथ्वी जिंकिली १५. वैशंपायन सांगतातः— तदनंतर ठरल्याप्रमाणें चतुर्दशीचे दिवशीं तो महात्मा रामचंद्र कनिष्ठ भ्रात्यांसहवर्तमान स्थित असलेल्या धर्मराजाला व त्या ब्राह्मणांना येऊन भेटला १६. तेव्हां, हे नृपश्रेष्ठा जनमेजया, त्या राजाधिराज धर्मराजानें आपल्या बंधूंसहवर्तमान त्या रामाचें व इतर द्विजांचें आदरपूर्वक पूजन केलें १७. ह्याप्रमाणें जमदग्निपुत्र रामाचें पूजन केल्यावर त्याच्याच सांगण्यावरून धर्मराजानें ती रात्र महेंद्र पर्वतावर घालविली व नंतर तो दक्षिणदिशेकडे तोंड करून निघाला १८. ह्याप्रमाणें महामुनिव्यासप्रणीत लक्षग्रंथात्मक ० वनपर्वांतील तीर्थयात्रापर्वांपैकीं लोमशतीर्थयात्रेसंबंधीं कार्तवीर्योपाख्यानाविषयीं एकशें सतरावा अध्याय समाप्त झाला ॥ ११७ ॥

वैशंपायन सांगतातः— हे भरतकुलोत्पन्ना जनमेजया, तदनंतर तो महाविचारी धर्मराज पुण्यकारक, रम्य व श्रेष्ठ कोठें कोठें ब्राह्मणांनी सुशोभित अशीं सागरसंबंधीं तीर्थें पहात पहात निघाला असतां १ त्या चांगलें आचरण करणाऱ्या व कश्यपपुत्र सूर्याचा नातू असलेल्या युधिष्ठिरानें, हे परीक्षित पुत्रा जनमेजया, आपल्या बंधूंसहवर्तमान तीर्थामध्यें स्नानें केलीं व नंतर पुण्यकारक व समुद्राला मिळणाऱ्या अशा प्रशस्त नदीकडे तो आला २. तेथें येतांक्षणीं त्यानें त्या नदीचें स्नान करून देव व पितर ह्यांचें तर्पण केलें आणि श्रेष्ठ श्रेष्ठ ब्राह्मणांना द्रव्य देऊन समुद्राला मिळणाऱ्या

लोकपुण्यम् । अगस्त्यतीर्थं च महापवित्रं नारीतीर्थान्यथ वीरो ददर्श ४
तत्रार्जुनस्याग्र्यधनुर्धरस्य निशम्य तत्कर्म परैरशक्यम् । संपूज्यमानः पर-
मर्षिसंघैः परां मुदं पाण्डुसुतः स लेभे ५ स तेषु तीर्थेष्वभिषिक्तगात्रः
कृष्णासहायः सहितोऽनुजैश्च । संपूजयन्विक्रममर्जुनस्य रेमे महीपाल पतिः
पृथिव्याः ६ ततः सहस्राणि गवां प्रदाय तीर्थेषु तेष्वम्बुधरोत्तमस्य ।
हृष्टः सह भ्रातृभिरर्जुनस्य संकीर्तयामास गवां प्रदानम् ७ स तानि
तीर्थानि च सागरस्य पुण्यानि चान्यानि बहूनि राजन् । क्रमेण गच्छ-
न्परिपूर्णकामः शूर्पारकं पुण्यतमं ददर्श ८ तत्रोदधेः कंचिदतीत्य देशं ख्यातं
पृथिव्यां वनमाससाद । तप्तं सुरैरत्र तपः पुरस्तादिष्टं तथा पुण्यपरैर्न-
रेन्द्रैः ९ स तत्र तामग्र्यधनुर्धरस्य वेदीं ददर्शायतपीनबाहुः । ऋचीकपु-
त्रस्य तपस्विसंघैः समावृतां पुण्यकृदर्चनीयाम् १० ततो वसूनां वसुधा-
धिपः स मरुद्गणानां च तथाश्विनोश्च । वैवस्वतादित्यधनेश्वराणामि-

गोदावरीला येऊन पोहोंचला ३. तदनंतर तो निष्पाप धर्मराजा द्रविडदेशामध्यें समुद्र-तटाकाला आला व तेथें लोकांना पवित्र करणारें असें अगस्त्यतीर्थ व नारीतीर्थ[1] त्यानें अवलोकन केलें ४. त्या ठिकाणीं धनुष्य धारण करणाऱ्यांमध्यें श्रेष्ठ अशा अर्जुनाचें इतरांस करण्याला अशक्य असें तें कर्म श्रवण केल्यावर ऋषिश्रेष्ठांनीं संमान दिलेला तो पांडुपुत्र धर्मराजा परम आनंदित झाला ५. हे भूपते जनमेजया, त्या पृथ्वीपतीनें त्या तीर्थामध्यें द्रौपदीसहवर्तमान व आपल्या कनिष्ठ भ्रात्यांसहवर्तमान स्नान केल्यावर त्या अर्जुनाच्या पराक्रमाचें अभिनंदन केलें आणि आनंदानें तो कालक्रमणा करूं लागला ६. तदनंतर त्या समुद्रसंबंधीं तीर्थांचे ठिकाणीं हजारों गाई देऊन आनंदित झालेला धर्मराज, भ्रात्यांसहवर्तमान कार्तवीर्याच्या गोप्रदानाविषयीं बोलूं लागला ७. हे राजा, ह्याप्रमाणें क्रमाक्रमानें पुण्यकारक व दुसरीही पुष्कळ तीर्थें करीत फरीत संचार करणारा व ज्याचे मनोरथ पूर्ण झाले आहेत असा तो धर्मराजा अत्यंत पुण्यकारक अशा शूर्पारक नांवाच्या तीर्थाला येऊन पोंचला ८. त्या ठिकाणीं पृथ्वीवर विख्यात असलेल्या समुद्राच्या प्रदेशावर कांहीं वेळ संचार करून नंतर ज्या वनामध्यें देवांनीं व पुण्येच्छु नरश्रेष्ठांनीं पूर्वी तप व यज्ञ केले होते त्या वनामध्यें तो धर्मराज प्रविष्ट झाला ९. तेथें त्या आजानुबाहु धर्मराजानें धनुष्य धारण करणाऱ्यांमध्यें श्रेष्ठ अशा ऋचीक पुत्राची पुण्यकरणाऱ्यांनीं पूजा करण्यास योग्य असलेली व तपस्वीसमुदायांनीं परिवेष्टित असलेली वेदी अवलोकन केली १०. तदनंतर वसु, मरुद्गण, अश्विनीकुमार,

[1] या तीर्थाला नारीतीर्थ ह्मणण्याचें कारण पूर्वी त्या ठिकाणीं पांच अप्सरा मुनिशापामुळें सुसरीचीं रूपें प्राप्त झालीं व अर्जुनानें त्यांना मुक्त केलें.

न्द्रस्य विष्णोः सवितुर्विभोश्च ११ भवस्य चन्द्रस्य दिवाकरस्य पतेरपां
साध्यगणस्य चैव । धातुः पितृणां च तथा महात्मा रुद्रस्य राजन्सग-
णस्य चैव १२ सरस्वत्याः सिद्धगणस्य चैव पुण्याश्च ये चाप्यमरा-
स्तथान्ये । पुण्यानि चाप्यायतनानि तेषां ददर्श राजा सुमनोहराणि १३
तेषूपवासान्विबुधानुपोष्य दत्वा च रत्नानि महान्ति राजा । तीर्थेषु
सर्वेषु परिप्लुताङ्गः पुनः स शूर्पारकमाजगाम १४ स तेन तीर्थेन तु
सागरस्य पुनः प्रयातः सह सोदरीयैः । द्विजैः पृथिव्यां प्रथितं महद्भि-
स्तीर्थं प्रभासं समुपाजगाम १५ तत्राभिषिक्तः पृथुलोहिताक्षः सहानुजै-
र्देवगणान्पितॄंश्च । संतर्पयामास तथैव कृष्णा ते चापि विप्राः सह लोम-
शेन १६ स द्वादशाहं जलवायुभक्षः कुर्वन्क्षपाहःसु तदाभिषेकम् ।
समंततोऽग्नीनुपदीपयित्वा तेपे तपो धर्मभृतां वरिष्ठः १७ तमुग्रमास्थाय
तपश्चरन्तं शुश्राव रामश्च जनार्दनश्च । तौ सर्ववृष्णिप्रवरौ ससैन्यौ
युधिष्ठिरं जग्मतुराजमीढम् १८ ते वृष्णयः पाण्डुसुतान्समीक्ष्य भूमौ
शयानान्मलदिग्धगात्रान् । अनर्हतीं द्रौपदीं चापि दृष्ट्वा सुदुःखिताश्चुक्रु-

---

वैवस्वत, आदित्य, कुबेर, इंद्र, विष्णु, सविता, विभू ११, भव, चंद्र, दिवाकर, उद-कांचा पति वरुण, साध्यगण, धाता, पार्षदगणासहवर्तमान महात्मा रुद्र १२, सरस्वती आणि सिद्धसमूह ह्यांचीं व इतरही पुण्यात्म्या देवांचीं पवित्र आणि मनोहर अशीं तीर्थें त्या पृथ्वीपति धर्मराजानें अवलोकन केलीं १३ व त्या सर्व तीर्थांमध्यें स्नानें करून उपोषणें केल्यावर त्या धर्मराजानें विद्वान् ब्राह्मणांना मूल्यवान् वस्त्रें व रत्नें दिलीं आणि पुनरपि तो राजा शूर्पारकाला आला १४. ह्याप्रमाणें आपल्या सख्या बंधूंसहवर्तमान व ब्राह्मणांसहवर्तमान समुद्राच्या काठावरचीं तीर्थें करीत करीत तो धर्मराज पृथ्वीवर प्रसिद्ध असलेल्या प्रभास तीर्थाला येऊन पोंचला असतां १५ त्या मोठमोठे व अरक्तवर्ण नेत्र असलेल्या धर्मराजानें द्रौपदी व कनिष्ठ भ्राते ह्यांसहवर्तमान तेथें स्नान केल्यावर पितर व देवगण ह्यांचें तर्पण केलें व त्याचप्रमाणें लोमशासहवर्तमान ब्राह्मणांनींही केलें १६. त्या ठिकाणीं धर्मानें वागणाऱ्यांमध्यें श्रेष्ठ अशा धर्मराजानें सकाळसंध्याकाळ स्नान करण्याचें ठरविल्यावर आपल्या भोंवतीं अग्नि प्रदीप्त करून वायु व जलभक्षण करूनच बारा दिवस तपश्चर्या करण्याचा निश्चय केला १७. ह्याप्रमाणें धर्मराज उग्र तपश्चर्या करीत आहे असें सर्व यादवश्रेष्ठ राम व जनार्दन ह्यांनीं श्रवण करितांक्षणीं ते उभयतां सैन्यासहवर्तमान युधिष्ठिराकडे आले १८ व भूमीवर निजणाऱ्या आणि मळानें सर्वांग भरलेल्या पांडुपुत्रांना व त्याचप्रमाणें त्या स्थितीला योग्य नसलेल्या द्रौपदीला अवलोकन केल्या-

शुरार्तनादम् १९ ततः स रामं च जनार्दनं च कार्ष्णिं च सांबं च शिनेश्च पौत्रम् । अन्यांश्च वृष्णीनुपगम्य पूजां चक्रे यथा धर्ममहीनसत्वः २० ते चापि सर्वान्प्रतिपूज्य पार्थास्तैः सत्कृताः पाण्डुसुतैस्तथैव । युधिष्ठिरं संपरिवार्य राजन्नुपाविशन्देवगणा यथेन्द्रम् २१ तेषां स सर्वं चरितं परेषां वने च वासं परमप्रतीतः । अस्त्रार्थमिन्द्रस्य गतं च पार्थं निवेशनं हृष्टमनाः शशंस २२ श्रुत्वा तु ते तस्य वचः प्रतीतास्तांश्चापि दृष्ट्वा सुकृशानतीव । नेत्रोद्भवं संमुमुचुर्महार्हा दुःखार्तिजं वारि महानुभावाः २३ [४७५५] इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यामारण्यके पर्वणि तीर्थयात्रापर्वणि लोमशतीर्थयात्रायां प्रभासे यादवपाण्डवसमागमेऽष्टादशाधिकशततमोऽध्यायः ॥ ११८ ॥

जनमेजय उवाच ॥ प्रभासतीर्थमासाद्य पाण्डवा वृष्णयस्तथा । किमकुर्वन्कथाश्चैषां कास्तत्रासंस्तपोधन १ ते हि सर्वे महात्मानः सर्वशास्त्रविशारदाः । वृष्णयः पाण्डवाश्चैव सुहृदश्च परस्परम् २ वैशम्पायन उवाच ॥ प्रभासतीर्थं संप्राप्य पुण्यं तीर्थं महोदधेः । वृष्णयः पाण्डवान्वीराः परिवार्योपतस्थिरे ३ ततो गोक्षीरकुन्देन्दुमृणालरजतप्रभः ।

वर दुःखित झालेले ते यादव दीर्घस्वरानें रडूं लागले १९. तदनंतर धैर्य न सुटलेल्या धर्मराजानें राम, जनार्दन, प्रद्युम्न, सांब व शिनीचा नातू ह्यांचें व दुसऱ्याही यादवांचें विधिपूर्वक पूजन केलें २०. तेव्हां त्या यादवांनीं त्याचप्रमाणें उलट पांडुपुत्रांना मान देऊन ज्याप्रमाणें देव इंद्राच्या सभोंवतीं बसतात त्याप्रमाणें पांडुपुत्रांनीं सत्कार केलेले ते धर्मराजाला मध्यें घालून त्याच्या सभोंवतीं बसले २१. तेव्हां आनंदित झालेल्या धर्मराजानें त्यांना आपल्या शत्रूंचें चरित्र, आपलें वनामध्यें वास्तव्य व अस्त्राकरितां अर्जुनाचें इंद्राच्या घरीं जाणें वगैरे गोष्टी कथन केल्या २२ व त्या गोष्टी त्या महात्म्यांनीं श्रवण केल्यावर ते पांडुपुत्र अत्यंत कृश झालेले पाहून दुःखसंबंधीं पीडेनें व्याकुळ झाल्यामुळें त्यांच्या नेत्रांतून अश्रूंच्या धारा वाहूं लागल्या २३. ह्याप्रमाणें महामुनि व्यासप्रणीत० वनपर्वांतील तीर्थयात्रापर्वापैकीं लोमशतीर्थयात्रेसंबंधीं प्रभासक्षेत्रीं यादवपांडवांच्या समागमाविषयीं एकशें अठरावा अध्याय समाप्त झाला ॥ ११८ ॥

जनमेजय म्हणतोः—हे तपोधन वैशंपायना, ते वृष्णि व पांडव प्रभास तीर्थाला आल्यावर त्यांनीं पुढें काय केलें व ते कोणत्या गोष्टी बोलूं लागले ? १. ते महात्मे वृष्णि व पांडव सर्व शास्त्रांत पारंगत असून परस्परांवर अतिशय प्रेम करणारे होते २. वैशंपायन सांगतातः—हे जनमेजया, महोदधिसंबंधीं पुण्यकारक प्रभास तीर्थाचे ठिकाणीं

वनमाली हली रामो बभाषे पुष्करेक्षणम्॥४॥ बलदेव उवाच॥ न कृष्ण धर्मश्चरितो भवाय जंतोरधर्मश्च पराभवाय। युधिष्ठिरो यत्र जटी महात्मा वनाश्रयः क्लिश्यति चीरवासाः ५ दुर्योधनश्चापि महीं प्रशास्ति न चास्य भूमिर्विवरं ददाति। धर्मादधर्मश्चरितो गरीयानितीव मन्येत नरोल्पबुद्धिः ६ दुर्योधने चापि विवर्धमाने युधिष्ठिरे चासुखमात्तराज्ये। किं त्वत्र कर्तव्यमिति प्रजाभिः शंका मिथः संजनिता नराणाम् ७ अयं स धर्मप्रभवो नरेन्द्रो धर्मे धृतः सत्यधृतिः प्रदाता। चलेद्धि राज्याच्च सुखाच्च पार्थो धर्मादपेतस्तु कथं विवर्धेत् ८ कथं नु भीष्मश्च कृपश्च विप्रो द्रोणश्च राजा च कुलस्य वृद्धः। प्रव्राज्य पार्थान्सुखमाप्नुवन्ति धिक्पापबुद्धीन्भरतप्रधानान् ९ किं नाम वक्ष्यत्यवनिप्रधानः पितॄन्समागम्य परत्र पापः। पुत्रेषु सम्यक्चरितं मयेति पुत्रानपापान्व्यपरोप्य राज्यात् १० नासौ धिया संप्रतिपश्यति स्म किं नाम कृत्वा-

---

आल्यावर ते शूर वृष्णि पांडवाना गराडा घालून बसले असतां ३ गाईचे दूध, कुंदाचीं फुलें, चंद्र, मृणाल (कमलाचा देंठ) व रुपें ह्यांच्यासारिखा गौरवर्ण, वनसंबंधीं पुष्पांच्या माळा धारण केलेला व नांगररूप आयुध हातांत घेतलेला असा बलराम कमलपत्राक्ष श्रीकृष्णाला ह्मणाला ४ "ज्याअर्थी युधिष्ठिरासारिख्या महात्म्याला वल्कल व जटा धारण करून वनाचा आश्रय केल्यामुळें क्लेश सोसावे लागत आहेत त्याअर्थी, हे श्रीकृष्णा, मनुष्यानें धर्माचरण केलें असतां त्याचा अभ्युदय होतो व अधर्माचरण केलें असतां त्याचा नाश होतो असें आतां ह्मणतां येत नाहीं ५. कारण, दुर्योधन पृथ्वीचें (अधर्मानें खुशाल) पालन करीत आहे व ती त्याला गिळून टाकीत नाहीं. ह्यावरून अल्पबुद्धि पुरुषाला धर्माचरणापेक्षां अधर्माचरणच जास्त श्रेयस्कर आहे असें वाटूं लागलें आहे ६ आणि दुर्योधनाचा अभ्युदय व राज्यापासून भ्रष्ट झालेल्या धर्मराजाचा वनवास ह्या दोन गोष्टी अवलोकन करून प्रजाजनांस आतां काय करावें अशी मोठी शंका येऊन पडली आहे ७. कारण, धर्मापासून उत्पन्न झालेल्या, सत्यप्रतिज्ञ, दानशूर व धर्माचरण करणाऱ्या नरश्रेष्ठ युधिष्ठिरानें राज्य व सुख ह्यांपासून च्युत व्हावें व अधर्माचरण करणाऱ्यानें अभ्युदयाला चढावें! ८. असो. कुंतीपुत्रांना राज्यांतून हांकून देऊन ज्याअर्थी भीष्म, कृप, ब्राह्मण द्रोण, व वृद्ध धृतराष्ट्र हे मोठ्या आनंदानें रहात आहेत त्याअर्थी त्या भरतवंशजश्रेष्ठ पापबुद्धींना धिक्कार असो ९. आपल्या पापरहित पुत्रांना राज्यभ्रष्ट करून हा धृतराष्ट्र परलोकाचे ठिकाणीं गेल्यावर पितरांनीं विचारिलें असतां "मी

ह्मचक्षुरेवम् । जातः पृथिव्यामिति पार्थिवेषु प्रव्राज्य कौन्तेयमिति स्म राज्यात् ११ नूनं समृद्धान्पितृलोकभूमौ चामीकराभान्क्षितिजान्प्रफुल्लान् । विचित्रवीर्यस्य सुतः सपुत्रः कृत्वा नृशंसं बत पश्यति स्म १२ व्यूढोत्तरांसान्पृथुलोहिताक्षानिमान्स्म पृच्छन्स शृणाति नूनं । प्रास्थापयत्स वनं सशंको युधिष्ठिरं सानुजमात्तशस्त्रम् १३ योयं परेषां पृतनां समृद्धां निरायुधो दीर्घभुजो निहन्यात् । श्रुत्वैव शब्दं हि वृकोदरस्य मुञ्चति सैन्यानि शकृत्समूत्रम् १४ स क्षुत्पिपासाध्वकृशस्तरस्वी समेत्य नानायुधबाणपाणिः । वने स्मरन्वासमिमं सुघोरं शेषं न कुर्यादिति निश्चितं मे १५ न ह्यस्य वीर्येण बलेन कश्चित्समः पृथिव्यामपि विद्यतेन्यः । स शीतवातातपकर्शिताङ्गो न शेषमाजावसुहृत्सु कुर्यात् १६ प्राच्यां

पुत्रांशीं चांगलें वर्तन केले " असेंच ह्मणेल काय ! १०. ह्या पृथ्वीतलाचे ठिकाणीं सर्व राजांमध्यें कोणत्या कर्मानें मी आंधळा झालों आहें व आतां पुन्हां कुंतीपुत्र धर्मराजाला वनांत पाठवून मला कोणती (निकृष्ट) स्थिति प्राप्त होईल हें अद्याप ह्याच्या मनांत येऊं नये कां ! ११. खरोखर असलें हें घोर कर्म केल्यामुळें विचित्रवीर्याचा मुलगा धृतराष्ट्र आपल्या पुत्रांसहवर्तमान स्मशानभूमीचे ठिकाणीं सुवर्णासारिखे पिंवळें दिसणारे आणि पुष्पांनीं व फलांनीं भरलेले असे वृक्ष अवलोकन करील. (ह्मणजे पुत्रांसहवर्तमान त्याचा नाश होईल) १२. हे कृष्णा, ज्याअर्थी धृतराष्ट्रानें आरक्तवर्ण व विशाल असे नेत्र आणि भव्य स्कंध ह्यानीं युक्त असलेल्या भिष्मादिकांच्या संमतीनेंच बंधूंसहवर्तमान हातांमध्यें शस्त्र घेतलेल्या युधिष्ठिराला निःशंकमनानें वनांत पाठविले त्याअर्थी तो धृतराष्ट्र त्यांचा नाश करीत आहे (असें मला वाटतें) १३. ज्या वृकोदराचा शब्द श्रवण करितांक्षणीं शत्रूच्या सैन्याची गाळण होऊन तें गांगरून जातें व जो आजानुबाहु भीमसेन हातांत कांहीं एक आयुध न घेतां शत्रुपक्षीय वीरांचा नायनाट करितो १४ तो क्षुधा, तृषा व मार्गसंबंधीं श्रम ह्यांनीं कृश झालेला महावेगवान् भीमसेन आपल्या हातांमध्यें नानाप्रकारचीं आयुधें व बाण धारण करून ह्या घोर वनवासानें त्रस्त झाल्यामुळें त्या धृतराष्ट्राला निःसंशय निश्शेष करून टाकील असें मला वाटतें १५. खरोखर भूतलावर ह्याच्यासारिखा बलानें व पराक्रमानें दुसरा कोणीही नाहीं. थंडी, वारा व उष्णता ह्यांनीं कृश झाल्यामुळें संतप्त होऊन रणां-

१ स्वप्नाध्यायांत असें सांगितलें आहे की, ज्या मनुष्याला झाडें हिरवीं न दिसतां सोन्यासारखीं पिवळीं दिसतात त्याचा मृत्यु संनिध आला आहे व तीच गोष्ट ह्या श्लोकांत बलरामानें कृष्णास धृतराष्ट्राच्या संबधानें सांगितली आहे.

नृपानेकरथेन जित्वा वृकोदरः सानुचरान्रणेषु । स्वस्त्यागमद्योतिरथस्तरस्वी सोयं वने क्लिश्यति चीरवासाः १७ यः सिंधुकूले व्यजयन्नृदेवान्समागतान्दाक्षिणात्यान्महीपान् । तं पश्यतेमं सहदेवमद्य तरस्विनं तापसवेषरूपम् १८ यः पार्थिवानेकरथेन जिग्ये दिशं प्रतीचीं प्रति युद्धशौण्डः । सोयं वने मूलफलेन जीवञ्जटी चरत्यद्य मलाचिताङ्गः १९ सत्रे समृद्धेतिरथस्य राज्ञो वेदीतलादुत्पतिता सुता या । सेयं वने वासमिमं सुदुःखं कथं सहत्यद्य सती सुखार्हा २० त्रिवर्गमुख्यस्य समीरणस्य देवेश्वरस्याप्यथवाश्विनोश्च । एषां सुराणां तनयाः कथं नु वनेचरन्त्यस्तसुखाः सुखार्हाः २१ जिते हि धर्मस्य सुते सभार्ये सभ्रातृके सानुचरे निरस्ते । दुर्योधने चापि विवर्धमाने कथं न सीदत्यवनिः सशैला २२ [४७७७] इति श्रीमहाभारते ०मारण्यके पर्वणि तीर्थयात्रापर्वणि लोमशतीर्थयात्रायां बलरामवाक्य ऊनविंशाधिकशततमोऽध्यायः ॥ ११९ ॥

गणाचे ठिकाणीं आपल्या शत्रूचें हा बीजही ठेवणार नाहीं १६. पूर्व दिशेला गेल्यावर ज्यानें एकट्या रथाच्याच साहाय्यानें रणांगणाचे ठिकाणीं अनुयायांसहवर्तमान राजांना जिंकिलें आणि जो पुनरपि मोठ्या वेगानें खशाल परत आला त्यानेंच या वनाचे ठिकाणीं वल्कलें परिधान करून क्लेश सोसावे नां! अरेरे! १७. ज्यानें समुद्रतटाकाचे ठिकाणीं प्राप्त झालेल्या दक्षिणेंतील भूपातींना जिंकून टाकिलें तोच हा वेगवान् सहदेव तापसवेष धारण करून ह्या वनामध्यें आलेला तुह्मी अवलोकन करा! १८. युद्धामध्यें निपुण असलेल्या ज्या नकुलानें पश्चिम दिशेकडे जाऊन केवळ रथाच्याच साहाय्यानें राजांना आपल्या स्वाधीन करून घेतलें तोच अंगावर मळ सांचलेला व जटा धारण केलेला हा नकुल फलमूलांवर उपजीविका करून येथें वास्तव्य करीत आहे! १९. अतिरथि द्रुपद राजाच्या समृद्ध यज्ञामध्यें जी अग्निकुंडांतून उत्पन्न झाली व जी सुख भोगण्यासच योग्य आहे त्या ह्या पतिव्रता द्रौपदीनें ह्या वनसंबंधीं दुःखांचें कसें सहन करावें! २०. त्याचप्रमाणें धर्म, अर्थ व काम ह्यां (पुरुषार्थां) पैकीं मुख्य असलेला धर्म, वायु, इंद्र व अश्विनीकुमार ह्यांच्या पुत्रांनी सुखाला योग्य असतां वनांत भटकून त्यांतील दुःख कशीं सहन करावीत! २१. सारांश, भार्यासहवर्तमान धर्मपुत्र युधिष्ठिराला जिंकून व भ्राते आणि अनुयायी ह्यांसहवर्तमान त्याला वनांत हांकून देऊन दुर्योधनाचा अभ्युदय होत असतां पर्वतासहवर्तमान ही पृथ्वी खिन्न कशी होत नाहीं! २२. ह्याप्रमाणें महामुनिव्यासप्रणीत लक्षग्रंथात्मक श्रीमहाभारतांतर्गत वनपर्वांतील तीर्थयात्रापर्वापैकीं लोमशतीर्थयात्रेसंबंधीं बलरामाच्या भाषणाविषयीं एकशें एकुणविसावा अध्याय समाप्त झाला ॥ ११९ ॥

सात्यकिरुवाच ॥ न राम कालः परिदेवनाय यदुत्तरं तत्र तदेव
सर्वे । समाचरामो ह्यनतीतकालं युधिष्ठिरो यद्यपि नाह किंचित् १
ये नाथवन्तोद्य भवन्ति लोके ते नात्मना कर्म समारभन्ते । तेषां तु
कार्येषु भवन्ति नाथाः शिब्यादयो राम यथा ययातेः २ येषां तथा
राम समारभन्ते कार्याणि नाथाः स्वमतेन लोके । ते नाथवन्तः पुरुष-
प्रवीरा नानाथवत्कृच्छ्रमवाप्नुवन्ति ३ कस्मादिमौ रामजनार्दनौ च प्रद्यु-
म्नसांबौ च मया समेतौ । वसंत्यरण्ये सह सोदरीयैस्त्रैलोक्यनाथान-
भिगम्य पार्थाः ४ निर्यातु साध्वद्य दशार्हसेना प्रभूतनानायुधचित्र-
वर्मा । यमक्षयं गच्छतु धार्तराष्ट्रः सबान्धवो वृष्णिबलाभिभूतः ५
त्वं ह्येव कोपात्पृथिवीमपीमां संवेष्टयेस्तिष्ठतु शार्ङ्गधन्वा । सधार्तराष्ट्रं
जहि सानुबन्धं वृत्रं यथा देवपतिर्महेन्द्रः ६ भ्राता च मे यः स सखा
गुरुश्च जनार्दनस्यात्मसमश्च पार्थः । यदर्थमैच्छन्मनुजाः सुपुत्रं शिष्यं गुरुं
चाप्रतिकूलवादम् ७ यदर्थमभ्युद्यतमुत्तमं तत्करोति कर्माद्यमपारणीयम् ।

सात्यकि ह्मणतो:— हे बलरामा, युधिष्ठिर आपणांशीं एक शब्दही जरी बोलत नाहीं तरी सांप्रत प्रसंगाला जें योग्य असेल तेंच यापुढें आपण सर्वांनीं केलें पाहिजे; शोक करीत बसण्याची ही वेळ नव्हे १. ह्या लोकामध्यें ज्यांचे कोणी तरी पालन करणारे असतात ते आपण होऊन कोणत्याही कामाला आरंभ करीत नाहींत. कारण, ज्याप्रमाणें शिबिप्रभृतींनी ययातिराजाचीं कार्यें केलीं त्याचप्रमाणें ते पालन करणारेच त्यांचीं तीं कार्यें करीत असतात २ आणि अशारीतीनें, हे रामा, ज्यांचीं कार्यें लोक आपण स्वतांच करितात त्या पुरुषश्रेष्ठांना लोक ह्या लोकामध्यें ऐश्वर्यवान् ह्मणतात व तेच अनाथासारिखीं दुःखें भोगीत नाहींत ३. हे बलरामा, त्रैलोक्याचेंही पालन करण्याला समर्थ असलेला तूं, कृष्ण, प्रद्युम्न. सांब व मी असे असतां आपल्या भ्रात्यांसहवर्तमान कुंतीपुत्र धर्मराजानें अरण्यामध्यें कसें वास्तव्य करावें ! ४. तस्मात् , नानाप्रकारचीं आयुधें व चित्रविचित्र कवचें धारण केलेली यादवांची सेना आज खुशाल युद्धाला सिद्ध होवो आणि वृष्णींच्या बलानें पराजित झालेला दुर्योधन आपल्या भ्रात्यांसहवर्तमान यमलोकाला जावो ५. हे बलरामा, शार्ङ्ग धनुष्य धारण करणाऱ्या श्रीकृष्णाची व त्याचप्रमाणें माझा बंधु, माझा मित्र, माझा गुरु व मूर्तिमान् दुसरा कृष्णच कीं काय अशा अर्जुनाची गोष्ट तर असोच परंतु, तूं एकटा रुष्ट झालास तरी सुद्धां ह्या पृथ्वीला वेढा घालण्यास समर्थ आहेस. ह्मणून देवपति महेंद्रानें जसा वृत्रासुराचा नाश केला तसा अनुयायांसहवर्तमान दुर्योधनाचा नाश कर. लोक नेहमीं शत्रूंच्या

तस्यास्त्रवर्षाण्यहमुत्तमास्त्रैर्विहत्य सर्वाणि रणेभिभूय ८ काया-
च्छिरः सर्पविषाग्निकल्पैः शरोत्तमैरुन्मथितास्मि राम । खड्गेन चाहं
निशितेन संख्ये कायाच्छिरस्तस्य बलात्प्रमथ्य ९ ततोस्य सर्वाननुगान्ह-
निष्ये दुर्योधनं चापि कुरूंश्च सर्वान् । आत्तायुधं मामिह रौहिणेय पश्यन्तु
भौमा युधि जातहर्षाः १० निघ्नन्तमेकं कुरुयोधमुख्यानग्निं महाकक्षमिवा-
न्तकाले । प्रद्युम्नमुक्तान्निशितान्नशक्ताः सोढुं कृपद्रोणविकर्णकर्णाः ११
जानामि वीर्यं च जयात्मजस्य कार्ष्णिर्भवत्येव यथा रणस्थः । सांबः
ससूतं सरथं भुजाभ्यां दुःशासनं शास्तुबलात्प्रमथ्य १२ न विद्यते जाम्ब-
वती सुतस्य रणे विषह्यं हि रणोत्कटस्य । एतेन बालेन हि शंबरस्य
दैत्यस्य सैन्यं सहसा प्रणुन्नम् १३ वृत्तोरुरत्यायतपीनबाहुरेतेन संख्ये
निहतोश्वचक्रः । को नाम सांबस्य महारथस्य रणे समक्षं रथमभ्युदीयात् १४

वधाकरितां सत्पुत्राची, गुरूची व आपल्या विरुद्ध भाषण न करणाऱ्या ६, ७ शिष्याची इच्छा करीत असतात व ते त्यांच्या इच्छेप्रमाणें उत्कृष्ट व दुसऱ्याच्या हातून न होण्यासारिखें कर्मही करीत असतात. ह्मणून (हे सर्व आपणांजवळ असल्या-मुळें) मी आपल्या उत्कृष्ट अस्त्रांच्या योगानें रणांगणाचे ठिकाणीं दुर्योधनाच्या अस्त्र-वृष्टीचा नाश करून टाकीन ८. हे रामा, सर्प, विष व अग्नि ह्यांच्यासारिख्या उत्कृष्ट बाणांनीं मी त्याचें मस्तक शरीरापासून तोडून टाकीन आणि तीक्ष्ण खड्गानें रणभूमीचे ठिकाणीं बलात्कारानें त्याच्या मस्तकाचा छेद करीन व नंतर ९ सर्व कौरव व अनुयायां-सहवर्तमान दुर्योधन ह्यांचा समाचार घेईन. हे रोहिणीतनया, ह्या युद्धामध्यें हर्ष पावलेले, भीमकर्म करणारे अथवा भीमवशांत उत्पन्न झालेले योद्धे, शस्त्र धारण करून सज्ज झालेल्या व प्रलयकालचा अग्नि ज्याप्रमाणें आसमंतात भागाला जाळतो त्याप्रमाणें कुरुवीरमु-ख्यांना मारणाऱ्या मला, अवलोकन करोत. हे रामा, खरोखर प्रद्युम्नानें सोडिलले तीक्ष्ण बाण सहन करण्यास कृप, द्रोण, विकर्ण व कर्ण हे असमर्थ आहेत १०, ११. अर्जुनपुत्र अभिमन्यूचा पराक्रम मला माहीत आहे. तो रणांगणाचे ठिकाणीं साक्षात् श्रीकृष्णाप्रमाणेंच पराक्रम करणारा आहे. सांब आपल्या बाहूंच्या योगानें रथ व सारथि ह्यांसहवर्तमान बलात्कारानें दुःशासनाला जर्जर करील १२. ह्या रणशूर जांबवतीपुत्राला रणांगणामध्यें सहन करण्यास कठिण असें कांहींच नाहीं. ह्यानें बाल्यावस्थेंतच शंब-रासुर दैत्याचें सैन्य एकाएकीं नाहींसें करून टाकिलें १३. ह्यानेंच रणभूमीवर ज्याच्या मांड्या वर्तुलाकृति आहेत व ज्याचे बाहु अतिशय पुष्ट आहेत अशा अश्वचक्राला मारून टाकिलें. अशा ह्या महारथि सांबासमोर रणांगणामध्यें आपला रथ कोण बरें

यथा प्रविश्यान्तरमन्तकस्य काले मनुष्यो न विनिष्क्रमेत ।
तथा प्रविश्यान्तरमस्य संख्ये को नाम जीवन्पुनराव्रजेत १५ द्रोणं च
भीष्मं च महारथौ तौ सुतैर्वृतं चाप्यथ सोमदत्तम् । सर्वाणि सैन्यानि
च वासुदेवः प्रधक्ष्यते सायकवह्निजालैः १६ किं नाम लोकेषु विषह्य-
मस्ति कृष्णस्य सर्वेषु सदैवतेषु । आत्तायुधस्योत्तमबाणपाणेश्चक्रायुध-
स्याप्रतिमस्य युद्धे १७ ततोऽनिरुद्धोऽप्यसिचर्मपाणिर्महीमिमां धार्तराष्ट्रैर्वि-
संज्ञैः । हृतोत्तमाङ्गैर्निहतैः करोतु कीर्णां कुशैर्वेदिमिवाध्वरेषु १८ गदो-
ल्मुकौ बाहुकभानुनीथाः शूरश्च संख्ये निशठः कुमारः । रणोत्कटौ सार-
णचारुदेष्णौ कुलोचितं विप्रथयन्तु कर्म १९ सवृष्णिभोजान्धकयोध-
मुख्या समागता सात्वतशूरसेना । हत्वा रणे तान्धृतराष्ट्रपुत्राँल्लोके यश-
स्फीतमुपाकरोतु २० ततोऽभिमन्युः पृथिवीं प्रशास्तु यावद्व्रतं धर्मभृतां
वरिष्ठः । युधिष्ठिरः पारयते महात्मा द्यूते यथोक्तं कुरुसत्तमेन २१ अस्म-
त्प्रमुक्तैर्विशिखैर्जितारिस्ततो महीं भोक्ष्यति धर्मराजः । निर्धार्तराष्ट्रां हत-

---

नेईल? १४. ज्याप्रमाणें अंतकालीं मनुष्य यमाच्या तडाक्यांत सांपडला असतां तो जिवंत माघारा येत नाहीं त्याप्रमाणें रणामध्यें ह्याच्या समोरून कोण बरें जिवंत माघारा येणार? १५. हा वसुदेवपुत्र कृष्ण आपल्या बाणरूप अग्नीच्या समुदायांनीं सर्व सैन्यासहवर्तमान द्रोण, भीष्म, ते दोघे महारथि व पुत्रांनीं परिवेष्टित असलेला सोमदत्त ह्या सर्वांचा नाश करून टाकील १६. रणांगणामध्यें जोड नसलेल्या आणि चक्र व बाण धारण करून युद्धाला तयार असलेल्या श्रीकृष्णाला ह्या सर्व लोकांमध्यें सहन करण्यास कठिण असें काय आहे ? कांहींच नाहीं १७. ज्याप्रमाणें यज्ञामध्यें वस्त्रांनीं वेदी आच्छादित केली जाते त्याप्रमाणें हा अनिरुद्ध आपल्या हातामध्यें ढाल तरवार धारण करून मूर्छित झालेल्या धृतराष्ट्र पुत्रांच्या तोडिलेल्या मस्तकांनीं ही पृथ्वी आच्छादित करो १८. गद, उल्मुक, बाहुक, भानुनीथ, शूर व अल्पवयी निशठ, रणशूर सारण व चारु-देष्ण हे ह्या रणांगणाचे ठिकाणीं आपल्या कुलाला उचित असें कर्म करोत १९. वृष्णि, भोज व अंधक ह्या जातींच्या योद्ध्यांनीं भरलेली ही यादवांची सेना ह्या समरांगणांत धृतराष्ट्रपुत्रांचा वध करून यशस्वी होवो २०. तदनंतर दुर्योधनानें द्यूतामध्यें ठरविल्याप्रमाणें धर्म पालन करणाऱ्यांमध्यें श्रेष्ठ असा महात्मा युधिष्ठिर आपली दीक्षा शेवटास नेईपर्यंत हा अभिमन्यूच पृथ्वीचें पालन करो २१. सारांश, आम्हीं सोडिलेल्या तीक्ष्ण बाणांनीं ज्याचे शत्रु नष्ट झाले आहेत असा धर्मराज, धृतराष्ट्रपुत्र व सूतपुत्र कर्ण ह्यांचा वध झाल्यामुळें त्यांनीं रहित अशा पृथ्वीचें, पालन करो व आमचा

सतपुत्रामितद्धिनः कृत्यतमं यशस्यम् २२ वासुदेव उवाच ॥ अमंशयं माधव सत्यमेतद्गृह्णीम ते वाक्यमदीनसत्त्व। स्वाभ्यां भुजाभ्यामजितां तु भूमिं नेच्छेत्कुरूणामृषभः कथंचित् २३ न ह्येष कामान्न भयान्न लोभा-द्युधिष्ठिरो जातु जह्यात्स्वधर्मम्। भीमार्जुनौ चातिरथौ यमौ च तथैव कृष्णा द्रुपदात्मजेयम् २४ उभौ हि युद्धेप्रतिमौ पृथिव्यां वृकोदरश्चैव धनञ्जयश्च। कस्मान्न कृत्स्नां पृथिवीं प्रशासेन्माद्रीसुताभ्यां च पुरस्कृतोऽयम् २५ यदा तु पञ्चालपतिर्महात्मा सकेकयश्चेदिपतिर्वयं च। युध्येम विक्रम्य रणे समेतास्तदैव सर्वे रिपवो हि न स्युः २६ युधिष्ठिर उवाच ॥ नेदं चित्रं माधव यद्ब्रवीषि सत्यं तु मे रक्ष्यतमं न राज्यम्। कृष्णस्तु मां वेद यथावदेकः कृष्णं च वेदाहमथो यथावत् २७ यदैव कालं पुरुषप्रवीरो वेत्स्यत्ययं माधव विक्रमस्य। तदा रणे त्वं च शिनिप्रवीरः सुयोधनं जेष्यसि केशवश्च २८ प्रतिप्रयान्त्वद्य दशार्हवीरा दृष्टोऽस्मि नाथै-र्नरलोकनाथैः। धर्मप्रमादं कुरुताप्रमेया द्रष्टास्मि भूयः सुखिनः सम-

कर्तव्यांपैकीं यश देणारें कर्तव्य हेंच आहे २२. वासुदेव ह्मणतातः— हे महापराक्रमी माधवा, तूं ह्मणतोस हें निःसशय खरें आहे व त्याचा आह्मी स्वीकार करितों; परंतु, हा कुरुश्रेष्ठ धर्मराज आपल्या बाहुबलानें न जिंकिलेल्या पृथ्वीचें पालन करण्याची कधींहीं इच्छा करणार नाहीं २३. हे सात्यके, अतिरथि भीमार्जुन, नकुलसहदेव, द्रुपदराजकन्या द्रौपदी अथवा हा युधिष्ठिर हे स्वच्छंनें, भयानें अथवा लोभानें कधींहीं स्वधर्माचा त्याग करणार नाहींत २४. ज्यांना रणांगणामध्यें ह्या पृथ्वीवर जोड नाहीं असे हे उभयतां भीमार्जुन व माद्रीपुत्र नकुलसहदेव ह्यांनीं पुढें केलेला धर्मराज ह्या सपूर्ण पृथ्वीचें कसें पालन करणार नाहीं ? २५. महात्मा पांचालदेशाचा अधिपति, केकय लोकासहवर्तमान चेदी देशाचा अधिपति व आह्मी एकत्र होऊन रणांगणाचे ठिकाणीं युद्धाला आरंभ करितांक्षणीं सर्व शत्रु नाहींसे होतील २६. युधिष्ठिर ह्मणतोः— हे माधवा, तूं जें ह्मणतोस तें कांहीं आश्चर्यकारक नाहीं. तथापि, मला रक्षण करावयाचेंच जर ह्मणशील तर सत्याचें; राज्याचें नाहीं आणि हा एकटा श्रीकृष्णच मला पूर्णपणें ओळखतो व त्याचप्रमाणें मीही एकटाच त्याला पूर्णपणें जाणतो २७. हे सात्यके, जेव्हां ह्या पुरुषश्रेष्ठ श्रीकृष्णाला पराक्रम करण्याची ही योग्य वेळ आली असें वाटेल तेव्हां तूं, शिनिश्रेष्ठ व हा केशव असे रणभूमीमध्यें सुयोधनाला जिंकाल २८. आज ह्या नरलोकाचें अधिपत्य ज्यांकडे आहे अशा यादवांनीं माझी गांठ घेतली व आतां

१ मधु = मथुरा. तेथें उत्पन्न झालेला ह्मणून माधव.

तान् २९ तेन्योन्यमामन्त्र्य तथाभिवाद्य वृद्धान्परिष्वज्य शिशूंश्च सर्वान्। यदुप्रवीराः स्वगृहाणि जग्मुस्ते चापि तीर्थान्यनुसंविचेरुः ३० विसृज्य कृष्णं त्वथ धर्मराजो विदर्भराजोपचितां सुतीर्थाम्। जगाम पुण्यां सरितं पयोष्णीं सभ्रातृभृत्यः सह लोमशेन ३१ सुतेन सोमेन विमिश्रतोयां पयः पयोष्णीं प्रति सोध्युवास। द्विजातिमुख्यैर्मुदितैर्महात्मा संस्तूयमानः स्तुतिभिर्वराभिः ३२ [४८०९] इति श्रीमहाभारते ०आरण्यके पर्वणि तीर्थयात्रापर्वणि लोमशतीर्थयात्रायां यादवगमने विंशत्यधिकशततमोध्यायः॥ १२०॥

लोमश उवाच ॥ नृगेण यजमानेन सोमेनेह पुरन्दरः। तर्पितः श्रूयते राजन्स तृप्तो मुदमभ्यगात् १ इह देवैः सहेन्द्रैश्च प्रजापतिभिरेव च। इष्टं बहुविधैर्यज्ञैर्महद्भिर्भूरिदक्षिणैः २ आमूर्तरयसश्चेह राजा वज्रधरं प्रभुः। तर्पयामास सोमेन हयमेधेषु सप्तसु ३ तस्य सप्तसु यज्ञेषु सर्वमासीद्धिरण्मयम्। वानस्पत्यं च भौमं च यद्द्रव्यं नियतं मखे ४

ही वृष्णिवीरांची सेना खुशाल गमन करो. हे अतुलपराक्रमी यादवहो, धर्माविषयीं कधींही प्रमत्त होऊं नका. पुनरपि वेळ आली ह्मणजे आपण एकमेकाला स्वस्थपणें भेटूं २९. हें ऐकून त्या यदुश्रेष्ठांनीं वृद्धांना नमस्कार केला, बरोबरीच्यांना अलिंगनें दिलीं व आपल्यापेक्षां कनिष्ठ वयाच्या मुलांना अशीर्वाद दिले व नंतर एकमेकाला विचारून ते आपआपल्या घरीं चालते झाले आणि पांडवही तीर्थयात्रेला जाण्यास निघाले ३०. नंतर श्रीकृष्णाला आपल्या देशाला परतवून धर्मराज आपले भ्राते, अनुयायी व लोमशमहर्षि ह्यांसहवर्तमान विदर्भ राजानें जिच्या काठीं घाट बांधिले आहेत अशा परम पुण्यकारक तीर्थरूप पयोष्णीनामक नदीला आला ३१ आणि जिचें उदक सोममिश्रित आहे अशा पयोष्णी नदीच्या उदकाचें सेवन करीत करीत परम आनंदित झालेला व ब्राह्मणश्रेष्ठांनीं उत्कृष्ट उत्कृष्ट स्तुतिरूप वाक्यांनीं ज्याचें स्तवन केलें आहे असा महात्मा धर्मराज तेथें राहिला ३२. ह्याप्रमाणें ०वनपर्वांतील तीर्थयात्रापर्वापैकीं लोमशतीर्थयात्रेसंबंधीं यादवांच्या गमनाविषयीं एकशेंविसावा अध्याय समाप्त झाला ॥ १२० ॥

लोमश सांगतात:— हे राजा, असें ह्मणतात कीं, यजमान नृगराजानें शत्रुपक्षीय नगरांचा नाश करणाऱ्या इंद्राला ह्या ठिकाणीं सोमपान करविलें व त्यामुळें त्याला परम आनंद झाला १. येथें प्रजापति व इंद्रासहवर्तमान देव ह्यांनीं मोठमोठे व ज्यांत पुष्कळ दक्षिणा दिली असे नानाप्रकारचे यज्ञ केले २ व ह्याच ठिकाणीं अमूर्तरयाच्या पुत्र प्रभु गयानें सात अश्वमेध यज्ञामध्यें वज्र धारण करणाऱ्या इंद्राला सोमानें तृप्त केलें ३. त्याच्या ह्या सातही यज्ञांमध्यें जे पदार्थ लाकडाचे व मृत्तिकेचे असावयाचे

चषालयूपचमसाः स्थाल्यः पात्र्यः स्रुचः स्रुवाः । तेष्वेव चास्य यज्ञेषु
प्रयोगाः सप्त विश्रुताः ५ सप्तैकैकस्य यूपस्य चषालाश्चोपरि स्थिताः ।
तस्य स्म यूपान्यज्ञेषु भ्राजमानान्हिरण्मयान् ६ स्वयमुत्थापयामासुर्देवाः
सेन्द्रा युधिष्ठिर । तेषु तस्य मखाग्र्येषु गयस्य पृथिवीपतेः ७ अमा-
द्यदिन्द्रः सोमेन दक्षिणाभिर्द्विजातयः । प्रसंख्यानानसंख्येयान्प्रत्यगृह्णन्द्वि-
जातयः ८ सिकता वा यथा लोके यथा वा दिवि तारकाः । यथा वा
वर्षतो धारा असंख्येयाः स्म केनचित् ९ तथैव तदसंख्येयं धनं यत्प्रददौ
गयः । सदस्येभ्यो महाराज तेषु यज्ञेषु सप्तसु १० भवेत्संख्येयमेतद्धि
यदेतत्परिकीर्तितम् । न तस्य शक्याः संख्यातुं दक्षिणा दक्षिणावतः ११
हिरण्मयीभिर्गोभिश्च कृताभिर्विश्वकर्मणा । ब्राह्मणांस्तर्पयामास नाना-
दिग्भ्यः समागतान् १२ अल्पावशेषा पृथिवी चैत्यैरासीन्महात्मनः । गयस्य
यजमानस्य तत्र तत्र विशाम्पते १३ स लोकान्प्राप्तवानैन्द्रान्कर्मणा तेन
भारत । सलोकतां तस्य गच्छेत्पयोष्ण्यां य उपस्पृशेत् १४ तस्मात्त्व-

---

ते सर्व खरोखर सुवर्णाचे होते ४ व त्याची अशीही प्रसिद्धि आहे कीं, त्याच्या प्रत्येक
यज्ञामध्यें चषाल, यज्ञस्तंभ, सोमप्राशन करण्याचीं पात्रें, स्थाली, स्रुच्या व स्रुवे हीं सर्व
निरनिराळीं होतीं ५. त्याच्या प्रत्येक यज्ञस्तंभावर सात सात चषाल असत व यज्ञाम-
धील ते स्तंभ सोन्याचे असल्यामुळें झळकत असत ६ आणि, हे युधिष्ठिरा, इंद्रासहवर्त-
मान देवांनीं ते स्वतःच उभारिलेले होते. हे पृथ्वीपते, गयराजाच्या त्या श्रेष्ठ यज्ञामध्यें ७
सोमपानानें इंद्र व दक्षिणेच्या योगानें ब्राह्मण कंटाळून गेले व शेवटीं असंख्य गोण्या
भरून ब्राह्मणांनीं त्या दक्षिणा नेल्या ८. ह्या लोकामध्यें ज्याप्रमाणें वाळू, आका-
शांतील नक्षत्रसमुदाय व असंख्य पर्जन्याच्या धारा कोणालाही मोजतां येत नाहींत ९,
त्याचप्रमाणें, हे महाराज, त्या सात यज्ञामध्यें सदस्यांना गय राजानें दिलेल्या द्रव्याची
संख्या करितां यावयाची नाहीं १०. कदाचित् हें वर सांगितलेलेंही मोजणारा निघेल
परंतु, यजमान गयराजानें दिलेल्या दक्षिणेची संख्या करण्यास कोणीही समर्थ नाहीं ११.
त्या गयराजानें दश दिशांतून आलेल्या ब्राह्मणांना विश्वकर्म्यानें तयार केलेल्या सुव-
र्णाच्या गाई देऊन तृप्त केले १२. हे भूपते धर्मराजा, महात्म्या यजमान गयानें जागों-
जागीं यज्ञ करून जेथें यज्ञ झाला नाहीं अशी थोडीच पृथ्वी शिल्लक ठेविली १३ व,
हे भरतकुलोत्पन्ना धर्मराजा, ह्याच कर्मानें तो इंद्रलोकाला गेला. त्याचप्रमाणें आतां
जो कोणी ह्या पयोष्णी नदीच्या उदकाला स्पर्श करील तोही पण त्याच्याच लोकाला
जाईल १४. तस्मात् हे अच्युता, हे नृपश्रेष्ठा, ह्या ठिकाणीं तूंही आपल्या बंधूसहवर्त-

अत्र राजेन्द्र भ्रातृभिः सहितोऽच्युत । उपस्पृश्य महीपाल धूतपाप्मा भवि-
ष्यसि १५ वैशम्पायन उवाच ॥ स पयोष्ण्यां नरश्रेष्ठः स्नात्वा वै
भ्रातृभिः सह । वैदूर्यपर्वतं चैव नर्मदां च महानदीम् १६ समागमत
तेजस्वी भ्रातृभिः सहितोनघ । तत्रास्य सर्वाण्याचख्यौ लोमशो भगवा-
नृषिः १७ तीर्थानि रमणीयानि पुण्यान्यायतनानि च । यथायोगं
यथाप्रीति प्रययौ भ्रातृभिः सह । तत्र तत्राददद्वित्तं ब्राह्मणेभ्यः सहस्रशः १८
लोमश उवाच ॥ देवानामेति कौन्तेय तथा राज्ञां सलोकताम् । वैदू-
र्यपर्वतं दृष्ट्वा नर्मदामवतीर्य च १९ संधिरेष नरश्रेष्ठ त्रेतायां द्वापरस्य च ।
एनमासाद्य कौन्तेय सर्व पापैः प्रमुच्यते २० एष शर्यातियज्ञस्य देश-
स्तात प्रकाशते । साक्षाद्यत्रापिबत्सोममश्विभ्यां सह कौशिकः २१
चुकोप भार्गवश्चापि महेन्द्रस्य महातपाः । संस्तम्भयामास च तं वासवं
च्यवनः प्रभुः । सुकन्यां चापि भार्यां स राजपुत्रीमवाप्तवान् २२ युधि-
ष्ठिर उवाच ॥ कथं विष्टम्भितस्तेन भगवान्पाकशासनः । किमर्थं भार्गव-
श्चापि कोपं चक्रे महातपाः २३ नासत्यौ च कथं ब्रह्मन्कृतवान्सोमपी-

---

मान स्नान कर ह्मणजे, हे पृथ्वीपालका, तूं पापरहित होशील १५. वैशंपायन
सांगतात:— हे निष्पापा जनमेजया, त्या नरश्रेष्ठ धर्मराजानें आपल्या बंधूंसहवर्तमान
पयोष्णीमध्यें स्नान करून तो तेजस्वी धर्मराज भ्रात्यांसहवर्तमान महानदी नर्मदा व
वैदूर्यपर्वत ह्यांच्या संनिध येऊन पोंचला आणि तेथें भगवान् लोमशऋषींनीं त्याला
सर्व कांहीं कथन केलें १६,१७. तेव्हां तो धर्मराज आपल्या भ्रात्यांसहवर्तमान रम-
णीय तीर्थे व पवित्र आश्रम अवलोकन करून मोठ्या आनंदानें हजारों ब्राह्मणांना
द्रव्यदान करीत करीत चालला १८. लोमश ह्मणतात:— हे कुंतीपुत्रा युधिष्ठिरा,
जो कोणी नर्मदेमध्यें उतरून वैदूर्य पर्वताला अवलोकन करितो तो (पुण्यवान्) राजे
व देव ज्या लोकांत राहतात तेथें जातो १९. हे पुरुषश्रेष्ठा धर्मराजा, ह्या
ठिकाणीं नेहमीं द्वापर व त्रेतायुग ह्याप्रमाणें काल असतो व मनुष्य ह्याकर
प्राप्त झाला असतां, हे कुंतीपुत्रा युधिष्ठिरा, तो सर्व पापापासून मुक्त होतो २०.
बा धर्मराजा, जेथें शर्यातिराजानें यज्ञ केला तो हा प्रदेश प्रकाशित होत आहे व
येथेंच कौशिक मुनीनें अश्विनीकुमारांसहवर्तमान सोमपान केलें २१. महातपस्वी प्रभु
भार्गवानें इंद्रावर रुष्ट होऊन त्याच्या बाहूचें स्तंभनही येथेंच केलें व सुकन्या नांवाची
राजपुत्री आपल्याला स्त्रीही येथेंच प्राप्त करून घेतली २२. युधिष्ठिर ह्मणतो:—
हे ब्रह्मन्, च्यवनानें भगवान् इंद्राचें स्तंभन कसें केलें, महातपस्वी भार्गव रुष्ट कां झाले

थिनौ । एतत्सर्वं यथावृत्तमाख्यातु भगवान्मम २४ [४८३३] इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यामारण्यके पर्वणि तीर्थयात्रापर्वणि लोमशतीर्थयात्रायां सौकन्य एकविंशाधिकशततमोऽध्यायः॥१२१॥

लोमश उवाच॥भृगोर्महर्षेः पुत्रोऽभूच्च्यवनो नाम भारत । समीपे सरसस्त्वस्य तपस्तेपे महाद्युतिः १ स्थाणुभूतो महातेजा वीरस्थानेन पाण्डव । अतिष्ठत चिरं कालमेकदेशे विशांपते २ सवल्मीकोऽभवदृषिर्लताभिरभिसंवृतः । कालेन महता राजन्समाकीर्णः पिपीलिकैः ३ तथा स संवृतो धीमान्मृत्पिण्ड इव सर्वशः । तप्यते स्म तपो घोरं वल्मीकेन समावृतः ४ अथ दीर्घस्य कालस्य शर्यातिर्नाम पार्थिवः । आजगाम सरो रम्यं विहर्तुमिदमुत्तमम् ५ तस्य स्त्रीणां सहस्राणि चत्वार्यासन्परिग्रहः । एकैव च सुता सुभ्रूः सुकन्या नाम भारत ६ सा सखीभिः परिवृता दिव्याभरणभूषिता । चंक्रम्यमाणा वल्मीकं भार्गवस्य समासदत् ७ सा वै वसुमतीं तत्र पश्यन्ती सुमनोरमाम् । वनस्पतीन्विचिन्वन्ती विजहार सखीवृता ८ रूपेण वयसा चैव मदनेन मदेन च । बभञ्ज वनवृक्षाणां शाखाः परमपुष्पिताः ९

व अश्विनीकुमारांना सोमप्राशन करणारे कसे केले हे सर्व जे घडले तसे आपण मला कथन करा २३,२४. ह्याप्रमाणें० वनपर्वांतील तीर्थयात्रापर्वापैकी लोमशतीर्थयात्रेसंबधीं सौकन्याख्यानाविषयीं एकशें एकविसावा अध्याय समाप्त झाला ॥ १२१ ॥

लोमश सांगतात:—हे भरतकुलोत्पन्ना धर्मराजा, महर्षि भृगूला च्यवन नांवाचा एक मुलगा झाला आणि त्या महातेजस्वी च्यवनाने ह्या सरोवराच्या जवळच तपश्चर्या करण्यास आरंभ केला १. हे पांडुपुत्रा, तो महातेजस्वी एकेच ठिकाणीं बसून वीरासनावर स्थाणूसारिखा अचल राहून पुष्कळ दिवस तप करीत होता २. पुढे बराच काल लोटल्यानंतर, हे राजा, त्याच्या अंगावर वारूळ वाढून तो लता व मुंग्या यांनीं अगदीं वेढून गेला ३. ह्याप्रमाणें वारुळानें दिसेनासा होऊन मातीच्या गोळ्याप्रमाणें झालेला तो महाबुद्धिमान् च्यवन तपश्चर्या करीत असतां ४ बऱ्याच दिवसांनीं शर्यातीनांवाचा भूपति ह्याच सुंदर व उत्कृष्ट सरोवरावर विहार करण्याकरितां आला ५. त्याच्या बरोबर चार हजार स्त्रिया होत्या आणि, हे भरतकुलोत्पन्ना, उत्तम प्रकारच्या भृकुटी असलेली एक सुकन्या ह्मणून त्याची मुलगीही होती ६ सुंदर वस्त्रें व अलकार ह्याच्या योगानें भूषित होऊन ती आपल्या सख्यांसहवर्तमान फिरत फिरत भार्गवऋषीच्या ह्या वारुळाजवळ येऊन पोंचली ७ आणि मनोहर स्थलें पहात व वनसंबंधीं वृक्षांचीं पुष्पें वेंचीत सख्यांनीं परिवेष्टित होऊन ती येथें क्रीडा करूं लागली असता ८ रूप, वय

तां सखीरहितामेकामेकवस्त्रामलंकृताम् । ददर्श भार्गवो धीमांश्चरन्ती-
मिव विद्युतम् १० तां पश्यमानो विजने स रेमे परमद्युतिः । क्षामक-
ण्ठश्च विप्रर्षिस्तपोबलसमन्वितः ११ तामाबभाषे कल्याणीं सा चास्य न
शृणोति वै । ततः सुकन्या वल्मीके दृष्ट्वा भार्गवचक्षुषी १२ कौतूहला-
त्कण्टकेन बुद्धिमोहबलात्कृता । किं नु खल्विदमित्युक्त्वा निर्बिभेदास्य
लोचने १३ अक्रुद्ध्यत्स तया विद्धे नेत्रे परममन्युमान् । ततः शर्याति-
सैन्यस्य शकृन्मूत्रे समावृणोत् १४ ततो रुद्धे शकृन्मूत्रे सैन्यमानाहदुः-
खितम् । तथागतमभिप्रेक्ष्य पर्यपृच्छत्स पार्थिवः १५ तपोनित्यस्य वृद्धस्य
रोषणस्य विशेषतः । केनापकृतमद्येह भार्गवस्य महात्मनः १६ ज्ञातं वा
यदि वाज्ञातं तद्द्रुतं ब्रूत माचिरम् । तमूचुः सैनिकाः सर्वे न विद्मोपकृतं
वयम् । सर्वोपायैर्यथाकामं भवांस्तदधिगच्छतु १७ ततः स पृथिवीपालः
साम्ना चोग्रेण च स्वयम् । पर्यपृच्छत्सुहृद्वर्गं पर्यजानन्न चैव ते १८

मदन आणि मद ह्याच्या योगानें युक्त असल्यामुळें ती (एकटीच पुढें सरसावून) वनांतील वृक्षांच्या अत्यंत पुष्पांनीं भरलेल्या अशा फांद्या मोडूं लागली ९. तेव्हां अलंकारांनीं भूषित, एक वस्त्र परिधान केलेली आणि सखीजनानें रहित व विद्युल्लते सारखी चमकणारी अशी ती सुकन्या बुद्धिमान् च्यवनभार्गवानें अवलोकन केली १०. ह्याप्रमाणें निर्जन प्रदेशामध्यें तिला अवलोकन करून तपोबलानें युक्त आणि महातेजस्वी असा च्यवनभार्गव परम आनंदित होऊन अतिशय हलक्या स्वरानें ११ त्या कल्याणीशीं बोलूं लागला; परंतु, तें तिला ऐकूं न आल्यामुळें वारुळामध्यें तिनें भार्गवाचे नेत्र अवलोकन केले १२ आणि बुद्धीला मोह उत्पन्न झाल्यामुळें आश्चर्यभरित होऊन " हें काय आहे " असें ह्मणून त्याच्या डोळ्याला कांटे टोचले १३. ह्याप्रमाणें तिनें आपल्या नेत्रांना वेध केलेला पाहून भार्गव ऋषि अत्यंत रुष्ट झाले आणि त्यांनीं शर्याति राजाच्या सैन्याच्या शकृन्मूत्राचा रोध केला १४. अशा रीतीनें सैन्यांतील लोकांचा मलमूत्रोत्सर्ग बंद झालेला पाहून तो पृथ्वीपति शर्याति राजा ह्मणाला १५ " आज निरंतर तपश्चर्या करणाऱ्या, वृद्ध आणि परम कोपिष्ट अशा महात्म्या भार्गवाचा कोणी बरें अपराध केला आहे ? १६ ही गोष्ट ज्या कोणाच्या हातून जाणून अथवा न जाणून घडली असेल त्यानें ती मला अतित्वर कळवावी; तेव्हां "आह्मी अपराध केला नाहीं; आपणच ह्याचा युक्तिप्रयुक्तीनें शोध लावा " १७ असे ते सर्व सैनिक त्याला ह्मणाले. तदनंतर त्या पृथ्वीपतीनें पुनरपि सामोपचारानें व धमकी देऊन स्वतः आपल्या सुहृद्वर्गाला विचारिलें असतां " आह्मांला ठाऊक

आनाहार्तं ततो दृष्ट्वा तत्सैन्यमसुखार्दितम् १९ पितरं दुःखितं दृष्ट्वा सुकन्येदमथाब्रवीत् । मयाटंत्येह वल्मीके दृष्टं सत्वमभिज्वलत् ॥ खद्योतवदभिज्ञातं तन्मया विद्धमन्तिकात् २० एतच्छ्रुत्वा तु वल्मीकं शर्यातिस्तूर्णमभ्ययात् २१ तत्रापश्यत्तपोवृद्धं वयोवृद्धं च भार्गवम् । अयाचदथ सैन्यार्थं प्राञ्जलिः पृथिवीपतिः २२ अज्ञानाद्बालया यत्ते कृतं तत्क्षन्तुमर्हसि । ततोऽब्रवीन्महीपालं च्यवनो भार्गवस्तदा २३ अपमानादहं विद्धो ह्यनया दर्पपूर्णया । रूपौदार्यसमायुक्तां लोभमोहबलात्कृताम् २४ तामेव प्रतिगृह्याहं राजन्दुहितरं तव । क्षंस्यामीति महीपाल सत्यमेतद्ब्रवीमि ते २५ लोमश उवाच ॥ ऋषेर्वचनमाज्ञाय शर्यातिरविचारयन् । ददौ दुहितरं तस्मै च्यवनाय महात्मने २६ प्रतिगृह्य च तां कन्यां भगवान्प्रससाद ह । प्राप्तप्रसादो राजा वै ससैन्यः पुरमाव्रजत् २७ सुकन्यापि पतिं लब्ध्वा तपस्विनमनिन्दिता । नित्यं पर्यचर-

---

नाहीं " असेंच ते ह्मणाले १८. तदनंतर सुकन्येनें मलमूत्रोत्सर्ग बंद झाल्यामुळें अत्यंत अस्वस्थ झालेल्या आपल्या सैन्याला आणि दुःखित झालेल्या आपल्या पित्याला अवलोकन करून १९ ती ह्मणाली " हे तात, ह्या वनामध्यें संचार करितां करितां वारुळामध्यें काजव्याप्रमाणें चमकणारा असा एक कीटक मीं अवलोकन केला व तो काजवा समजून मी त्याच्याजवळ गेलें आणि त्याला कांटे टोंचिले " २० हें आपल्या कन्येचें भाषण श्रवण करितांक्षणीं तो शर्याति राजा सत्वर त्या वारुळाकडे जाण्याकरितां निघाला २१ आणि तेथें जातांच त्या तपोवृद्ध व वयोवृद्ध भार्गव ऋषीला अवलोकन करून हात जोडिले आणि सैन्याकरितां तो पृथ्वीपति त्यांची प्रार्थना करून ह्मणाला २२ "हे मुनिश्रेष्ठ, माझ्या मुलीनें अज्ञानपणानें जें केलें त्याची मला क्षमा करा" हें ऐकून ते च्यवनभार्गव त्या भूपतीला ह्मणाले २३ " ज्याअर्थी गर्वानें भरून गेल्यामुळेंच तुझ्या कन्येनें हा माझा अपमान केला आहे त्याअर्थी रूप व औदार्य ह्यांनीं संपन्न आणि लोभ व मोह ह्यांनीं घेरून टाकिलेल्या २४ तुझ्या मुलीचेंच ग्रहण करून, हे महीपाला, तुझ्या मुलीला क्षमा करीन हें मी तुला सत्य सांगतों" २५. लोमश सांगतात:—हें त्या ऋषीचें वाक्य श्रवण केल्यावर शर्याति राजानें त्या महात्म्या च्यवनाला कांहीं एक विचार न करितां आपली कन्या देऊन टाकिली २६. ह्याप्रमाणें त्या कन्येचा स्वीकार करून भगवान् च्यवन प्रसन्न झाले व त्यांना प्रसन्न झालेले पाहून राजा शर्यातिही सैन्यासहवर्तमान आपल्या नगराला निघून गेला २७. इकडे सुकन्येला तपस्वी पति प्राप्त झाल्यामुळें ती सुंदर मुख असलेली

प्रीत्या तपसा नियमेन च २८ अग्नीनामतिथीनां च शुश्रूषुरनसूयिका ।
समाराधयत क्षिप्रं च्यवनं सा शुभानना २९ [४८६४] इति श्रीमहाभारते शतसाहस्र्यां॰ वैयासिक्यामारण्यके पर्वणि तीर्थयात्रापर्वणि लोमशतीर्थयात्रायां सौकन्ये द्वाविंशाधिकशततमोऽध्यायः ॥ १२२ ॥

लोमश उवाच ॥ कस्यचित्त्वथ कालस्य त्रिदशावश्विनौ नृप । कृताभिषेकां विवृतां सुकन्यां तामपश्यताम् १ तां दृष्ट्वा दर्शनीयाङ्गीं देवराजसुतामिव । ऊचतुः समभिद्रुत्य नासत्यावश्विनाविदम् २ कस्य त्वमसि वामोरु वनेऽस्मिन्किं करोषि च। इच्छाव भद्रे ज्ञातुं त्वां तत्त्वमाख्याहि शोभने ३ ततः सुकन्या सव्रीडा तावुवाच सुरोत्तमौ । शर्यातितनयां वित्तं भार्यां मां च्यवनस्य च ४ अथाश्विनौ प्रहस्यैतामब्रूतां पुनरेव तु । कथं त्वमसि कल्याणि पित्रा दत्ता गताध्वने ५ भ्राजसेऽस्मिन्वने भीरु विद्युत्सौदामनी यथा । न देवेष्वपि तुल्यां हि त्वया पश्याव भाविनि । ६ अनाभरणसंपन्ना परमाम्बरवर्जिता । शोभयस्यधिकं भद्रे

सुकन्या तप व नियम ह्यांच्या योगानें युक्त होऊन आपला पति च्यवन भार्गव, अग्नि, आणि अतिथि ह्यांची कोणत्याही प्रकारची दोषदृष्टि न करितां मोठ्या प्रीतीनें निरंतर सेवा करूं लागली २८,२९. ह्याप्रमाणें० वनपर्वांतील तीर्थयात्रापर्वापैकीं लोमशतीर्थयात्रेसंबंधी सौकन्याख्यानाविषयी एकशें बाविसावा अध्याय समाप्त झाला ॥ १२२ ॥

लोमश सांगतात:—हे राजा, तदनंतर कोणे एके वेळीं स्नान केलेली परंतु वस्त्ररहित असलेली ती सुकन्या अश्विनीकुमाराच्या दृष्टीस पडली १ तेव्हा अवलोकन करण्यास योग्य अशा अवयवांनी युक्त आणि देवराजाच्या कन्येप्रमाणें असलेल्या त्या सुकन्येला पाहून ते देवांचे वैद्य अश्विनीकुमार सत्वर तिच्या समीप गेले आणि तिला ह्मणाले २ "हे शोभने, हे वामोरु, तू कोणाची आहेस व ह्या वनामध्यें काय करीत आहेस हें जाणून घेण्याची आमची इच्छा आहे; तरी, हे कल्याणि, तें तूं आह्मांला इत्थंभूत कथन कर" ३. तदनंतर लज्जायमान झालेली ती सुकन्या त्या दोघा देवश्रेष्ठांना ह्मणाली "हे देवश्रेष्ठहो, मी शर्यातीची कन्या व च्यवनाची भार्या आहें असें आपण समजा ४. हें ऐकताच अश्विनीकुमार हंसून पुनरपि तिला ह्मणाले "हे कल्याणि, तुझ्या बापानें तुला अशा उतारवयाच्या मनुष्याला कसें बरें दिलें ? ५. हे भित्रे, खरोखर तूं या वनाचे ठिकाणीं विद्युल्लतेप्रमाणें चमकत आहेस. हे भामिनि, तुझ्यासारिखी सुंदर स्त्री देवांमध्यें सुद्धां आह्मांला दिसत नाहीं ६. अलंकार धारण न केलेली, आभरणांच्या योगानें रहित आणि उंची उंची वस्त्रें परिधान न केलेली अशी असून सुद्धां तूं ह्या वनाला अधिक

वनमप्यनलंकृता ७ सर्वाभरणसंपन्ना परमाम्बरधारिणी। शोभेस त्वनव-
द्याङ्गी न त्वेवं मलपंकिनी ८ कस्मादेवंविधा भूत्वा जराजर्जरितं
पतिम्। त्वमुपास्से ह कल्याणि कामभोगबहिष्कृतम् ९ असमर्थं परि-
त्राणे पोषणे तु शुचिस्मिते। सा त्वं च्यवनमुत्सृज्य वरयस्वैकमावयोः १०
पत्यर्थं देवगर्भाभे मा वृथा यौवनं कृथाः। एवमुक्ता सुकन्यापि सुरौ
ताविदमब्रवीत् ११ रताहं च्यवने पत्यौ मैवं मां पर्यशंकतम्। ताव-
ब्रूतां पुनस्त्वेनामावां देवभिषग्वरौ १२ युवानं रूपसंपन्नं करिष्यावः
पतिं तव। ततस्तस्यावयोश्चैव वृणीष्वान्यतमं पतिम् १३ एतेन सम-
येनैनमामन्त्र्य पतिं शुभे। सा तयोर्वचनाद्राजन्नुपसंगम्य भार्गवम् १४
उवाच वाक्यं यत्ताभ्यामुक्तं भृगुसुतं प्रति। तच्छ्रुत्वा च्यवनो भार्यामुवाच
क्रियतामिति १५ ऊचतू राजपुत्रीं तां पतिस्तव विशत्वपः। ततोम्भश्च्य-
वनः शीघ्रं रूपार्थी प्रविवेश ह १६ अश्विनावपि तद्राजन्सरः प्रावि-

---

शोभा देत आहेस ७. सर्वाभरणसंपन्न, उत्तम वस्त्र परिधान करणारी व वर्णन करण्यास योग्य असे अवयव धारण करणारी स्त्री ज्याप्रमाणें शोभते त्याप्रमाणेंच तूं अंगावर मळ सांचला असतांनाही तू दिसत आहेस ८. हे कल्याणि. अशा प्रकारची तू असून कामोपभोगाविषयीं निरुपयोगी, जरेच्या योगानें कृश झालेला आणि तुझें रक्षण व पोषण करण्याविषयीं असमर्थ अशा आपल्या पतीचें कसें बरें सेवन करीत आहेस? तस्मात्, हे सुहास्यवदने, च्यवनाचा परित्याग करून आह्मा उभयतांपैकीं तूं आपल्याला एक पति वर ९,१०. हे देवकन्येप्रमाणें शोभणारे सुकन्ये, तू आह्माला पति वर आणि आपलें यौवन वाया जाऊं देऊ नकोस." हें ऐकून ती सुकन्या त्या दोघा अश्विनी-कुमारांना ह्मणाली ११, "हे पुरुषश्रेष्ठहो, माझ्याविषयीं मनात काहीएक शंका आणू नका; मी पति च्यवनाचेच ठिकाणी रत आहे." तेव्हां पुनरपि ते ह्मणाले "आह्मी देवांचे वैद्य अश्विनीकुमार आहोंत १२. तुझ्या पतीला आह्मी आतां रूपसंपन्न करितों. नंतर तूं तो अथवा आह्मी यांपैकीं कोणाएकाला वर १३ आणि, हे कल्याणि, ही ठरलेली गोष्ट तुझ्या पतीला कळीव" हें त्यांचे वचन श्रवण करून ती आपल्या भार्गव पतीकडे प्राप्त झाली १४ आणि जें त्या उभयतांनीं सांगितलें ते त्या भृगुसुताला तिनें कथन केलें. तें ऐकून च्यवन भार्गव आपल्या भार्येला ह्मणाले कांहीं हरकत नाहीं १५. तेव्हां (तिनें त्या अश्विनीकुमाराकडे येऊन आपल्या पतीबरोबर झालेलें भाषण त्यांना सांगितलें असतां) ते त्या राजपुत्रीला ह्मणाले "तुझा पति ह्या उदकामध्यें प्रवेश करो" हें ऐकतांक्षणीं रूपवान् होण्याची इच्छा करणारा च्यवन त्या उदकांत प्रविष्ट झाला १६

शतां तदा । ततो मुहूर्तादुत्तीर्णाः सर्वे ते सरसस्तदा १७ दिव्यरूपधराः
सर्वे युवानो मृष्टकुण्डलाः । तुल्यवेषधराश्चैव मनसः प्रीतिवर्धनाः १८
तेऽब्रुवन्सहिताः सर्वे वृणीष्वान्यतमं शुभे । अस्माकमीप्सितं भद्रे पतित्वे
वरवर्णिनि १९ यत्र वाप्यभिकामासि तं वृणीष्व सुशोभने । सा समीक्ष्य
तु तान्सर्वांस्तुल्यरूपधरान्स्थितान् । निश्चित्य मनसा बुद्ध्या देवी वव्रे
स्वकं पतिम् २० लब्ध्वा तु च्यवनो भार्यां वयो रूपं च वाञ्छितम् ।
हृष्टोऽब्रवीन्महातेजास्तौ नासत्याविदं वचः २१ यथाहं रूपसंपन्नो वयसा
च समन्वितः २२ कृतो भवद्भ्यां वृद्धः सन्भार्यां च प्राप्तवानिमाम् ।
तस्माद्युवां करिष्यामि प्रीत्याहं सोमपीथिनौ। मिषतो देवराजस्य सत्यमे-
तद्ब्रवीमि वाम् २३ तच्छ्रुत्वा हृष्टमनसौ दिवं तौ प्रतिजग्मतुः । च्यव-
नश्च सुकन्या च सुराविव विजह्रतुः २४ [४८८६] इति श्रीमहाभारते
शतसाहस्र्यां संहितायां वैयासिक्यामारण्यके पर्वणि तीर्थयात्रापर्वणि
लोमशतीर्थयात्रायां सौकन्ये त्रयोविंशाधिकशततमोऽध्यायः ॥ १२३ ॥
लोमश उवाच ॥ ततः शुश्राव शर्यातिर्वयस्थं च्यवनं कृतम् । सुहृष्टः

आणि, हे राजा, त्याच्या मागून अश्विनीकुमारानीही त्या सरोवरामध्यें प्रवेश केला व एका मुहूर्तांत ते सर्वजण त्या सरोवराच्या बाहेर आले १७. ते सर्व तरुण, कानांत कुंडलें घातलेले, मनाला प्रीति उत्पन्न करणारे, दिव्य व एकसारिखीं रूपें धारण करणारे असे होते १८. ते सर्व एकत्र होऊन तिला ह्मणाले " हे शुभे, हे भद्रे, हे वरण्याला योग्य असणाऱ्या स्त्रिये, आमच्यापैकीं तूं एकाला वरावें अशी आमची इच्छा आहे १९. किंवा, हे सुशोभने, जो तुला आवडेल त्याला तूं वर. तेव्हां (हें त्यांचें भाषण श्रवण करिताक्षणीं) त्या सर्वांनीं एकसारिखीं रूपें धारण केलीं आहेत असें पाहून त्या देवीनें मनामध्यें निश्चय करून आपल्या पतीलाच वरिलें २०. ह्याप्रमाणें भार्या, तारुण्य व अभिलषित रूप प्राप्त झाल्यामुळें परम आनंदित झालेला तो महातेजस्वी च्यवन त्या अश्विनीकुमाराना ह्मणाला २१ " ज्याअर्थी मी वृद्ध असतां आपण मला रूपसंपन्न व तरुण करून ही भार्या प्राप्त करून दिली त्याअर्थी देवराजाच्या समक्ष मी मोठ्या आनंदानें तुह्मां उभयतांना सोमप्राशन करणारे करीन हें तुह्माला मी सत्य सत्य सांगत आहें २२,२३. हें त्याचें भाषण श्रवण करून आनंदित झालेले अश्विनीकुमार स्वर्गाला जाण्याकरितां निघून गेले आणि च्यवन व सुकन्या हीं उभयतां देवांप्रमाणें विहार करूं लागलीं २४. ह्याप्रमाणें ०वनपर्वांतील तीर्थयात्रापर्वांपैकीं लोमशतीर्थयात्रेसंबंधीं सौकन्याख्यानाविषयीं एकशें तेविसावा अध्याय समाप्त झाला॥१२३॥

सेनया सार्धमुपायाद्भार्गवाश्रमम् १ च्यवनं च सुकन्यां च दृष्ट्वा देवसु-
ताविव । रेमे सभार्यः शर्यातिः कृत्स्नां प्राप्य महीमिव २ ऋषिणा सत्कृत-
स्तेन सभार्यः पृथिवीपतिः । उपोपविष्टः कल्याणीः कथाश्चक्रे मनो-
रमाः ३ अथैनं भार्गवो राजन्नुवाच परिसांत्वयन् । याजयिष्यामि राजंस्त्वां
संभारानवकल्पय ४ ततः परमसंहृष्टः शर्यातिरवनीपतिः । च्यवनस्य
महाराज तद्वाक्यं प्रत्यपूजयत् ५ प्रशस्तेहनि यज्ञीये सर्वकामसमृद्धिमत् ।
कारयामास शर्यातिर्यज्ञायतनमुत्तमम् ६ तत्रैनं च्यवनो राजन्याजयामास
भार्गवः । अद्भुतानि च तत्राभन्यानि तानि निबोध मे ७ अगृह्णाच्च्यवनः सोम-
मश्विनोर्देवयोस्तदा । तमिन्द्रो वारयामास गृह्णानं स तयोर्ग्रहम् ८ इन्द्र
उवाच ॥ उभावेतौ न सोमार्हौ नासत्याविति मे मतिः । भिषजौ दिवि
देवानां कर्मणा तेन नार्हतः ९ च्यवन उवाच ॥ महोत्साहौ महात्मानौ
रूपद्रविणवत्तरौ । यौ चक्रतुर्मां मघवन्वृन्दारकमिवाजरम् १० ऋते त्वां

लोमश सांगतातः—तदनंतर शर्याति राजा, च्यवनाला (अश्विनीकुमारांनी) तरुण केलें हें ऐकतांच आनंदित होऊन आपल्या सेनेसहवर्तमान त्या भार्गवाच्या आश्रमाला आला १. तेथें च्यवन व देवकन्येप्रमाणें असलेली आपली मुलगी सुकन्या ह्यांना अवलोकन केल्या-मुळें संपूर्ण पृथ्वीच प्राप्त झाली की काय असा आनंदित होऊन शर्याति राजा आपल्या भार्येसहवर्तमान क्रीडा करूं लागला २. तेव्हां ऋषीनें त्या पृथ्वीपतीचें आगत स्वागत केल्यावर तो कल्याणकारक व मनाला आनंद देणाऱ्या गोष्टी बोलत बसला असतां ३ हे युधिष्ठिरा, भार्गव सांत्वनपूर्वक त्याला ह्मणाले " हे शर्याते, मी तुझ्याकडून यजन करवीन, तूं सामग्रीची तयारी कर " ४. तेव्हां, हे महाराज युधिष्ठिरा, पृथ्वीपति शर्या-तीनें हें च्यवन भार्गवाचें वाक्य श्रवण केल्यावर तो परम आनंदित झाला आणि त्यानें त्यांच्या ह्या वाक्यांचें अभिनंदन केलें ५. नंतर यज्ञकर्माला योग्य असा दिवस पाहून शर्यातीनें सर्व यज्ञसामग्रीनें परिपूर्ण असा एक यज्ञमंडप तयार केला ६ व त्या ठिकाणीं, हे राजन्, च्यवन भार्गवानें राजाकडून यज्ञ करविण्यास प्रारंभ केला असतां जे जे अद्भुत प्रकार घडले ते सर्व मी तुला कथन करितों; तूं श्रवण कर ७. च्यवनऋषीनें देव अश्विनीकुमारांकरितां सोमाचा भाग घेतला असें पाहून इंद्रानें त्याचें निवारण केलें ८. तो ह्मणाला " हे ऋषिश्रेष्ठ, हे उभयतां अश्विनीकुमार स्वर्गामध्यें देवांना औषध देण्याचें कर्म करणार असल्यामुळें सोमपानाला योग्य नाहींत असें मला वाटतें ९. च्यवन ह्मणतोः—हे देवेंद्रा, ज्याअर्थी रूप, द्रव्य व उत्साह ह्यांनीं युक्त अशा ह्या महात्म्यांनीं मला देवाप्रमाणें जरारहित करून सोडिलें १० त्याअर्थी तुझ्यावांचून इतर

विबुधांश्चान्यान्कथं वै नार्हतः मवम् । अश्विनावपि देवेन्द्र देवौ विद्धि पुरन्दर ११ इन्द्र उवाच ॥ चिकित्सकौ कर्मकरौ कामरूपसमन्वितौ । लोके चरन्तौ मर्त्यानां कथं सोममिहार्हतः १२ लोमश उवाच ॥ एतदेव यदा वाक्यमाम्रेडयति देवराट् । अनादृत्य ततः शक्रं ग्रहं जग्राह भार्गवः १३ ग्रहीष्यन्तं तु तं सोममश्विनोरुत्तमं तदा । समीक्ष्य बलभिद्देव इदं वचनमब्रवीत् १४ आभ्यामर्थाय सोमं त्वं ग्रहीष्यसि यदि स्वयम् । वज्रं ते प्रहरिष्यामि घोररूपमनुत्तमम् १५ एवमुक्तः स्मयन्निन्द्रमभिवीक्ष्य स भार्गवः । जग्राह विधिवत्सोममश्विभ्यामुत्तमं ग्रहम् १६ ततोऽस्मै प्राहरद्वज्रं घोररूपं शचीपतिः । तस्य प्रहरतो बाहुं स्तम्भयामास भार्गवः १७ तं स्तम्भयित्वा च्यवनो जुहुवे मन्त्रतोऽनलम् । कृत्यार्थी सुमहातेजा देवं हिंसितुमुद्यतः १८ ततः कृत्याथ संजज्ञे मुनेस्तस्य तपोबलात् । मदो नाम महावीर्यो बृहत्कायो महासुरः १९ शरीरं यस्य निर्देष्टुमशक्यं तु सुरासुरैः । तस्यास्यमभवद्घोरं तीक्ष्णाग्रदशनं महत् २०

देवांबरोबर सोमप्राशनाला हे कसे योग्य नाहींत ? कारण, हे पुरंदरा इंद्रा, हे अश्विनीकुमारही देवच आहेत ११. इंद्र ह्मणतोः—हे जरी काम व रूप ह्यांनीं युक्त आहेत तरी चिकित्सारूप कर्म करणारे आणि मृत्युलोकामध्यें संचार करणारे असल्यामुळें ह्या ठिकाणीं सोमपानाला कसे योग्य होतील ? १२ लोमश सांगतातः—हे युधिष्ठिरा, देवराज इंद्र जेव्हां फिरून फिरून तेच तेच बोलूं लागला तेव्हां भार्गवानें त्याच्या बोलण्याकडे लक्ष्य न देतां अश्विनीकुमारांकरितां भाग घेतला १३ व ह्याप्रमाणें त्यानें अश्विनीकुमारांकरितां तो उत्कृष्ट भाग घेतलेला पाहून शत्रुबलाचा नाश करणारा इंद्र " हे च्यवना, जर आपण स्वतांच यांच्याकरितां सोमाचा भाग ग्रहण कराल तर ह्या भयंकर वज्राचा मी आपणाला प्रहार करीन " असें ह्मणाला १४,१५. हें त्या इंद्राचें भाषण श्रवण केल्यावर भार्गवानें इंद्र गर्वभरित झाला आहे असें पाहूनही विधिपूर्वक अश्विनीकुमारांकरितां उत्कृष्ट भाग घेतला १६. तेव्हां शचीपति इंद्र त्याला मारण्याकरितां तें भयंकर वज्र हातामध्यें घेऊन प्रहार करणार तोंच च्यवन भार्गवानें त्याचा बाहु तेथेंच स्तंभन करून टाकिला १७ व ह्याप्रमाणें त्याचें स्तंभन करून तो महातेजस्वी च्यवन देवेंद्राचा वध करण्याच्या उद्देशानें कृत्या उत्पन्न करण्याकरितां मंत्रपूर्वक अग्नीमध्यें हवन करूं लागला १८. तेव्हां त्या मुनीच्या तपोबलानें धिप्पाड व महावीर्यवान् असा मद नांवाचा एक महा असुर कृत्यारूपानें उत्पन्न झाला १९. हे युधिष्ठिरा, देव व असुर ह्यांनाही त्याच्या शरीराचें वर्णन करणें अशक्य आहे. त्याचें

हनुरेकास्थिता त्वस्य भूमावेका दिवं गता । चतस्रश्चायता दंष्ट्रा योजनानां शतं शतम् २१ इतरे तस्य दशना बभूवुर्दशयोजनाः । प्रासादशिखराकाराः शूलाग्रसमदर्शनाः २२ बाहू पर्वतसंकाशावायतावयुतं समौ । नेत्रे रविशशिप्रख्ये वक्त्रं कालाग्निसंनिभम् २३ लेलिहञ्जिह्वया वक्त्रं विद्युच्चपललोलया । व्यात्ताननो घोरदृष्टिर्ग्रसन्निव जगद्बलात् २४ स भक्षयिष्यन्संक्रुद्धः शतक्रतुमुपाद्रवत् । महता घोररूपेण लोकाञ्शब्देन नादयन् २५ [४९११] इति श्रीमहाभारते० मारण्यके पर्वणि तीर्थयात्रापर्वणि लोमशतीर्थयात्रायां सौकन्ये चतुर्विंशत्यधिकशततमोऽध्यायः ॥१२४॥

लोमश उवाच ॥ तं दृष्ट्वा घोरवदनं मदं देवः शतक्रतुः । आयान्तं भक्षयिष्यन्तं व्यात्ताननमिवान्तकम् १ भयात्संस्तम्भितभुजः सृक्किणी लेलिहन्मुहुः । ततोऽब्रवीद्देवराजश्च्यवनं भयपीडितः २ सोमार्हावश्विनावेताव- द्यप्रभृति भार्गव । भविष्यतः सत्यमेतद्वचो विप्र प्रसीद मे ३ न ते मिथ्या

मुख अत्यंत भयंकर असून त्यांत तीक्ष्णाग्रांनीं युक्त असे दांत होते २०. त्याचा खालचा ओठ जमीनीवर असून वरचा आकाशांत गेला होता. त्याला शंभर शंभर योजनें लांबीची एकएक अशा चार दाढा होत्या २१. त्याचे बाकीचे दांत दहा दहा योजनें विस्तृत असून ते प्रासादाच्या शिखराप्रमाणें अथवा शूलाच्या अग्रासारिखे दिसत होते २२. त्याचे बाहु पर्वताप्रमाणे असून दहा हजार योजनेंपर्यंत सारखे लांब गेलेले होते. त्याचे नेत्र चंद्रसूर्यासारिखे व मुख कालाग्नीसारिखें होतें २३. विद्युल्लतेप्रमाणें चंचल असलेल्या जिव्हेने तो आपलें तोंड चाटीत असून जबडा पसरून गरगर डोळे फिरवीत मोठ्या बळानें सर्व जगत् गिळून टाकितो आहे कीं काय असा दिसत होता २४. सारांश, अत्यंत घोर रूप धारण केल्यावर आपल्या शब्दानें दशदिशा नादित करीत करीत क्रुद्ध होऊन इंद्राला भक्षण करण्याकरितां तो त्याजकडे धांवला २५. ह्याप्रमाणे० वनपर्वांतील तीर्थयात्रापर्वापैकीं लोमशतीर्थयात्रेसंबंधीं सौकन्याख्यानाविषयीं एकशें चोविसावा अध्याय समाप्त झाला ॥ १२४ ॥

लोमश ह्मणतातः—तदनंतर प्रत्यक्ष यमच आ पसरून आपल्याला भक्षण करण्याकरितां येत आहे की काय अशा त्या घोरवदन मदासुराला अवलोकन करून शतक्रतु इंद्र १ बाहूंचें स्तंभन झाल्यामुळें वरचेवर आपल्या गालाच्या आंतील प्रांत चाटूं लागला आणि अत्यंत भयभीत होऊन च्यवनाला ह्मणाला २ " हे च्यवना, आजपासून हे अश्विनीकुमार सोमप्राशन करण्याला योग्य झाले आहेत. असें मी आपणाला खरोखर सांगतों. हे विप्रश्रेष्ठा आतां आपण मजवर प्रसन्न व्हा ३. हे ब्रह्मन्,

समारम्भो भवत्स्वेष परो विधिः ३ जानामि चाहं विप्रर्षे न मिथ्या त्वं करि-
ष्यसि ४ सोमार्हावश्विनावेतौ यथा वाद्य कृतौ त्वया । भूय एव तु ते
वीर्यं प्रकाशेदिति भार्गव ५ सुकन्यायाः पितुश्चास्य लोके कीर्तिः प्रथे-
दिति । अतो मयैतद्विहितं तव वीर्यप्रकाशनम् ६ तस्मात्प्रसादं कुरु
मे भवत्वेवं यथेच्छसि । एवमुक्तस्य शक्रेण भार्गवस्य महात्मनः ७ स
मन्युर्व्यगमच्छीघ्रं मुमोच च पुरन्दरम् । मदं च व्यभजद्राजन्पाने स्त्रीषु
च वीर्यवान् ८ अक्षेषु मृगयायां च पूर्वसृष्टं पुनःपुनः । तदा मदं विनि-
क्षिप्य शक्रं संतर्प्य चेन्दुना ९ अश्विभ्यां सहितान्देवान्याजयित्वा च तं
नृपम् । विख्याप्य वीर्यं लोकेषु सर्वेषु वदतां वरः १० सुकन्यया महा-
रण्ये विजहारानुकूलया । तस्यैतद्द्विजसंघुष्टं सरो राजन्प्रकाशते ११
अत्र त्वं सह सोदर्यैः पितॄन्देवांश्च तर्पय । एतद्दृष्ट्वा महीपाल सिकताक्षं
च भारत १२ सैंधवारण्यमासाद्य कुल्यानां कुरु दर्शनम् । पुष्करेषु
महाराज सर्वेषु च जलं स्पृश १३ स्थाणोर्मन्त्राणि च जपन्सिद्धिं

आपण आरंभ केलेलें हें कृत्य असत्य नसून तें परम योग्य आहे. मला असें माहीत आहे कीं, आपण केव्हांच कांहीं असत्य करणार नाहीं ४. आज, हे भार्गवा, हे अश्विनीकुमार सोमप्राशनाला योग्य केले आहेत हे एकवार आपल्या वीर्याचें द्योतकच आहे ५. सुकन्येच्या पित्याची कीर्ति लोकामध्यें विख्यात व्हावी व आपला पराक्रमही कळावा ह्मणूनच हें मी केलें ६ ह्यास्तव, माझ्यावर कृपा करून आपणाला वाटेल तसें करा. ह्याप्रमाणें महात्म्या भार्गवानें शक्राचें वाक्य श्रवण केलें असतां ७ त्या वीर्यवान् भार्गवानें सत्वर क्रोधरहित होऊन इंद्राला मुक्त केलें आणि, हे राजन्, त्या पूर्वी उत्पन्न केलेल्या मदनामक असुराला मद्यप्राशन, स्त्रिया ८, अक्षक्रीडा व मृगया ह्यांचे ठिकाणीं विभागून टाकिलें ह्याप्रमाणें मदाचा विभाग केल्यावर इंद्राला सोमपान करविलें ९. नंतर राजाकडून देवासहवर्तमान अश्विनीकुमारांना भाग देववून त्या भाषण करणाऱ्यांमध्यें श्रेष्ठ अशा च्यवनानें आपलें यश सर्व लोकामध्यें विख्यात केलें १० आणि आपल्या मनोगताप्रमाणें वर्तन करणाऱ्या सुकन्येसहवर्तमान ह्या अरण्यामध्यें विहार करूं लागला. हे राजा, त्याचेंच हें पक्षिसमुदायांनीं युक्त असें सरोवर प्रकाशमान होत आहे ११. हे पृथ्वीपते, ह्या ठिकाणीं तूं आपल्या सहोदरांसहवर्तमान स्नान करून देव व पितर ह्यांचें तर्पण कर. हे भरतकुलोत्पन्ना धर्मराजा, हें अवलोकन करून आणि सिकताक्ष १२ व सैंधवारण्य ह्यांना जाऊन तूं कुल्यांचें दर्शन कर आणि सर्व पुष्करांच्या जलाला स्पर्श कर १३. हे भरतकुलोत्पन्ना, येथें शिवमंत्राचा जप केला असतां

प्राप्यस्यासि भारत । संधिर्द्वयोर्नरश्रेष्ठ त्रेताया द्वापरस्य च १४ अयं हि दृश्यते पार्थ सर्वपापप्रणाशनः। आत्रोपस्पृश चैव त्वं सर्वपापप्रणाशने १५ आर्चीकपर्वतश्चैव निवासो वै मनीषिणाम् । सदाफलः सदास्रोतो मरुतां स्थानमुत्तमम् १६ चैत्याश्चैते बहुविधास्त्रिदशानां युधिष्ठिर । एतच्चन्द्रमसस्तीर्थमृषयः पर्युपासते ॥ वैखानसा वालखिल्याः पावका वायुभोजनाः १७ शृङ्गाणि त्रीणि पुण्यानि त्रीणि प्रस्रवणानि च । सर्वाण्यनुपरिक्रम्य यथाकाममुपस्पृश १८ शांतनुश्चात्र राजेन्द्र शुनकश्च नराधिपः नरनारायणौ चोभौ स्थानं प्राप्ताः सनातम् १९ इह नित्यशया देवाः पितरश्च महर्षिभिः । आर्चीकपर्वते तेपुस्तान्यजस्व युधिष्ठिर २० इह ते वै चरून्प्राश्नन्नृषयश्च विशांपते । यमुना चाक्षयस्रोताः कृष्णश्चेह तपोरतः २१ यमौ च भीमसेनश्च कृष्णा चामित्रकर्शन । सर्वे चात्र गमिष्यामस्त्वयैव सह पाण्डव २२ एतत्प्रस्रवणं पुण्यमिन्द्रस्य मनुजेश्वर । यत्र धाता विधाता च वरुणश्चोर्ध्वमागताः २३ इह तेऽवसन्राजन्क्षान्ता

तुला सिद्धि प्राप्त होईल. ह्या ठिकाणीं त्रेतायुग व द्वापर ह्यांच्या संधीप्रमाणेंच सदोदित काल असतो १४ हा काल सर्व पापाचें निरसन करणारा आहे. तस्मात्, तूं ह्या पापप्रणाशनाच्या उदकाला स्पर्श कर १५. हे धर्मराजा, नेहमीं फलांनीं व उदकांनीं समृद्ध व जेथें सदोदित विचारी लोक वास्तव्य करीत असतात असा हा देवांचें उत्कृष्ट स्थानरूप आर्चीक पर्वत अवलोकन कर १६. हे युधिष्ठिरा, येथें देवांच्या नानाप्रकारच्या यज्ञशाला आहेत. अग्नीसारिखे तेजस्वी व वायु भक्षण करणारे असे वालखिल्य, वैखानस व ऋषि ज्याचें सेवन करीत आहेत तेंच हें चंद्रमस् तीर्थ पहा १७. हे धर्मराजा, ह्या पुण्यकारक तीन शृंगाला (ह्मणजे वाराणशीक्षेत्राला), तीन प्रस्रवणाला (ह्मणजे प्रयागाला) व बाकीच्या सर्व तीर्थांना प्रदक्षिणा करून तूं खुशाल येथें स्नान कर १८. हे नृपश्रेष्ठा, ह्याच ठिकाणीं शांतनु, नरश्रेष्ठ शुनक आणि नरनारायण ह्या उभयतांना सनातन स्थान प्राप्त झालें १९. हे युधिष्ठिरा, ह्या अर्चीक पर्वताचे ठिकाणीं देव व महर्षीसहवर्तमान पितर ह्यांचें नेहमीं वास्तव्य असून त्यांनीं ह्या ठिकाणीं तप केलें आहे. तस्मात् तूं त्यांचें पूजन कर २०. हे प्रजापालका धर्मराजा, येथेंच ऋषींनीं चरूचें भक्षण केलें, यमुनेला अक्षय्य उदकही येथेंच प्राप्त झालें व श्रीकृष्णही ह्याच ठिकाणीं तपश्चर्या करीत होते २१. ह्यास्तव, हे शत्रुनाशका धर्मराजा, भीमसेन, नकुल, सहदेव, द्रौपदी, तूं आणि मी असे सर्व मिळून आपण ह्या ठिकाणीं गमन करूं २२. हे पुरुषश्रेष्ठा, हे पुण्यकारक इंद्रतीर्थ. ह्याच ठिकाणीं धाता, विधाता व वरुण ह्यांना

परमधर्मिणः । मैत्राणामृजुबुद्धीनामयं गिरिवरः शुभः २४ एषा सा यमुना राजन्महर्षिगणसेविता । नानायज्ञचिता राजन्पुण्या पाप-भयापहा २५ अत्र राजा महेष्वासो मांधातायजत स्वयम् । साहदेविश्च कौन्तेय सोमको ददतां वरः २६ [४९३७] इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैय्यासिक्यामारण्यके पर्वणि तीर्थयात्रापर्वणि लोमशतीर्थयात्रायां सौकन्ये पञ्चविंशत्यधिकशततमोऽध्यायः ॥ १२५ ॥

युधिष्ठिर उवाच ॥ मांधाता राजशार्दूलस्त्रिषु लोकेषु विश्रुतः । कथं जातो महाब्रह्मन्यौवनाश्वो नृपोत्तमः १ कथं चैनां परां काष्ठां प्राप्तवानमितद्युतिः । यस्य लोकास्त्रयो वश्या विष्णोरिव महात्मनः २ एतदिच्छाम्यहं श्रोतुं चरितं तस्य धीमतः । यथा मांधातृशब्दश्च तस्य शक्रसमद्युतेः । जन्म चाप्रतिवीर्यस्य कुशलो ह्यसि भाषितुम् ३ लोमश उवाच ॥ शृणुष्वावहितो राजन्राज्ञस्तस्य महात्मनः । यथा मांधातृशब्दो वै लोकेषु परिगीयते ४ इक्ष्वाकुवंशप्रभवो युवनाश्वो महीपतिः । सोयजत्पृथिवी-

---

स्वर्गलोक प्राप्त झाला २३. हे राजा, येथें परम धार्मिक व क्षमाशील असे लोक वास्तव्य करीत असत. हा मित्र बुद्धीने वागणाऱ्या व सरल बुद्धीच्या लोकांचा कल्याणकारक पर्वत पहा २४. हे राजा, महर्षिसमुदायांनीं सेवित, पापसंबंधीं भयाचा नाश करणारी व जिच्या काठीं नानाप्रकारचे यज्ञ झाले आहेत अशी ही पुण्यकारक यमुना नदी अवलोकन कर २५. हे कुंतीपुत्रा युधिष्ठिरा, ह्या ठिकाणीं मोठें धनुष्य धारण करणारा मांधाता, भाषण करणाऱ्यामध्यें श्रेष्ठ सोमक आणि सृजयपुत्र ह्यांनीं स्वतः यज्ञ केले २६. ह्याप्रमाणें॰ वनपर्वांतील तीर्थयात्रापर्वापैकीं लोमशतीर्थयात्रेसंबंधीं सौकन्याख्यानाविषयीं एकशें पचविसावा अध्याय समाप्त झाला ॥ १२५ ॥

युधिष्ठिर ह्मणतो:—हे ब्राह्मणा, नृपश्रेष्ठ यौवनाश्वाचा मुलगा तिन्ही लोकांमध्यें विख्यात होऊन मांधाता ह्मणून कसा प्रसिद्ध झाला? १ आणि ह्या अत्यंत तेजस्वी राजाला महात्म्या विष्णूप्रमाणें तिन्ही लोक वश होऊन तो देवांप्रमाणें श्रेष्ठ असलेल्या ह्या स्थानाला कसा प्राप्त झाला ? २ हें त्या विचारी व इंद्रासारिख्या तेजस्वी राजाचें चरित्र, त्याला प्राप्त झालेल्या मांधातृ शब्दाचें कारण आणि त्या अतुल पराक्रमी राजाचें जन्म हीं सर्व श्रवण करण्याची माझी इच्छा आहे व आपणही कथन करण्यांत कुशल आहांत. करितां, तें मला हे मुनिश्रेष्ठ, कथन करा ३. लोमश ह्मणतात:—हे राजा, त्या महात्म्या राजाला त्रैलोक्यामध्यें मांधाता हें नांव कसें प्राप्त झालें हें मी तुला कथन करितों तें तूं लक्ष्यपूर्वक श्रवण कर ४. हे युधिष्ठिरा, इक्ष्वाकु-

पालः क्रतुभिर्भूरिदक्षिणैः ५ अश्वमेधसहस्रं च प्राप्य धर्मभृतां वरः ।
अन्यैश्च क्रतुभिर्मुख्यैरयजत्स्वाप्तदक्षिणैः ६ अनपत्यस्तु राजर्षिः स
महात्मा महाव्रतः । मन्त्रिष्वाधाय तद्राज्यं वननित्यो बभूव ह ७ शास्त्र-
दृष्टेन विधिना संयोज्यात्मानमात्मवान् । स कदाचिन्नृपो राजन्नुपवा-
सेन दुःखितः ८ पिपासाशुष्कहृदयः प्रविवेशाश्रमं भृगोः । तामेव
रात्रिं राजेन्द्र महात्मा भृगुनन्दनः ९ इष्टिं चकार सौद्युम्नेर्महर्षिः पुत्रका-
रणात् । संभृतो मन्त्रपूतेन वारिणा कलशो महान् १० तत्रातिष्ठत
राजेन्द्र पूर्वमेव समाहितः । यत्प्राश्य प्रसवेत्तस्य पत्नी शक्रसमं सुतम् ११
तं न्यस्य वेद्यां कलशं सुषुपुस्ते महर्षयः । रात्रिजागरणाच्छ्रान्तान्सौ-
द्युम्निः समतीत्य तान् १२ शुष्ककण्ठः पिपासार्तः पानीयार्थी भृशं
नृपः । तं प्रविश्याश्रमं शांतः पानीयं सोऽभ्ययाचत १३ तस्य श्रान्तस्य
शुष्केण कण्ठेन क्रोशतस्तदा । नाश्रौषीत्कश्चन तदा शकुनेरिव वाशतः १४
ततस्तं कलशं दृष्ट्वा जलपूर्णं स पार्थिवः । अभ्यद्रवत वेगेन पीत्वा

वंशांत जन्मलेला युवनाश्व ह्मणून एक पृथ्वीपति होता. त्या भूपतीनें मोठमोठाल्या दक्षिणा देऊन यज्ञ केले ५. त्या धर्मनिष्ठांमध्यें श्रेष्ठ असलेल्या राजानें एक हजार अश्वमेध यज्ञ करून यथेच्छ दक्षिणांनीं युक्त असे आणखीही पुष्कळ यज्ञ केले ६; परंतु, त्या महात्म्या व्रतस्थ राजर्षीला अपत्य नसल्यामुळें त्यानें तें राज्य आपल्या मंत्र्यांच्या स्वाधीन करून आपण वनांत राहण्याकरितां गमन केलें ७. त्या ठिकाणीं त्यानें आपलें अंतःकरण स्थिर करून आपल्या उपास्य देवतेचें व आपलें ऐक्य करून घेतलें आणि (अशारीतीनें वर्तन करीत असतां) एके दिवशीं, हे राजा, तो उपोषणानें दुःखित होऊन ८ तृषेनें कंठ कोरडा झाल्यामुळें भृगूच्या आश्रमामध्यें प्रविष्ट झाला आणि, हे राजश्रेष्ठा धर्मराजा, त्याच रात्रीं महात्म्या भृगुनंदनानें ९ राजश्रेष्ठ युवनाश्वालाच पुत्र व्हावा ह्मणून इष्टि करून पूर्वींच अभिमंत्रण करून पवित्र केलेल्या उदकानें भरलेला व ज्यांतील उदक त्या राजाच्या पत्नीनें प्राशन केलें असतां तिला इंद्रासारिखा पुत्र होईल असा एक कलश त्या ठिकाणीं ठेविला होता १०, ११. रात्रीच्या जाग्रणानें दमून गेलेले महर्षि तो कलश वेदीवर ठेवून निजले. तेव्हां तो युवनाश्व तेथें आला व त्यांना ओलांडल्यावर १२ तृषेनें कंठ शुष्क होऊन गेलेल्या त्या राजानें शांतपणें त्या आश्रमांत प्रवेश केला आणि प्राशन करण्याकरितां उदक मागितलें १३; परंतु, कंठ शुष्क होऊन दमून गेल्यामुळें तो मोठ्यानें ओरडत असतांही शब्द करणाऱ्या पक्ष्यांचें ओरडणें ज्याप्रमाणें कोणी ऐकत नाहीं त्याप्रमाणें त्याचें ओरडणें

चाम्भो व्यवासृजत् १५ स पीत्वा शीतलं तोयं पिपासार्तो महीपतिः । निर्वाणमगमद्धीमान्सुसुखी चाभवत्तदा १६ ततस्ते प्रत्यबुध्यन्त मुनयः स तपोधनाः । निस्तोयं तं च कलशं ददृशुः सर्व एव ते १७ कस्य कर्मेदमिति ते पर्यपृच्छन्समागताः । युवनाश्वो ममेत्येवं सत्यं समभिपद्यत १८ न युक्तमिति तं प्राह भगवान्भार्गवस्तदा । सुतार्थं स्थापिता ह्यापस्तपसा चैव संभृताः १९ मया ह्यत्राहितं ब्रह्म तप आस्थाय दारुणम् । पुत्रार्थं तव राजर्षे महाबलपराक्रम २० महाबलो महावीर्यस्तपोबलसमन्वितः । यः शक्रमपि वीर्येण गमयेद्यमसादनम् २१ अनेन विधिना राजन्मयैतदुपपादितम् । अब्भक्षणं त्वया राजन्न युक्तं कृतमद्य वै २२ न त्वद्य शक्यमस्माभिरेतत्कर्तुमतोन्यथा । नूनं दैवकृतं ह्येतद्यदेवं कृतवानसि २३ पिपासितेन याः पीता विधिमन्त्रपुरस्कृताः । आपस्त्वया महाराज मत्तपोवीर्यसंभृताः २४ ताभ्यस्त्वमात्मना पुत्रमीदृशं जनयिष्यसि ।

कोणी ऐकिलें नाहीं १४. (असें पाहून) त्या पृथ्वीपतीनें तो उदकानें भरलेला कलश अवलोकन केला आणि वेगानें तिकडे जाऊन त्यांतील सर्व उदक प्राशन करून टाकिलें १५. ह्याप्रमाणें तृषाक्रांत झालेल्या महीपतीनें त्या थंडगार उदकाचें प्राशन केल्यावर त्या बुद्धिमान् राजाला अत्यंत आनंद होऊन समाधान वाटलें १६. नंतर (प्रातःकालीं) ते सर्व तपोधन मुनि जागे होऊन पहातात तों त्या कलशांत उदक नाहीं असें त्यांना आढळून आलें १७. तेव्हां " हें कोणाचें कृत्य आहे " असें ते सर्व एकत्र होऊन ह्मणाले असतां " हें माझें कृत्य आहे " असें त्या युवनाश्व राजानें खरेखरें त्यांना सांगितलें १८. नंतर भगवान् भार्गव ह्मणाले " हें बरोबर झालें नाहीं. कारण आह्मी तपःपूर्वक हें उदक पुत्राकरितां स्थापन केलें असून १९ मी स्वतः अत्यंत घोर तप करून, हे पराक्रमीश्रेष्ठा बळवान् राजा, तुला पुत्रप्राप्ति होण्यासाठीं ह्यामध्यें ब्रह्मतेजही स्थापन केलें होतें २०. ह्या योगानें जो मुलगा होईल तो महावीर्यवान्, मोठा बलवान्, तपाच्याबलानें युक्त व आपल्या पराक्रमानें इंद्रालाही यमसदनाला पाठविणारा असा व्हावा २१ ह्मणून मीं हें उदक विधिपूर्वक, हे राजा, येथें ठेविलें होतें; तें आज तूं प्राशन केलेंस हें बरोबर झालें नाहीं २२. आतां ही गोष्ट फिरविण्याविषयीं आमच्यापैकीं कोणीही समर्थ नसून खरोखर हें दैवानेंच केलेलें आहे २३. हे महाराज, तृषाक्रांत होऊन ज्या उदकाचें तूं प्राशन केलेंस तें उदक विधीनें मंत्रपूर्वक अभिमंत्रण केलेलें असून माझें तप व वीर्य ह्यांनींही तें युक्त होतें २४. सारांश, ह्या उदकापासून तुला मी सांगितल्याप्रमाणेंच मुलगा होईल. करितां आह्मी आतां तुझ्याकरितां अत्यंत

विधास्यामो वयं तत्र तवेष्टिं परमाद्भुताम् २५ यथा शक्रसमं पुत्रं जनयिष्यसि वीर्यवान् । गर्भधारणजं वापि न खेदं समवाप्स्यसि २६ ततो वर्षशते पूर्णे तस्य राज्ञो महात्मनः । वामं पार्श्वं विनिर्भिद्य सुतः सूर्य इव स्थितः २७ निश्चक्राम महातेजा न च तं मृत्युराविशत् । युवनाश्वं नरपतिं तदद्भुतमिवाभवत् २८ ततः शक्रो महातेजास्तं दिदृक्षुरुपागमत् । ततो देवा महेन्द्रं तमपृच्छन्धास्यतीति किम् २९ प्रदेशिनीं ततोऽस्यास्ये शक्रः समभिसंदधे । मामयं धास्यतीत्येवं भाषिते चैव वज्रिणा ३० मांधातेति च नामास्य चक्रुः सेन्द्रा दिवौकसः ३१ प्रदेशिनीं शक्रदत्तामास्वाद्य स शिशुस्तदा । अवर्धत महातेजाः किष्कूंस्त्रयोदश ३२ देवास्तं सधनुर्वेदा दिव्यान्यस्त्राणि चेश्वरम् । उपतस्थुर्महाराज ध्यातमात्रस्य सर्वशः ३३ आजगवं नाम धनुः शराः शृङ्गोद्भवाश्च ये । अभेद्यं कवचं चैव सद्यस्तमुपशिश्रियुः ३४ सोऽभिषिक्तो मघवता स्वयं शक्रेण

अद्भुत अशी इष्टि करितों २५. (तिच्या योगानें) तुला वीर्यवान् व इंद्रासारिखा पुत्र होऊन गर्भधारणेसंबंधीं यत्किंचितूही त्रास व्हावयाचा नाहीं २६. तदनतर, हे युधिष्ठिरा, शंभर वर्षें भरलीं असतां त्या महात्म्या राजाच्या डाव्या बाजूचा उदराचा भाग फोडून सूर्याप्रमाणे तेजस्वी असा एक मुलगा उत्पन्न झाला २७ व (मातृस्तन्य नसतांनाही) तो मरण पावला नाहीं हें पाहून त्या नरश्रेष्ठ युवनाश्व राजाला मोठें आश्चर्य वाटलें २८. नंतर महातेजस्वी इंद्र त्या मुलाला अवलोकन करण्याकरितां प्राप्त झाला असतां देव त्या महेंद्राला ह्मणाले " हा (दुग्ध नसल्यामुळें) आतां काय प्राशन करील ? " २९. तेव्हां आपली तर्जनी त्याच्या मुखामध्ये घालून " माझें प्राशन करील " असें वज्रधारण करणाऱ्या इंद्रानें ह्मटलें असतां स्वर्गामध्यें वास्तव्य करणाऱ्या देवानीं त्याचें मांधाता ह्मणून नांव ठेविलें ३०, ३१. ह्याप्रमाणें इंद्रानें मुखांत घातलेली ती तर्जनी त्या मुलानें चाखिली असतां, हे युधिष्ठिरा, तो महातेजस्वी तेरा विती किंवा तरा हात वाढला[1] ३२ आणि इंद्रानें हा असा व्हावा असें मनांत आणितांक्षणी, हे महाराज धर्मराजा, धनुर्वेदासहवर्तमान सर्व वेद व दिव्य अस्त्रें त्या श्रेष्ठ राजपुत्रासमोर येऊन उभीं राहिलीं आणि आजगव नांवाचें धनुष्य, स्वर्गांत उत्पन्न झालेले बाण आणि अभेद्य कवच हीं सर्वही तत्क्षणीं त्याच्या समोर प्राप्त झालीं ३३, ३४. हे भरतकुलोत्पन्ना धर्मराजा त्या वेळीं

---

१ ह्या श्लोकामध्यें मूळात " किष्कु " शब्द असून त्याचा अर्थ अमरकारानीं " किष्कुर्हस्ते वितस्तौ च " असा केला आहे व तेरा हात किंवा तेरा विती ह्या दोहोंपैकी कोणते एक निश्चित करविण्यास प्रमाण नाहीं सबब दोन्ही अर्थ घेऊन भाषांतर करावे लागले.

भारत। धर्मेण व्यजयल्लोकांस्त्रीन्विष्णुरिव विक्रमैः ३५ तस्याप्रतिहतं चक्रं प्रावर्तत महात्मनः। रत्नानि चैव राजर्षिः स्वयमेवोपतस्थिरे ३६ तस्यैवं वसुसंपूर्णा वसुधा वसुधाधिप। तेनेष्टं विविधैर्यज्ञैर्बहुभिः स्वाप्तदक्षिणैः ३७ चितचैत्यो महातेजा धर्मान्प्राप्य च पुष्कलान्। शक्रस्यार्धासनं राजँल्लब्धवानमितद्युतिः ३८ एकाह्नात्पृथिवी तेन धर्मनित्येन धीमता। विजिता शासनादेव सरत्नाकरपत्तना ३९ तस्य चैत्यैर्महाराज क्रतूनां दक्षिणावताम्। चतुरन्ता मही व्याप्ता नासीत्किंचिदनावृतम् ४० तेन पद्मसहस्राणि गवां दश महात्मना। ब्राह्मणानां महाराज दत्तानीति प्रचक्षते ४१ तेन द्वादशवार्षिक्यामनावृष्ट्यां महात्मना। वृष्टं सस्यविवृद्ध्यर्थं मिषतो वज्रपाणिनः ४२ तेन सोमकुलोत्पन्नो गान्धाराधिपतिर्महान्। गर्जन्निव महामेघः प्रमथ्य निहतः शरैः ४३ प्रजाश्चतुर्विधास्तेन त्राता राजन्कृतात्मना। तेनात्मतपसा लोकास्तापिताश्चातितेजसा ४४ तस्यैतद्देवयजनं स्थानमादित्यवर्चसः। यस्य पुण्यतमे देशे कुरु-

---

इंद्रानें स्वतः त्याला राज्याभिषेक केला असतां त्यानें विष्णूप्रमाणें आपल्या पराक्रमानें धर्मपूर्वक त्रैलोक्य आपल्या वश करून घेतलें ३५. त्या महात्म्याची आज्ञा कोठेंही पाळली जात नव्हती असें नसून मोठमोठालीं रत्नें आपण होऊन त्या राजर्षीकडे येत असत ३६. हे पृथ्वीपते धर्मराजा, त्याच राजाची ही द्रव्यानें परिपूर्ण झालेली पृथ्वी होय. त्यानें पुष्कळ दक्षिणा देऊन नानाप्रकारचे यज्ञ केले ३७. त्या महातेजस्वी राजानें येथें चयन नांवाचा क्रतु करून पुष्कळ धर्म प्राप्त करून घेतला आणि त्या महातेजस्वी राजानें आपल्याला इंद्राचें अर्धें आसन प्राप्त करून घेतलें ३८. त्या धर्मनिष्ठ व विचारी राजानें आपल्या पराक्रमानें समुद्र व सर्व नगरें ह्यांसहवर्तमान पृथ्वीला एका दिवसांत जिंकून टाकिलें ३९. त्यानें मोठमोठ्या दक्षिणा देऊन केलेल्या यज्ञांतील स्तंभांनीं सर्व पृथ्वी व्यापून टाकिली होती; तिचा थोडासुद्धां प्रदेश रिकामा नव्हता ४०. हे महाराज युधिष्ठिरा, असें सांगतात कीं, त्या महात्म्या राजानें ब्राह्मणांना दहा हजार पद्म गाई दिल्या ४१. त्या महात्म्यानें बारा वर्षांचें अवर्षण पडलें असतां वज्र धारण करणाऱ्या इंद्राच्या समक्ष धान्याची वृद्धि व्हावी ह्मणून पर्जन्यवृष्टि केली ४२ त्यानें सोमकुलांत उत्पन्न झालेल्या व मोठ्या मेघाप्रमाणें गर्जना करणाऱ्या गांधाराधिपति वीराचा तीक्ष्ण बाणांनीं नाश करून टाकिला ४३. त्या पुण्यवान् राजानें आपल्या चतुर्विध प्रजांचें रक्षण करून आपलें तप व तेज ह्यांच्या योगानें सर्व लोकांना दिपवून टाकिलें ४४. त्याच सूर्याप्रमाणें तेजस्वी राजाचें कुरुक्षेत्राच्या मध्यभागाला पुण्यरूप

क्षेत्रस्य मध्यतः ४५ एतत्ते सर्वमाख्यातं मांधातुश्चरितं महत् । जन्म चार्ग्य्यं महीपाल यन्मां त्वं परिपृच्छसि ४६ वैशंपायन उवाच ॥ एवमुक्तः स कौन्तेयो लोमशेन महर्षिणा । पप्रच्छानन्तरं भूयः सोमकं प्रति भारत ४७ [४९८४] इति श्रीमहाभारते० मारण्यके पर्वणि तीर्थयात्रापर्वणि लोमशतीर्थयात्रायां मांधातृपाख्याने षड्विंशत्यधिकशततमोऽध्यायः ॥ १२६ ॥

युधिष्ठिर उवाच ॥ कंथवीर्यः स राजाभूत्सोमको वदतांवर । कर्माण्यस्य प्रभावं च श्रोतुमिच्छामि तत्त्वतः १ लोमश उवाच ॥ युधिष्ठिरासीन्नृपतिः सोमको नाम धार्मिकः । तस्य भार्याशतं राजन्सदृशीनामभूत्तदा २ स वै यत्नेन महता तासु पुत्रं महीपतिः । कंचिन्नासादयामास कालेन महता ह्यपि ३ कदाचित्तस्य वृद्धस्य घटमानस्य यत्नतः । जन्तुर्नाम सुतस्तस्मिन्स्त्रीशते समजायत ४ तं जातं मातरः सर्वाः परिवार्य समासत । सततं पृष्ठतः कृत्वा कामभोगान्विशांपते ५ ततः पिपीलिका जन्तुं कदाचिददशत्स्फिचि । स दष्टो व्यनदन्नादं तेन दुःखेन बालकः ६ ततस्ता मातरः सर्वाः प्राक्रोशन्भृशदुःखिताः । प्रवार्य जन्तुं

स्थलाचे ठिकाणीं असलेलें हें देवांनें यजन करण्याचें स्थान होय ४५. हे महाराजा युधिष्ठिरा, ह्याप्रमाणें त्या महात्म्या मांधात्या राजाचें उत्कृष्ट जन्म व चरित्र जें तूं मला विचारिलेंस तें मीं तुला कथन केलें ४६. वैशंपायन सांगतातः—ह्याप्रमाणें महर्षि लोमशानें कुंतीपुत्र धर्मराजाला सांगितलें असतां, हे भरतकुलोत्पन्ना जनमेजय, पुनरपि धर्मराजानें त्यांना सोमकाविषयीं विचारिलें ४७. ह्याप्रमाणें० महामुनिव्यासप्रणीत लक्षग्रंथात्मक० वनपर्वांतील तीर्थयात्रापर्वांपैकीं लोमशतीर्थयात्रेसंबंधीं मांधात्याच्या उपाख्यानाविषयीं एकशें सव्विसावा अध्याय समाप्त झाला ॥ १२६ ॥

युधिष्ठिर ह्मणतातः—हे भाषण करणाऱ्यांमध्यें श्रेष्ठ लोमशमुने, त्या सोमकराजाचीं कर्मे, त्याचा प्रभाव व त्याचें बल कसें होतें हें सर्व इत्थंभूत श्रवण करण्याची माझी इच्छा आहे १. लोमश ह्मणतातः—हे युधिष्ठिरा, सोमकनांवाचा एक मोठा धार्मिक राजा होता व त्याला एकीसारिखी एक अशा शंभर भार्या होत्या २. त्या महीपतीनें पुत्रसंतानाकरितां पुष्कळ दिवस यत्न केला; परंतु, त्या भार्यांचे ठिकाणीं त्याला पुत्र झाला नाहीं ३. पुढें कोणे एके वेळीं यत्न करणाऱ्या त्या वृद्ध राजाला त्या शंभर स्त्रियांचे ठिकाणीं जंतु नांवाचा एक मुलगा झाला ४. तेव्हां, हे प्रजापालका धर्मराजा, त्या सर्व स्त्रिया कामोपभोग सेवन करण्याचे मार्ग टाकून त्या मुलाला गराडा घालून बसू लागल्या ५. असें चाललें असतां एकदां त्या जंतूच्या कमरेला एक मुंगी चावली व त्या

सहसा स शब्दस्तुमुलोभवत् ७ तमार्तनादं सहसा शुश्राव स महीपतिः।
अमात्यपर्षदो मध्ये उपविष्टः सहर्त्विजा ८ ततः प्रस्थापयामास किमेत-
दिति पार्थिवः। तस्मै क्षत्ता यथावृत्तमाचचक्षे सुतं प्रति ९ त्वरमाणः
स चोत्थाय सोमकः सह मन्त्रिभिः। प्रविश्यान्तःपुरं पुत्रमाश्वासयद-
रिंदमः १० सान्त्वयित्वा तु तं पुत्रं निष्क्रम्यान्तःपुरान्नृपः। ऋत्विजा
सहितो राजन्सहामात्य उपाविशत् ११ सोमक उवाच॥ धिगस्त्विह-
कपुत्रत्वमपुत्रत्वं वरं भवेत्। नित्यातुरत्वाद्भूतानां शोक एवैकपुत्रता १२
इदं भार्याशतं ब्रह्मन्परीक्ष्य सदृशं प्रभो। पुत्रार्थिना मया वोढं न तासां
विद्यते प्रजा १३ एकः कथंचिदुत्पन्नः पुत्रो जन्तुरयं मम। यतमानासु
सर्वासु किं नु दुःखमतःपरम् १४ वयश्च समतीतं मे सभार्यस्य द्विजो-
त्तम। आसां प्राणाः समायत्ता मम चात्रैकपुत्रके १५ स्यात्तु कर्म
तथायुक्तं येन पुत्रशतं भवेत्। महता लघुना वापि कर्मणा दुष्करेण
वा १६ ऋत्विगुवाच॥ अस्ति चैतादृशं कर्म येन पुत्रशतं भवेत्। यदि

वेदनमुळें त्या बालकानें मोठ्यानें किंकाळी फोडली ६. तें ऐकून अत्यंत दुःखित झालेल्या व त्याला गराडा घालून बसलेल्या त्याच्या सर्व माता ओरडूं लागल्या व त्यामुळें मोठा भयंकर शब्द झाला ७ आणि तो ऋत्विजांसहवर्तमान अमात्यांच्या सभेमध्यें बसलेल्या त्या भूपतीनें श्रवण केला ८ आणि हें काय आहे त्याचा शोध घेण्याकरितां आपल्या द्वारपालाला तिकडे पाठविलें असतां त्यानें पुत्रसंबंधीं झालेलें वृत्त त्याला कथन केलें ९. तेव्हां तो शत्रुनाशक सोमकराजा मंत्र्यांसहवर्तमान मोठ्या त्वरेनें उठला आणि अंतःपुरांत जाऊन आपल्या पुत्राला समजावूं लागला १०. ह्याप्रमाणें पुत्राचें सांत्वन करून अंतःपुरांतून बाहेर आल्यावर ऋत्विजांसहवर्तमान तो पुनरपि त्या अमात्यांच्या सभेंत बसला आणि ह्मणाला ११ " धिक्कार असो ह्या एकपुत्रत्वाला. ह्यापेक्षां अपुत्रत्व असणें मला बरें वाटतें. कारण, एक पुत्र असलेले लोक निरंतर दुःखित असल्यामुळें मला एक पुत्रत्व असणें शोकच वाटतो १२. हे प्रभो, हे ब्रह्मन्, पुत्र व्हावा ह्मणून एक एक स्त्रीची परीक्षा करून शंभर स्त्रिया मी वरल्या; परंतु, त्यांपैकीं एकीलाही पुत्र नाहीं १३. कसा तरी एक जंतु ह्मणून मला मुलगा झाला आहे. त्याच्याकरितां त्या सर्वजणी यत्नपूर्वक खालीं वर पहात आहेत. तेव्हां ह्यापेक्षां अधिक दुःख तें कोणतें असावें १४. हे द्विजश्रेष्ठा, माझें व माझ्या भार्यांचें वय तर निघून गेलें आणि ह्या सर्वांचें तर त्या एकाच पुत्राचे ठिकाणीं प्राण गुंतून राहिले आहेत १५. करितां, ज्याच्या योगानें मला शंभर मुलगे होतील असें लहान अथवा मोठें, व दुष्कर अथवा सुकर असें एखादें कर्म असेल

शक्तोषि तत्कर्तुमथ वक्ष्यामि सोमक १७ सोमक उवाच ॥ कार्यं वा यदि वाकार्यं येन पुत्रशतं भवेत् । कृतमेवेति तद्विद्धि भगवान्प्रब्रवीतु मे १८ ऋत्विगुवाच ॥ यजस्व जन्तुना राजंस्त्वं मया वितते क्रतौ । ततः पुत्रशतं श्रीमद्भविष्यत्यचिरेण ते १९ वपायां हूयमानायां धूममाघ्राय मातरः । ततस्ताः सुमहावीर्याञ्जनयिष्यन्ति ते सुतान् २० तस्यामेव तु ते जन्तुर्भविता पुनरात्मजः । उत्तरे चास्य सौवर्णं लक्ष्म पार्श्वे भविष्यति २१ [५००५] इति श्रीमहाभारते० मारण्यके पर्वणि० लोमशतीर्थयात्रायां जन्तूपाख्याने सप्तविंशत्यधिकशततमोऽध्यायः ॥ १२७ ॥

सोमक उवाच ॥ ब्रह्मन्यद्यद्यथा कार्यं तत्कुरुष्व तथा तथा । पुत्रकामतया सर्वं करिष्यामि वचस्तव १ लोमश उवाच ॥ ततः स याजयामास सोमकं तेन जन्तुना । मातरस्तु बलात्पुत्रमपाकर्षुः कृपान्विताः २ हाहताः स्मेति वाशन्त्यस्तीव्रशोकसमाहताः । रुदन्त्यः करुणं चापि गृहीत्वा दक्षिणे करे ३

तर मला सांगा १६. ऋत्विज ह्मणतो:–हे सोमका, जर तू करण्याला समर्थ असशील तर ज्याच्या योगानें तुला शंभर पुत्र होतील असा एक उपाय आहे व तो मी तुला सांगतों १७. सोमक ह्मणतो:–हे ब्रह्मन्, ज्याच्या योगाने शभर मुलगे होतील असा उपाय योग्य किंवा अयोग्य असला तथापि मी तो केलाच असे आपण समजून मला सांगा १८. ऋत्विज ह्मणतो:–हे महाराजा, मीं आरंभ केलेल्या यज्ञाचे ठिकाणीं माझ्यासहवर्तमान तू आपल्या जंतूनामक पुत्राचें हवन कर ह्मणजे तुला देदीप्यमान असे शंभर मुलगे होतील १९. हे भूपते, त्या यज्ञांत वपेचा होम चालला असतांना सर्व मातांनीं त्या धूमाचें अवग्रहण केलें ह्मणजे त्यांना अत्यंत वीर्यवान् असे शभर मुलगे होतील २० आणि जिचे ठिकाणीं हल्लीं जंतू झाला आहे तिचेच ठिकाणीं तो पुनरपि तुला प्राप्त होईल; परंतु, त्याच्या उत्तर पार्श्वाला एक सुवर्णाचें चिन्ह होईल २१. ह्याप्रमाणें० वनपर्वांतील तीर्थयात्रापर्वांपैकीं लोमशतीर्थयात्रेसंबंधी जंतूच्या आख्यानाविषयीं एकशें सत्ताविसावा अध्याय समाप्त झाला ॥ १२७ ॥

सोमक ह्मणतो:—हे ब्रह्मन्, जें जें जसें जसें करावयाचें असेल तें तें तसें तसें आपण करा; मी पुत्रकामनेनें सर्व आपलें वचन पालन करीन १. लोमश ह्मणतात:–तदनंतर त्या ब्राह्मणानें सोमकाला त्या जंतूचें हवन करावयास लाविलें असतां त्या माता कृपायुक्त होऊन बलात्कारानें आपल्या पुत्राला ओढूं लागल्या २ आणि त्या मुलाला आपल्या उजव्या हातामध्यें घेऊन करुणस्वरानें अतिशय शोक झाल्यामुळें रोदन करीत करीत " आमचा नाश झाला " असें ह्मणून आक्रोश करूं लागल्या ३.

सव्ये पाणौ गृहीत्वा तु याजकोपि स्म कर्षति। कुररीणामिवार्तानां समाकृष्य तु तं सुतम् ४ विशस्य चैनं विधिवद्वपामस्य जुहाव सः । वपायां हूयमानायां गन्धमाघ्राय मातरः ५ आर्ता निपेतुः सहसा पृथिव्यां कुरुनन्दन । सर्वाश्च गर्भानलभंस्ततस्ताः परमाङ्गनाः ६ ततो दशसु मासेषु सोमकस्य विशांपते । जज्ञे पुत्रशतं पूर्णं तासु सर्वासु भारत ७ जन्तुर्ज्येष्ठः समभवज्जनित्र्यामेव पार्थिव । स तासामिष्ट एवासीन्न तथा ते निजाः सुताः ८ तच्च लक्षणमस्यासीत्सौवर्णं पार्श्व उत्तरे । तस्मिन्पुत्रशते चाग्र्यः स बभूव गुणैरपि ९ ततः स लोकमगमत्सोमकस्य गुरुः परम् । अथ काले व्यतीते तु सोमकोप्यगमत्परम् १० अथ तं नरके घोरे पच्यमानं ददर्श सः । तमपृच्छत्किमर्थं त्वं नरके पच्यसे द्विज ११ तमब्रवीद्गुरुः सोथ पच्यमानोऽग्निना भृशम् । त्वं मया याजितो राजंस्तस्येदं कर्मणः फलम् १२ एतच्छ्रुत्वा स राजर्षिर्धर्मराजानमब्रवीत् । अहमत्र प्रवेक्ष्यामि मुच्यतां मम याजकः १३ मत्कृते हि महाभागः पच्यते

तेव्हां याजकानें, त्या मुलाला उजव्या हातामध्यें धरून त्या स्त्रिया कुररीप्रमाणें ओरडत असतां, त्यांच्या हातांतून त्या मुलाला हिसकावून घेतलें ४ आणि त्याचा वध करून त्याचें विधिपूर्वक हवन केलें असतां त्या मातांनीं हुत होणाऱ्या वपेचें अवघ्राण करितांक्षणीं ५, हे कुरुवंशजश्रेष्ठा, त्या एकाएकीं पृथ्वीतलावर दुःखित होऊन पडल्या आणि नंतर त्या परम सुंदर स्त्रिया (कांहीं काळानें) गर्भिणी झाल्या ६. तदनंतर, हे भरतकुलोत्पन्ना प्रजापालका धर्मराजा, दहा महिने परिपूर्ण झाल्यावर त्या सोमकराजाला त्या सर्व स्त्रियांचे ठिकाणीं शंभर मुलगे झाले ७ व जंतुही त्याची जी वडिल पत्नी तिचेच ठिकाणीं उत्पन्न झाला. तो सर्वांत श्रेष्ठ होता आणि तोच त्याच्या इतर पत्न्यांना आपल्या स्वतःच्या पुत्रापेक्षां जास्त आवडत असे ८. त्याचप्रमाणें त्याच्या उत्तर पार्श्वाचे ठिकाणीं सुवर्णाचें चिन्ह असून गुणांनींही तो सर्वांपेक्षां श्रेष्ठ झाला ९. तदनंतर तो सोमकाचा गुरु ऋत्विज परलोकाला गेल्यावर बराचसा काल लोटला असतां सोमकही स्वर्गलोकाला गेला १० आणि तेथें आपला ऋत्विज घोर नरकाचे ठिकाणीं पतन पावला आहे असें पाहून, "हे द्विजश्रेष्ठ, आपण नरकामध्यें कां पतन पावलात ?" म्हणून त्यानें त्याला विचारिलें ११. तेव्हां तो नरकांत पतन पावलेला व अग्नीनें अत्यंत संतप्त झालेला गुरु त्याला म्हणाला " हे राजन्, मी तुझ्याकडून यजन करविलें त्याच कर्माचें हें फळ होय " १२. हें ऐकून, " हे धर्मराजा, मी ह्या स्थलाचें ठिकाणीं प्रवेश करितों; माझ्या गुरूची येथून मुक्तता करा १३. हा मजकरितांच महा-

नरकाग्निना । धर्म उवाच ॥ नान्यः कर्तुः फलं राजन्नुपभुङ्क्ते कदाचन । इमानि तव दृश्यन्ते फलानि वदतां वर १४ सोमक उवाच ॥ पुण्यान्न कामये लोकानृतेहं ब्रह्मवादिनम् । इच्छाम्यहमनेनैव सह वस्तुं सुरालये १५ नरके वा धर्मराज कर्मणास्य समो ह्यहम् । पुण्यापुण्यफलं देव सममस्त्वावयोरिदम् १६ धर्मराज उवाच ॥ यद्येवमीप्सितं राजन्भुङ्क्ष्वास्य सहितः फलम् । तुल्यकालं सहानेन पश्चात्प्राप्स्यसि सद्गतिम् १७ लोमश उवाच ॥ स चकार तथा सर्वं राजा राजीवलोचनः । क्षीणपापश्च तस्मात्स विमुक्तो गुरुणा सह १८ लेभे कामाञ्शुभात्राजन्कर्मणा निर्जितान्स्वयम् । सह तेनैव विप्रेण गुरुणा सगुरुप्रियः १९ एष तस्याश्रमः पुण्यो य एषोग्रे विराजते । क्षान्त उष्यात्र षड्रात्रं प्राप्नोति सुगतिं नरः २० एतस्मिन्नपि राजेन्द्र वत्स्यामो विगतज्वराः । षड्रात्रं नियतात्मानः सज्जीभव कुरूद्वह २१ [५०२६] इति श्रीमहाभारते शत-

---

भाग्यवान् ऋत्विज ह्या नरकसंबंधी अग्नीनें तप्त होत आहे " असें तो राजश्रेष्ठ धर्मराजाला ह्मणाला व तें ऐकून धर्म ह्मणतोः— हे राजा, ज्यानें जें कर्म करावें त्याचें फल त्यानेंच भोगावें तें दुसऱ्याला कधींही भोगावें लागत नाहीं. हे भाषण करणाऱ्यांमध्यें श्रेष्ठ सोमका, तू केलेल्या कर्माची हीं फलें दिसत आहेत १४. सोमक ह्मणतोः— ह्या वेद पठण करणाऱ्या ब्राह्मणावांचून पवित्र लोकाची मला जरूर नाहीं. मी ह्यासहवर्तमानच सुरालयाचे ठिकाणीं १५ किंवा नरकाचे ठिकाणीं वास्तव्य करण्याची इच्छा करितो. कारण, हे धर्मराजा, ह्याचें व माझें सारखेच कर्म आहे. करितां, हे देवा, पाप किंवा पुण्य ह्यांचें जें फल असेल तें आह्मां उभयतांना सारखेच प्राप्त होवो १६. यमधर्म ह्मणतोः—हे राजा, असेंच जर तुझ्या मनांत असेल तर हा जोंपर्यंत येथें राहील तोंपर्यंत ह्यासहवर्तमान केलेल्या कर्माच्या फलाचा उपभोग घे व नंतर सद्गतीला जा १७. लोमश ह्मणतातः— नंतर कमलपत्राप्रमाणें विस्तृत नेत्र असलेल्या त्या राजानें धर्मराजानें सांगितल्याप्रमाणें सर्व केलें व त्यामुळें पापाचा क्षय होऊन तो आपल्या गुरूसहवर्तमान मुक्त झाला १८ आणि आपल्या कर्मानें मिळालेले शुभ लोक प्राप्त करून घेऊन तो गुरूवर प्रेम करणारा राजा त्या आपल्या विप्ररूपी गुरुसहवर्तमान त्या कर्माचा उपभोग घेऊं लागला १९. हा आपल्यासमोर जो आश्रम दिसत आहे तो त्याचाच होय. येथें जो शांत स्वभावाचा मनुष्य सहा रात्रीं वास्तव्य करितो तो उत्तम गतीला जातो २०. ह्मणून, हे राजश्रेष्ठा, आपण सर्व प्रकारच्या अडचणी अथवा त्रास दूर ठेवून येथें सहा रात्रीं नियमानें काढूं. हे कुरुश्रेष्ठा, तूं

साहस्र्यां संहितायां वैयासिक्यामारण्यके पर्वणि तीर्थयात्रापर्वणि लोमशतीर्थयात्रायां जंतूपाख्याने अष्टाविंशाधिकशततमोऽध्यायः ॥ १२८ ॥

लोमश उवाच ॥ अस्मिन्किलस्वयं राजन्निष्टवान्वै प्रजापतिः । सत्रमिष्टीकृतं नाम पुरा वर्षसहस्रिकम् १ अम्बरीषश्च नाभाग इष्टवान्यमुनामनु । यत्रेष्ट्वा दश पद्मानि सदस्येभ्योऽभिसृष्टवान् २ यज्ञैश्च तपसा चैव परां सिद्धिमवाप सः । देशश्च नाहुषस्यायं यज्वनः पुण्यकर्मणः ३ सार्वभौमस्य कौन्तेय ययातेरमितौजसः । स्पर्धमानस्य शक्रेण तस्येदं यज्ञवास्त्विह ४ पश्य नानाविधाकारैरग्निभिर्निचितां महीम् । मज्जन्तीमिव चाक्रान्तां ययातेर्यज्ञकर्मभिः ५ एषा शम्येकपत्रा या सरकं चैतदुत्तमम् । पश्य रामह्रदानेतान्पश्य नारायणाश्रमम् ६ एतच्चर्चीकपुत्रस्य योगैर्विचरतो महीम् । प्रसर्पणं महीपाल रौप्यायाममितौजसः ७ अत्रानुवंशं पठतः शृणु मे कुरुनन्दन । उलूखलैराभरणैः पिशाची यदभाषत ८ युगन्धरे दधि प्राश्य उषित्वा चाच्युतस्थले । तद्वद्भूतलये स्नात्वा सपुत्रा

याविषयी तयार हो २१ ह्याप्रमाणे वनपर्वांतील तीर्थयात्रापर्वांपैकी लोमशतीर्थयात्रेसंबंधी जंतूच्या उपाख्यानाविषयी एकशें अठ्ठाविसावा अध्याय समाप्त झाला ॥ १२८ ॥

लोमश सांगतातः—हे धर्मराजा, पूर्वी ह्याच स्थलामध्यें प्रजापति ब्रह्मदेवानें हजार वर्षेपर्यंत चालणारें इष्टिकृत नावाचें सत्र करून देवांचें यजन केलें १ व येथेंच नाभागपुत्र आंबरीष राजा यमुनेच्या जवळ यजन करून आपल्या सदस्यांना दहा पद्म गोप्रदानरूप दक्षिणा दिली २ व यज्ञ आणि तपश्चर्या ह्यांच्यायोगानें तो सिद्धीस पावला. हे राजा, मोठा यज्ञशील व पुण्यकर्म करणाऱ्या नहुष राजाचा हा प्रदेश पहा ३. हे कुंतीपुत्रा धर्मराजा, सार्वभौम, अत्यंत तेजस्वी व इंद्राशीं स्पर्धा करणाऱ्या ययाति राजाचें यज्ञ करण्याचें हेंच स्थान होय ४. हे राजा, ही पृथ्वी ययातीच्या यज्ञकर्मांनीं व अग्निस्थापन करण्याकरितां केलेल्या निरनिराळ्या आकाराच्या स्थंडिलांनीं अतिशय व्याप्त होऊन बुडते आहे कीं काय अशी दिसत आहे तिजकडे तूं अवलोकन कर ५. ही एकच पत्र असलेली शमी, हें उत्कृष्ट सरोवर, रामचंद्रानें केलेले हे डोह व त्याचप्रमाणें हा नारायणाश्रम हीं सर्व तूं अवलोकन कर ६. हे पृथ्वीपते, योगधारणेच्या योगानें पृथ्वीवर संचार करणाऱ्या महातेजस्वी ऋचीक पुत्राचा रौप्या नदीचे समीप असलेला हा मार्ग तूं अवलोकन कर ७. ह्या ठिकाणीं वंशपरंपरागत आलेल्या आख्यानाचा श्लोक पठण करीत असतां, हे कुरुनंदना, उखळासारिखीं स्थूल आभरणें कर्णामध्यें धारण करणारी एक पिशाची जें बोलली तें तूं माझ्यापासून श्रवण कर ८.

वस्तुमर्हसि ९ एकरात्रमुषित्वेह द्वितीयं यदि वत्स्यसि। एतद्वै ते दिवावृत्तं रात्रौ वृत्तमितोऽन्यथा १० अद्य चात्र निवत्स्यामः क्षपां भरतसत्तम। द्वारमेतत्तु कौन्तेय कुरुक्षेत्रस्य भारत ११ अत्रैव नाहुषो राजा राजन्क-

(हे स्त्रिये,) युगंधराचे ठिकाणीं दधि प्राशन करून व अच्युत स्थलाचे ठिकाणीं राहून भूतलयाचे ठिकाणीं स्नान करून शुद्ध झाल्यामुळें पुत्रासहवर्तमान ह्या ठिकाणीं रहावयाचें असल्यास तूं योग्य आहेस ९. येथें एक रात्र वास्तव्य करून दुसऱ्या दिवशीं रहाण्याची इच्छा असेल तर दिवसा वस्त्रपात्रादि हरण होईल व रात्रीं त्याहींपेक्षां भयंकर प्रसंग होईल १०. करितां, हे भरतश्रेष्ठा कुंतीपुत्रा, ह्या कुरुक्षेत्राच्या द्वाररूप-

१ ह्या श्लोकासंबंधानें प्राचीन व अर्वाचीन ह्याचें मत निरनिराळें असल्यामुळें तें आह्मी येथें देतों. प्राचीन लोकानीं हा श्लोक खालीं लिहिल्याप्रमाणें लाविला आहे. ते ह्मणतात:-ह्या तीर्थाचे ठिकाणीं कोणीएक ब्राह्मणस्त्री आपल्या पुत्रासहवर्तमान स्नान करण्याकरिता आली असता तिला एक पिशाचि ह्मणाली "हे स्त्रिये, तू जेथें सांडणी (उटीण) अथवा गर्दभी ह्यांच्याच दुधाचें दही करितात त्या युगंधर पर्वत किंवा युगंधरदेशांतील दह्याचें प्राशन केलेंस, त्याचप्रमाणें वर्णसंकर झालेल्या लोकाचें वसति स्थान जें अच्युतस्थल तेथें तू राहिलीस व भूतलय ह्मणून प्रख्यात असलेल्या चोराच्या गावीं वास्तव्य करून त्याच्या संनिध असलेल्या, मृत झालेल्या लोकाचीं प्रेतें व तीं जाळलेलें भस्म जिच्यामध्यें टाकितात, अशा नदींत स्नान केलें आहेस ह्मणून तू तीन दोषानीं युक्त आहेस. ह्याविषयीं धर्मशास्त्राचा प्रमाणे—उंटाचें किंवा एक गेळें असलेल्या प्राण्यांचें दुग्ध सुरातुल्य होय. संकरजातीयासहवर्तमान वास्तव्य केलें अथवा भूतलयाचे ठिकाणीं वास्तव्य केलें तर प्राजापत्य व्रत करावें. हीं प्रायश्चित्तें तूं केलीं नाहींस ह्मणून येथें रहाणें तुला दुर्लभ आहे." असें पिशाचीचें वाक्य श्रवण करूनही त्या ब्राह्मणीनें तेथें स्नान केलें. तेव्हा त्या पिशाचीनें तिचें वटादिक पदार्थ नाहींसे करून टाकिलें व ह्मणाली "हें माझें दिवसाचें कृत्य. रात्रीं तर तुझ्या पुत्राचा नाश करीन दुसरे दिवशीं जर तूं येथें राहशील तर ह्याहींपेक्षा मी जास्त तुझा नाश करीन." अशा रीतीनें युगंधरादि तीन स्थलाचें ठिकाणीं पर व्याख्यान केलें आहे- अर्वाचीन लोक युगंधरादिकांत दधिप्राशन वगैरे तीन गोष्टी, तेथें राहण्याचा अधिकार प्राप्त करण्याकरिता, आहेत असें धरून व एक रात्र येथें वास्तव्य करावयाचें असल्यास कर असा अर्थ करून पिशाचीच्या वचनानें एकच रात्र येथें रहावें असा नियम करितात; व जर दुसऱ्या दिवशीं येथें अहोरात्र राहिलीस तर दिवसा तुझ्या वस्त्रपात्राचें हरण होऊन रात्रीं तर प्राणनाश होण्याचा प्रसंग येईल असा अर्थ करितात. ह्यांपैकीं दुसरा अर्थ चालू असलेल्या प्रकरणास जुळणारा असल्यामुळें तो घेऊन आह्मी भाषांतर केलें आहे.

तुभिरिष्टवान् । ययातिर्बहुरत्नौघैर्यत्रेन्द्रो मुदमभ्यगात् १२ एतत्प्लक्षा-
वतरणं यमुनातीर्थमुत्तमम् । एतद्वै नाकपृष्ठस्य द्वारमाहुर्मनीषिणः १३
अत्र सारस्वतैर्यज्ञैरीजानाः परमर्षयः । यूपोलूखलिकास्तात गच्छन्त्य-
वभृथप्लवम् १४ अत्र वै भरतो राजा राजन्क्रतुभिरिष्टवान् । हयमेधेन
यज्ञेन मेध्यमश्वमवासृजत् १५ असकृत्कृष्णसारङ्गं धर्मेणाप्य च मेदि-
नीम् । अत्रैव पुरुषव्याघ्र मरुत्तः सत्रमुत्तमम् । प्राप चैवर्षिमुख्येन
संवर्तेनाभिपालितः १६ अत्रोपस्पृश्य राजेन्द्र सर्वाँल्लोकान्प्रपश्यति ।
पूयते दुष्कृताच्चैव अत्रापि समुपस्पृश १७ वैशंपायन उवाच ॥ तत्र
सभ्रातृकः स्नात्वा स्तूयमानो महर्षिभिः । लोमशं पाण्डवश्रेष्ठ इदं वच-
मब्रवीत् १८ सर्वाँल्लोकान्प्रपश्यामि तपसा सत्यविक्रम । अत्रस्थः पाण्ड-
वश्रेष्ठं पश्यामि श्वेतवाहनम् १९ लोमश उवाच ॥ एवमेतन्महाबाहो
पश्यन्ति परमर्षयः । सरस्वतीमिमां पुण्यां पुण्यैकशरणावृताम् २०
यत्र स्नात्वा नरश्रेष्ठ धूतपाप्मा भविष्यसि । इह सारस्वतैर्यज्ञैरिष्टवन्तः

स्थलामध्यें आपण एकच रात्र वास्तव्य करूं ११. ह्याच ठिकाणीं नहुषपुत्र ययातीनें मोठमोठाले यज्ञ करून त्यांत रत्नराशींचें दान केलें व त्यामुळें इंद्राला परम संतोष झाला १२. ह्या यमुनेसंबंधीं असलेल्या प्लक्षावतरण तीर्थाला मोठमोठाले विचारी लोक हें स्वर्गाचें द्वार आहे असें ह्मणतात १३. बा धर्मराजा, येथें सारस्वत ब्राह्मणांनीं व ऋत्विजांनीं केलेल्या मोठमोठ्या यज्ञांतील यूप व उलूखल इत्यादिक पदार्थ पडलेले आहेत. त्यांनीं अवभृतस्नानही ह्याच ठिकाणीं केलें १४. हे राजा, ह्या ठिकाणीं भरतराजानें पुष्कळ यज्ञ करून अश्वमेध यज्ञ करण्याकरितां घोडाही येथेंच सोडिला १५. तो श्यामकर्ण ह्या पृथ्वीतलावर धर्मानें फिरत फिरत आला व त्याचें यजन झालें. हे पुरुषश्रेष्ठा, ऋषिश्रेष्ठ संवर्तानें पालन केलेल्या मरुत्तानेंही ह्याच ठिकाणीं सत्र केलें १६. हे नृपश्रेष्ठा, येथील उदकाला स्पर्श करणारा पुरुष संपूर्ण पातकांपासून मुक्त होऊन सर्व लोक अवलोकन करण्यास समर्थ होतो. तस्मात्, तूं ह्या उदकाला स्पर्श कर १७. वैशंपायन सांगतातः—(हें त्या लोमश ऋषींचें भाषण श्रवण केल्यावर) महर्षींनीं स्तवन केलेल्या धर्मराजानें आपल्या भ्रात्यांसहवर्तमान तेथें स्नान करून तो पांडवश्रेष्ठ धर्मराज लोमश ऋषींना ह्मणाला १८ "हे सत्यविक्रमा, तपाच्या प्रभावानें सर्व लोक माझ्या दृष्टीं पडत असून येथूनच ज्याच्या रथाचे घोडे श्वेतवर्ण आहेत असा पांडवश्रेष्ठ अर्जुनही मला दिसत आहे १९. लोमश ह्मणतातः—हे आजानुबाहो धर्मराजा, ह्याचप्रमाणें मोठमोठ्या ऋषींनाही येथें असेंच दिसत असतें. आतां ही पुण्यकारक आश्रमांनीं युक्त

सुरर्षयः । ऋषयश्चैव कौन्तेय तथा राजर्षयोपि च २१ वेदी प्रजापते-
रेषा समन्तात्पञ्चयोजना । कुरोर्वै यज्ञशीलस्य क्षेत्रमेतन्महात्मनः २२
[५०४८] इति श्रीमहाभारते०वैयासिक्यामारण्यके पर्वणि तीर्थयात्रा-
पर्वणि लोमशतीर्थयात्रायामेकोनत्रिंशाधिकशततमोऽध्यायः ॥१२९॥

लोमश उवाच ॥ इह मर्त्यास्तनूस्त्यक्त्वा स्वर्गं गच्छन्ति भारत ।
मर्तुकामा नरा राजन्निहायान्ति सहस्रशः १ एवमाशीः प्रयुक्ता हि
दक्षेण यजता पुरा । इह ये वै मरिष्यन्ति ते वै स्वर्गजितो नरः २ एषा
सरस्वती रम्या दिव्या चौघवती नदी । एतद्विनशनं नाम सरस्वत्या
विशांपते ३ द्वारं निषादराष्ट्रस्य येषां दोषात्सरस्वती । प्रविष्टा पृथिवीं
वीर मा निषादा हि मां विदुः ४ एष वै चमसोद्भेदो यत्र दृश्या सर-
स्वती । यत्रैनामभ्यवर्तन्त सर्वाः पुण्याः समुद्रगाः ५ एतत्सिंधोर्महत्तीर्थं
यत्रागस्त्यमरिन्दम । लोपामुद्रासमागम्य भर्तारमवृणीत वै ६ एतत्प्रका-
शते तीर्थं प्रभासं भास्करद्युते । इन्द्रस्य दयितं पुण्यं पवित्रं पापनाश-
नम् ७ एतद्विष्णुपदं नाम दृश्यते तीर्थमुत्तमम् । एषा रम्या विपाशा च

व पवित्र अशी सरस्वती नदी तू अवलोकन कर २०. हे नरश्रेष्ठा धर्मराजा, येथे स्नान केलें असतां तूं पापरहित होशील. येथें ऋषि, देवर्षि व राजर्षि आणि सारस्वत ह्यांनीं यज्ञांच्या योगेंकरून यजन केलें २१. ही पांच योजनें विस्तृत असलेली प्रजापतीची वेदी आणि महात्म्या यज्ञशील कुरूचें हें क्षेत्र होय २२. ह्याप्रमाणें ०वनपर्वांतील तीर्थ-यात्रापर्वांपैकीं लोमशतीर्थयात्रेसंबंधीं एकशें एकुणतिसावा अध्याय समाप्त झाला॥१२९॥

लोमश सांगतातः—हे भरतकुलोत्पन्ना युधिष्ठिरा, ह्या ठिकाणीं जीं मनुष्यें आपल्या शरीराचा त्याग करतात तीं स्वर्गाला जातात व, हे राजा, ह्या ठिकाणीं हजारों लोक मरण्याकरितां येतात १. पूर्वीं यजमान दक्षानें येथें असें वरप्रदान दिलें आहे कीं, जे कोणी ह्या ठिकाणीं मरतील ते स्वर्गाला जातील २. ही रम्य सरस्वती व दिव्य ओघवती नदी पहा आणि, हे प्रजापालका, हेंच सरस्वतीचें व निषध राष्ट्राचें विनशन नांवाचें द्वार होय ३. हे वीरा, सरस्वतीनें त्या निषदांच्या दोषामुळें व त्यांनीं आपणाला न जाणावें म्हणून पृथ्वीमध्यें येथें प्रवेश केला ४. हें चमसोद्भेद नांवाचें क्षेत्र पहा. ह्याच ठिकाणीं सरस्वती दृश्य झाली व येथेंच समुद्राला मिळणाऱ्या सर्व नद्या तिला येऊन मिळाल्या ५. हे शत्रुनाशका धर्मराजा, ज्या ठिकाणीं लोपामुद्रेनें येऊन आपलें पति अगस्त्य यांना वरिलें तेंच हे सिंधुसंबंधीं तीर्थ होय ६. हे सूर्याप्रमाणें तेजस्वी धर्म-राजा, इंद्राला प्रिय, पापनाशन करणारें, शुद्ध व पवित्र करणारें हें प्रभासतीर्थ प्रका-

नदी परमपावनी ८ अत्र वै पुत्रशोकेन वसिष्ठो भगवानृषिः । बध्वा-त्मानं निपतितो विपाशः पुनरुत्थितः ९ काश्मीरमण्डलं चैतत्सर्वपुण्य-मरिन्दम । महर्षिभिश्चाध्युषितं पश्येदं भ्रातृभिः सह १० यत्रौत्तराणां सर्वेषामृषीणां नाहुषस्य च । अग्नेश्चैवात्र संवादः काश्यपस्य च भारत ११ एतद्द्वारं महाराज मानसस्य प्रकाशते । वर्षमस्य गिरेर्मध्ये रामेण श्रीमता कृतम् १२ एष वातिकषण्डो वै प्रख्यातः सत्यविक्रमः । नात्यवर्तत यद्द्वारं विदेहादुत्तरं च यः १३ इदमाश्चर्यमपरं देशेऽस्मिन्पुरुषर्षभ । क्षीणे युगे तु कौन्तेय शर्वस्य सह पार्षदैः । सहोमया च भवति दर्शनं काम-रूपिणः १४ अस्मिन्सरसि सत्रैर्वै चैत्रे मासि पिनाकिनम् । यजन्ते याजकाः सम्यक्परिवारं शुभार्थिनः १५ अत्रोपस्पृश्य सरसि श्रद्दधानो जिते-न्द्रियः । क्षीणपापः शुभाँल्लोकान्प्राप्नुते नात्र संशयः १६ एष उज्जानको नाम पावकिर्यत्र शांतवान् । अरुन्धतीसहायश्च वसिष्ठो भगवानृषिः १७

शत आहे ७. हें विष्णुपदनांवाचें उत्कृष्ट तीर्थ दिसत असून ही सुंदर व पवित्र कर-णारी विपाशा नांवाची नदी दिसत आहे ८. ह्याच ठिकाणीं भगवान् वसिष्ठ ऋषींनीं पुत्रशोकानें सतप्त झाल्यामुळें आपल्याला पाशानें बांधून घेऊन उडी टाकिली व पुन-रपि ते पाशरहित होऊन उठले (ह्मणून ह्या नदीला विपाशा असें ह्मणतात) ९. हे शत्रुनाशका धर्मराजा, हें महर्षींनें सेवित व अत्यंत पुण्यकारक असें काश्मीरमंडल तूं आपल्या बंधूंसहवर्तमान अवलोकन कर १०. हे भरतकुलोत्पन्ना धर्मराजा, ह्या ठिकाणीं उत्तर दिशेस रहाणारे सर्व ऋषि, नहुषपुत्र, अग्नि व काश्यप ह्यांचा संवाद झाला ११. हे महाराज, हें मानससरोवराचें द्वार प्रकाशित होत असून श्रीमान् रामानें ह्या पर्वतावर हेंच आपलें वसतिस्थान केलें होतें १२. ह्या सत्यविक्रम व प्रख्यात असलेल्या रामानें निर्माण केलेला वातिकषंड नांवाचा प्रदेश विदेहाच्या जवळच असून तो त्याच्या उत्तरेकडे द्वारभूत होऊन राहिला आहे १३. हे पुरुषश्रेष्ठा कुंती-पुत्रा धर्मराजा, ह्या देशामध्यें हें एक मोठें आश्चर्य आहे कीं, युग (ह्मणजे पांच वर्षें) समाप्त झालें असतां इच्छेस येतील तीं रूपें धारण करणाऱ्या उमेचें व पार्षद्गणांस-हवर्तमान शंकराचें दर्शन होतें १४. आपल्या कल्याणाची इच्छा करणारे याजक लोक चैत्र महिन्यामध्यें ह्या सरोवराचे ठिकाणीं उत्कृष्ट यज्ञाच्या योगानें पिनाकपाणी शंकराचें यजन करितात १५. जो श्रद्धालु व जितेंद्रिय पुरुष ह्या सरोवराच्या उदकाला स्पर्श करितो तो पापरहित होऊन निःसंशय शुभलोकाला जातो १६. हे धर्मराजा, ह्या उज्जानक नांवाचा देश होय. येथें स्वामिकार्तिकेय व ज्यांना अरुंधतीचें साहाय्य आहे असे हे

ह्रदश्च कुशवानेष यत्र पद्मं कुशेशयम् । आश्रमश्चैव रुक्मिण्या यत्राशाम्यदकोपना १८ समाधीनां समासस्तु पाण्डवेय श्रुतस्त्वया । तं द्रक्ष्यसि महाराज भृगुतुङ्गं महागिरिम् १९ वितस्तां पश्य राजेन्द्र सर्वपापप्रमोचनीम् । *महर्षिभिश्चाध्युषितां शीततोयां सुनिर्मलाम्* २० जलां चोपजलां चैव यमुनामभितो नदीम् । उशीनरो वै यत्रेष्ट्वा वासवादत्यरिच्यत २१ तां देवसमितिं तस्य वासवश्च विशांपते । अभ्यागच्छन्नृपवरं ज्ञातुमग्निश्च भारत २२ जिज्ञासमानौ वरदौ महात्मानमुशीनरम् । इन्द्रः श्येनः कपोतोऽग्निर्भूत्वा यज्ञभिजग्मतुः २३ ऊरू राज्ञः समासाद्य कपोतः श्येनजाद्भयात् । शरणार्थी तदा राजन्निलिल्ये भयपीडितः २४ [५०७२] इति श्रीमहाभारते०मारण्यके पर्वणि तीर्थयात्रापर्वणि लोमशतीर्थयात्रायां श्येनकपोतीये त्रिंशदधिकशततमोऽध्यायः ॥ १३० ॥

श्येन उवाच ॥ धर्मात्मानं त्वाहुरेकं सर्वे राजन्महीक्षितः । सर्वधर्मविरुद्धं त्वं कस्मात्कर्म चिकीर्षसि १ विहितं भक्षणं राजन्पीड्यमानस्य

भगवान् वसिष्ठ ऋषि शांत झाले १७. हा जलानें परिपूर्ण व कुशेशयनामक कमलानें युक्त असलेला डोह पहा व त्याचप्रमाणें हा रुक्मिणीचा आश्रम अवलोकन कर. ह्याच ठिकाणीं ती कोपरहित स्त्री शांत झाली १८. हे महाराज, ज्या भृगुतुंग महागिरीचें अवलोकन केलें असतां सामान्यतः समाधि लावण्याचें फल प्राप्त होतें असें जें तूं श्रवण केलें आहेस तो, हे पांडुपुत्रा धर्मराजा, हा पर्वत अवलोकन कर १९. हे नृपश्रेष्ठा, जिचें उदक थंड आहे, जिच्या तटाकीं महर्षि वास्तव्य करितात व जी सर्व पापांपासून मुक्त करिते त्या ह्या निर्मल वितस्ता नदीला तूं अवलोकन कर २०. ज्यांच्या काठीं उशीनरानें यजन करून इंद्रालाही मागें टाकिलें त्या ह्या यमुनेच्या समीप असलेल्या जला व उपजला नद्या तूं अवलोकन कर २१. हे प्रजापालका धर्मराजा, तीच ही त्या राजाची राजसभा होय. हे भरतकुलोत्पन्ना युधिष्ठिरा, येथेंच अग्नि व इंद्र त्या नृपश्रेष्ठाला पहाण्याकरितां आले २२. हे धर्मराजा, त्या महात्म्या उशीनराचें सत्त्व पहाण्याकरितां ते वर देणारे उभयतां इंद्र श्येनरूपानें व अग्नि कपोत रूपानें त्या यज्ञाचे ठिकाणीं प्राप्त झाले २३. तेव्हां श्येनाच्या भीतीनें भयभीत झालेला तो कपोत आपलें रक्षण होईल म्हणून त्या राजाच्या मांडीचा आश्रय करून दबा धरून बसला २४. ह्याप्रमाणें ०वनपर्वांतील तीर्थयात्रापर्वापैकीं लोमशतीर्थयात्रेसंबंधीं श्येन व कपोत यांच्या आख्यानाविषयीं एकशें तिसावा अध्याय समाप्त झाला ॥ १३० ॥

श्येन म्हणतो:—हे नृपते, सर्व पृथ्वीपालक राजे आपल्यालाच धर्मात्मे असें म्हणतात.

मे क्षुधा । मा रक्षीर्धर्मलोभेन धर्ममुत्सृष्टवानसि २ राजोवाच ॥ संत्रस्तरूपस्त्राणार्थी त्वत्तो भीतो महाद्विज । मत्सकाशमनुप्राप्तः प्राणगृध्नुरयं द्विजः ३ एवमभ्यागतस्येह कपोतस्याभयार्थिनः । अप्रदाने परं धर्मं कथं श्येन न पश्यसि ४ प्रस्पन्दमानः संभ्रान्तः कपोतः श्येन लक्ष्यते । मत्सकाशं जीवितार्थी तस्य त्यागो विगर्हितः ५ यो हि कश्चिद्द्विजान्हन्याद्गां वा लोकस्य मातरम् । शरणागतं च त्यजते तुल्यं तेषां हि पातकम् ६ श्येन उवाच ॥ आहारात्सर्वभूतानि संभवन्ति महीपते । आहारेण विवर्धन्ते तेन जीवन्ति जन्तवः ७ शक्यते दुस्त्यजेप्यर्थे चिररात्राय जीवितुम् । न तु भोजनमुत्सृज्य शक्यं वर्तयितुं चिरम् ८ भक्ष्याद्विलोजितस्याद्य मम प्राणा विशांपते । विसृज्य कायमेष्यन्ति पन्थानमकुतोभयम् ९ प्रमृते मयि धर्मात्मन्पुत्रदारादि नंक्ष्यति । रक्षमाणः कपोतं त्वं बहून्प्राणान्न रक्षसि १० धर्मं यो बाधते धर्मो न स धर्मः कुवर्त्म

असे असून तू मत्र धर्माला विरुद्ध असं आचरण करण्याची इच्छा कां करितोस ? १. क्षुधेनें पीडित झालेल्या मला ह्याचें भक्षण करणें योग्य आहे. आतां धर्मरक्षण करण्याच्या लोभानें ह्याचें रक्षण करूं नको. कारण, तूं धर्म तर केव्हांच सोडून दिला आहेस २. राजा ह्मणतो:—हे श्रेष्ठ पक्ष्या, तुझ्या भीतीनें त्रस्त झालेला हा पक्षी आपल्या प्राणांचें रक्षण होण्याकरितां माझ्याजवळ प्राप्त झाला आहे ३. तस्मात्, अभयाची इच्छा करणारा व अभ्यागतरूप असलेला हा पक्षी तुला न देणें ह्यांतच परम धर्म आहे हें, हे श्येना, तुझ्या कसें लक्ष्यांत येत नाहीं ? ४. अरे, श्येना, तूं पहा कीं, ज्याअर्थी हा कपोत भांबावून गेल्यामुळें ह्याला घाम आला आहे त्याअर्थी प्राण रक्षणाकरितां माझ्याजवळ आलल्याचा त्याग करणें मला निंद्य नाहीं काय ? ५. ब्राह्मणाचा वध करणारा, लोकमाता धेनूचा वध करणारा आणि शरण आलेल्याचा त्याग करणारा ह्या तिघांना एकसारिखेंच पातक सांगितलें आहे ६. श्येन ह्मणतो:—हे पृथ्वीपते, आहारापासून सर्व भूतें उत्पन्न होतात, तीं आहारानेंच वाढतात आणि तीं आहाराच्या योगानें जिवंत रहातात ७ एखाद्या दुस्त्यज वस्तूचा त्याग करून पुष्कळ दिवस जिवंत रहातां येतें; परंतु, भोजनाचा त्याग करून मात्र पुष्कळ दिवस रहातां यावयाचें नाहीं ८. हे प्रजापालका राजा, माझें भक्ष्य मला न मिळूं दिल्यामुळें मात्र आज माझे प्राण माझ्या शरीराला सोडून ज्याला कोठूनही भीति नाहीं अशा मार्गाला जातील ९. हे धर्मात्म्या असा मी मेलों ह्मणजे माझी स्त्री व पुत्रादिक हीं मृत होतील व अशा रीतीनें एका कपोताचें रक्षण करण्यांत पुष्कळांच्या प्राणांचें रक्षण न केल्यासारखें होईल १०.

तत्। अविरोधात्तु यो धर्मः स धर्मः सत्यविक्रम ११ विरोधिषु महीपाल निश्चित्य गुरुलाघवम्। न बाधा विद्यते यत्र तं धर्मं समुपाचरेत् १२ गुरुलाघवमादाय धर्माधर्मविनिश्चये। यतो भूयांस्ततो राजन्कुरुष्व धर्मनिश्चयम् १३ राजोवाच ॥ बहुकल्याण संयुक्तं भाषसे विहगोत्तम। सुपर्णः पक्षिराट् किं त्वं धर्मज्ञश्चास्यसंशयम् १४ तथा हि धर्मसंयुक्तं बहुचित्रं च भाषसे। न तेस्त्यविदितं किंचिदिति त्वां लक्षयाम्यहम् १५ शरणैषिपरित्यागं कथं साध्विति मन्यसे। आहारार्थं समारम्भस्तव चायं विहङ्गम १६ शक्यश्चाप्यन्यथा कर्तुमाहारोप्यधिकस्त्वया। गोवृषो वा वराहो वा मृगो वा महिषोपि वा। त्वदर्थमद्य क्रियतां यच्चान्यदिह काङ्क्षसि १७ श्येन उवाच ॥ न वराहं न चोक्षाणं न मृगान्विविधांस्तथा। भक्षयामि महाराज किं ममान्येन केनचित् १८ यस्तु मे देवविहितो भक्षः क्षत्रियपुङ्गव। तमुत्सृज महीपाल कपोतमिममेव मे १९ श्येनः कपोतानत्तीति स्थितिरेषा सनातनी। मा राजन्सारमज्ञात्वा कद-

---

हे सत्यपराक्रमी राजा, जो धर्माला बाध आणितो तो धर्म नव्हे तर तो कुमार्ग होय. जो धर्माला विरोध आणीत नाहीं तोच धर्म ११. आतां, (एकाच धर्मरूप कृत्याला जर दोन विरोध प्राप्त झाले तर) हे महीपाला, त्यांमध्यें गौरव व लाघव ह्यांचा निश्चय करून ज्यांत कोणत्याही प्रकारचा बाध येत नसेल तेंच धर्मरूप कृत्य करावें १२. धर्म आणि अधर्म ह्यांच्या निश्चयाविषयीं गौरव लाघवाचा विचार करून जिकडून पुष्कळ अंशानें बाध कमी लागेल तेंच धर्मरूप कृत्य करण्याचा तू निश्चय कर १३. राजा ह्मणतो:—हे पक्षिश्रेष्ठा, ज्याअर्थीं तूं ज्यांत पुष्कळ कल्याण आहे अशा प्रकारचें भाषण करीत आहेस त्याअर्थीं तूं धर्म जाणणारा गरुड असावास असें निःसंशय मला वाटत १४. त्याचप्रमाणें तूं धर्मयुक्त व कोटिक्रमाचें भाषण करीत आहेस त्यावरून तुला सर्व माहीत आहे असें मला वाटतें १५. हे विहंगमा, जरी आहार प्राप्त करून घेण्याकरितां तुझी ही खटपट आहे तरी शरण आलेल्याचा त्याग करावा हें तुला चांगलें वाटेल असें मला वाटत नाहीं १६. जर तुला बराचसा आहारच मिळविणें असेल तर बैल, वराह, मृग व महिष ह्यांपैकीं वाटेल तें मिळवितां येईल किंवा याहून जर तुला कांहीं निराळें पाहिजे असेल तर तेंही पण तुला आज आह्मांला देतां येईल १७. श्येन ह्मणतो:—हे महाराज, वराह, नानाप्रकारचे मृग, वृषभ व आणखीही दुसरें भक्ष्य मला भक्षण करून काय करावयाचें आहे ? १८. हे क्षत्रियश्रेष्ठा महीपाला, देवांनीं माझें भक्ष्य ह्मणून ठरविलेला हा कपोत माझा मला दे ह्मणजे झाले १९.

लीस्कन्धमासज २० राजोवाच ॥ राष्ट्रं शिबीनामृद्धं वै ददानि तव खेचर । यं वा कामयसे कामं श्येन सर्वं ददानि ते २१ विनेमं पक्षिणं श्येन शरणार्थिनमागतम् । येनेमं वर्जयेथास्त्वं कर्मणा पक्षिसत्तम । तदाचक्ष्व करिष्यामि न हि दास्ये कपोतकम् २२ श्येन उवाच ॥ उशीनर कपोते ते यदि स्नेहो नराधिप । आत्मनो मांसमुत्कृत्य कपोततुलया धृतम् २३ यदा समं कपोतेन तव मांसं नृपोत्तम । तदा देयं तु तन्मह्यं सा मे तुष्टिर्भविष्यति २४ राजोवाच ॥ अनुग्रहमिमं मन्ये श्येन यन्माभियाचसे । तस्मात्तेद्य प्रदास्यामि स्वमांसं तुलया धृतम् २५ लोमश उवाच ॥ उत्कृत्य स स्वयं मांसं राजा परमधर्मवित् । तुलयामास कौन्तेय कपोतेन समं विभो २६ ध्रियमाणः कपोतस्तु मांसेनात्यतिरिच्यते । पुनश्चोत्कृत्य मांसानि राजा प्रादादुशीनरः २७ न विद्यते यदा मांसं कपोतेन समं धृतम् । तत उत्कृत्तमांसोसावारुरोह स्वयं तुलाम् २८ श्येन उवाच ॥ इन्द्रोहमस्मि धर्मज्ञ कपोतो हव्यवाडयम् । जिज्ञासमानौ धर्मे

कारण, श्येन कपोताचें भक्षण करिता असें सनातन कालापासून लोकांना माहीतच आहे. ह्मणून धर्मतत्त्व न जाणतां कदली स्कंधाप्रमाणें निःसार अशा धर्माचे ठिकाणीं तूं आसक्ति धरूं नकोस २०. राजा ह्मणतोः—हे आकाशामध्यें संचार करणाऱ्या श्येन पक्ष्या, मी तुला हें शिबींचें समृद्ध राज्य देईन आणि ह्याशिवायही तुझा दुसरा कांहीं मनोरथ असेल तर तोही मी पूर्ण करीन २१;सारांश, शरण प्राप्त झालेल्या ह्या पक्ष्याला तुझ्या स्वाधीन न करितां ज्या उपायानें तूं ह्याला सोडशील असा उपाय तूं मला सांग; तो मी करीन; परंतु, ह्या कपोताला यावयाचा नाहीं २२. श्येन ह्मणतोः—हे नराधिपा उशीनरा, जर ह्या कपोतावर तुझें इतकें प्रेम आहे तर ह्या कपोताच्या भारंभार आपल्या शरीराचें मांस काढून तें मला दे ह्मणजे, हे नृपश्रेष्ठा, त्या योगानें माझी तृप्ति होईल २३. २४. राजा ह्मणतोः—हे श्येना, जर तूं माझें मांस मागत आहेस तर हा तूं माझ्यावर मोठा अनुग्रहच केलास असें मी समजतों. आतां मी आपलें मांस काट्यांत टाकून वजन करून तुला देईन २५.लोमश ह्मणतातः—हे कुंतीपुत्रा धर्मराजा, असें बोलून, त्या परम धर्मज्ञ राजानें आपलें मांस काढून एका पारड्यांत कपोत व एका पारड्यांत मांस असें घालून वजन केलें २६. तेव्हां कपोत मांसापेक्षां पुष्कळच जड भरला ह्मणून त्या उशीनर राजानें आणखी आपलें मांस काढून त्यांत घातलें २७.ह्याप्रमाणें शरीरांतील मांस काढून घालतां घालतां जेव्हां त्या कपोताबरोबर वजन होईना तेव्हां मांस संपल्यामुळें तो स्वतः पारड्यांत जाऊन बसला २८. श्येन ह्मणतोः—हे धर्म जाणणाऱ्या राजा, मी

त्वां यज्ञवाटमुपागतौ २९ यत्ते मांसानि गात्रेभ्य उत्कृत्तानि विशांपते ।
एषा ते भास्वती कीर्तिर्लोकानभिभविष्यति ३० यावल्लोके मनुष्यास्त्वां
कथयिष्यन्ति पार्थिव । तावत्कीर्तिश्च लोकाश्च स्थास्यन्ति तव शाश्वताः ३१
इत्येवमुक्त्वा राजानमारुरोह दिवं पुनः । उशीनरोपि धर्मात्मा धर्मेणा-
वृत्य रोदसी ३२ विभ्राजमानो वपुषाप्यारुरोह त्रिविष्टपम् । तदेतत्सदनं
राजन्राज्ञस्तस्य महात्मनः ३३ पश्यस्वैतन्मया सार्धं पुण्यं पापप्रमोचनम् ।
अत्र वै सततं देवा मुनयश्च सनातनाः । दृश्यन्ते ब्राह्मणै राजन्पुण्यवद्भि-
र्महात्मभिः ३४ [५१०६] इति श्रीमहाभारते शतसाहस्र्यां संहितायां
वैयासिक्यामारण्यके पर्वणि तीर्थयात्रापर्वणि लोमशतीर्थयात्रायां श्येन-
कपोतीये एकत्रिंशदधिकशततमोऽध्यायः ॥ १३१ ॥

लोमश उवाच ॥ यः कथ्यते मन्त्रविदग्र्यबुद्धिरौद्दालकिः श्वेत-
केतुः पृथिव्याम् । तस्याश्रमं पश्य नरेन्द्र पुण्यं सदाफलैरुपपन्नं महीजैः १
साक्षादत्र श्वेतकेतुर्ददर्श सरस्वतीं मानुषदेहरूपाम् । वेत्स्यामि वाणी-
मिति संप्रवृत्तां सरस्वतीं श्वेतकेतुर्बभाषे २ अस्मिन्युगे ब्रह्मकृतां वरिष्ठा-

इंद्र आहें व हा कपोत अग्नि आहे. तुझें सत्त्व पहाण्याकरितां ह्या यज्ञमंडपामध्यें आम्ही उभयतां प्राप्त झालों २९. हे प्रजापालका, तू आपल्या शरीरापासून हें जें मांस काढिलेंस ही तुझी कीर्ति सर्व लोकांमध्यें विख्यात होईल ३० आणि जोपर्यंत, हे पृथ्वीपते, मनुष्य ह्या लोकांमध्यें तुझें नांव काढतील तोंपर्यंत तुझी कीर्ति राहून तूं शाश्वत लोकाचे ठिकाणीं वास्तव्य करशील ३१. ह्याप्रमाणें राजाशीं भाषण केल्यावर इंद्र स्वर्गाला चालता झाला आणि धर्मात्म्या उशीनर राजानेंही पुनरपि आपल्या कीर्तीनें दशदिशा भरून टाकिल्या आणि उत्तम प्रकारचें रूप धारण करून तो स्वर्गाला गेला. हे राजा, त्याच महात्म्याचा हा आश्रम होय ३२, ३३. हे धर्मराजा, पापांपासून मुक्त करणारा व पवित्र असा हा आश्रम माझ्यासहवर्तमान तूं अवलोकन कर. येथें महात्म्या पुण्यवान् ब्राह्मणांना देव व प्राचीन ऋषि ह्यांचें निरंतर दर्शन होतें ३४. ह्याप्रमाणें० वनपर्वांतील तीर्थयात्रापर्वापैकीं लोमशतीर्थयात्रेसंबंधीं श्येन व कपोत ह्यांच्या आख्यानाविषयीं एकशें एकतिसावा अध्याय समाप्त झाला ॥ १३१ ॥

लोमश म्हणतातः—हे नृपश्रेष्ठा, ह्या पृथ्वीतलाचे ठिकाणीं ज्याला मंत्र जाणणाऱ्यांमध्यें चतुर व उद्दालकाचा पुत्र श्वेतकेतु असें म्हणतात त्याचा हा वृक्षांनीं व फलांनीं परिपूर्ण असा पवित्र आश्रम तूं अवलोकन कर १. येथें त्या श्वेतकेतूनें मनुष्यदेह धारण करणाऱ्या साक्षात् सरस्वतीला अवलोकन केलें आणि तिला अवलोकन करून, 'मी

वास्तां मुनी मातुलभागिनेयौ । अष्टावक्रश्चैव कहोडसूनुरौद्दालकिः
श्वेतकेतुः पृथिव्याम् ३ विदेहराजस्य महीपतेस्तौ विप्रावुभौ मातुलभा-
गिनेयौ । प्रविश्य यज्ञायतनं विवादे बन्दिं निजग्राहतुरप्रमेयौ ४ उपास्स्व
कौन्तेय महानुजस्त्वं तस्याश्रमं पुण्यतमं प्रविश्य । अष्टावक्रं यस्य दौहि-
त्रमाहुर्योसौ बन्दिं जनकस्याथ यज्ञे ५ वादी विप्राग्र्यो बाल एवाभि-
गम्य वादे भङ्क्त्वा मज्जयामास नद्याम् ६ युधिष्ठिर उवाच ॥ कथं
प्रभावः स बभूव विप्रस्तथाभूतं यो निजग्राह बन्दिम् । अष्टावक्रः केन
चासौ बभूव तत्सर्वं मे लोमश शंस तत्त्वम् ७ लोमश उवाच ॥ उद्दाल-
कस्य नियतः शिष्य एको नाम्ना कहोड इति विश्रुतोभूत् । शुश्रू-
राचार्यवशानुवर्ती दीर्घं कालं सोध्ययनं चकार ८ तं वै विप्रः पर्य-
चरत्स शिष्यस्तां च ज्ञात्वा परिचर्यां गुरुः सः । तस्मै प्रादात्सद्य एव
श्रुतं च भार्यां च वै दुहितरं स्वां सुजाताम् ९ तस्या गर्भः समभवद-
ग्निकल्पः सोधीयानं पितरं चाप्युवाच । सर्वां रात्रिमध्ययनं करोषि

सरस्वति, तू हें मनुष्याचें शरीर धारण केलें आहेस हें मला समजलें. तरी तू मला अस्खलित अशी वाणी दे" असें ह्मणाला २. ह्या युगामध्यें ह्या पृथ्वीतलावर ब्रह्मवेत्त्यामध्यें श्रेष्ठ कहोडपुत्र अष्टावक्र व औद्दालकीतनय श्वेतकेतु ह्मणून मामा भाचे मुनि प्रसिद्ध होते ३. त्या अतुल पराक्रमी उभयता मामाभाच्या ब्राह्मणांनी पृथ्वीपति विदेह राजाच्या यज्ञमंडपांत प्रवेश करून वादविवादांत एका बंद्याला जिंकून टाकिलें ४. जनकाच्या यज्ञामध्यें बंदीला जिंकिलेला अष्टावक्र ज्याचा नातु त्याच्या ह्या पुण्यकारक आश्रमांत प्रवेश करून आपल्या बंधूसहवर्तमान तूं त्याचें आराधन कर ५. तो महावादी अष्टावक्र लहान असतांच तेथें जाऊन वादामध्यें त्या बंद्याला जिंकून त्यानें त्याला नदीमध्यें बुडवून टाकिलें ६. युधिष्ठिर ह्मणतो:--हे लोमश ऋषे, ज्यानें अशा प्रकारें त्या बंदीचें निग्रहण केलें त्याचा प्रभाव व तो आठ ठिकाणी वाकडा कशानें झाला हें सर्व इत्थंभूत आपण मला कथन करा ७. लोमश म्हणतात:—उद्दालकाचा नियमानें वागणारा कहोड नांवाचा एक प्रख्यात शिष्य होता. तो आपल्या गुरूच्या आज्ञेमध्यें वागणारा असून त्याच्याजवळ पुष्कळ दिवसपर्यंत अध्ययन करीत होता ८. त्या शिष्यानें ह्याप्रमाणें आपली सेवा केली असें पाहून ते गुरु त्यावर प्रसन्न झाले व त्यांनीं त्याला विद्या देऊन आपली स्वतःची सुजाता नामक कन्याही तत्काल त्याला भार्या म्हणून दिली ९. तिचा गर्भ अग्नीप्रमाणें तेजस्वी असून तो एके दिवशीं सर्व रात्रभर पठन करीत बसलेल्या आपल्या बापाला ह्मणाला "हे तात, आपण सर्व रात्रभर जरी

नेदं पितुः सम्यगिवोपवर्तते १० उपालब्धः शिष्यमध्ये महर्षिः स तं कोपादुदरस्थं शशाप । यस्मात्कुक्षौ वर्तमानोब्रवीषि तस्माद्वक्रो भवितास्यष्टकृत्वः ११ स वै तथा वक्र एवाभ्यजायदष्टावक्रः प्रथितो वै महर्षिः । अस्यासीद्वै मातुलः श्वेतकेतुः स तेन तुल्यो वयसा बभूव १२ संपीड्यमाना तु तदा सुजाता सा वर्धमानेन सुतेन कुक्षौ । उवाच भर्तारमिदं रहोगता प्रसाद्य हीनं वसुना धनार्थिनी १३ कथं करिष्याम्यधना महर्षे मासश्चायं दशमो वर्तते मे । नैवास्ति ते वसु किंचित्प्रजाता येनाहमेनामापदं निस्तरेयम् १४ उक्तस्त्वेवं भार्यया वै कहोडो वित्तस्यार्थे जनकमथाभ्यगच्छत् । स वै तदा वादविदा निगृह्य निमज्जितो बन्दिनेहाप्सु विप्रः १५ उद्दालकस्तं तु तदा निशम्य सुतेन वादेष्वु निमज्जितं तथा । उवाच तां तत्र ततः सुजातामष्टावक्रे गूहितव्योयमर्थः १६ ररक्ष सा चापि तमस्य मन्त्रं जातोप्यसौ नैव शुश्राव विप्रः । उद्दालकं पितृवच्चापि मेने तथाष्टावक्रो भ्रातृवच्छ्वेतकेतुम् १७

ह्मणत बसला आहांत तरी तुमचें ह्मणणें अगदीं शुद्ध आहे असें मला वाटत नाहीं' १०. ह्याप्रमाणें शिष्यांच्या मध्यभागीं बसलेल्या मुनीनें आपल्या पोटांतल्याचें भाषण श्रवण करून "ज्याअर्थी तू मातोश्रीच्या कुक्षीमध्यें असतांनाच असें बोलत आहेस त्याअर्थी आठ ठिकाणीं वांकडा होशील" असा त्याला रागावून शाप दिला ११. ह्याप्रमाणें तो आठ ठिकाणीं वांकडा होऊन अष्टावक्र ह्या नांवानेंच प्रसिद्धीस आला. त्याचा श्वेतकेतु ह्मणून एक मामा होता त्याचेंही वय ह्याच्याच बरोबरीनें होतें १२. इकडे आपल्या उदराचे ठिकाणीं वाढणाऱ्या गर्भानें जिला पीडा होत आहे अशी ती सुजाता एकांतीं आपल्या पतीला प्रसन्न करून घेऊन द्रव्य नसल्यामुळें धनाच्या इच्छेनें त्याला ह्मणाली १३ "हे महर्षे, मज दरिद्रीचें आतां धनावांचून कसें होईल ? मला तर दहावा महिना सुरू आहे ज्याच्या योगानें ही आपत्ति मला तरून जाता येईल तें द्रव्य आपणांजवळ यत्किंचितही नाहीं" १४. ह्याप्रमाणें भार्येनें सांगितलें असतां कहोड धन मिळविण्याकरितां जनकाकडे आला आणि वाद करणाऱ्या बंदीनें त्याचें निग्रहण करून उदकामध्यें त्या ब्राह्मणाला बुडवून टाकिलें १५. तेव्हां इकडे सूतानें वादांत पराजित करून त्या कहोडाला उदकांत बुडविलेलें उद्दालकानें श्रवण केलें असतां सुजातेला सांगितलें कीं, हे सुजाते, कसेंही करून ही गोष्ट अष्टावक्राला कळूं देऊं नकोस १६. ह्याप्रमाणें तिनें ही गोष्ट अष्टावक्राला न कळविल्यामुळें त्यालाही ती कोणाकडून कळली नाहीं. अष्टावक्र उद्दालकाला आपल्या बापाप्रमाणें समजून

ततो वर्षे द्वादशे श्वेतकेतुरष्टावक्रं पितुरङ्के निषण्णम् । अपाकर्षद्गृह्य-
पाणौ रुदन्तं नायं तवाङ्कः पितुरित्युक्तवांश्च १८ यत्तेनाक्तं दुरुक्तं तक्त-
दानीं हृदि स्थितं तस्य सुदुःखमासीत् । गृहं गत्वा मातरं सोभिगम्य
पप्रच्छेदं क्व नु तातो ममेति १९ ततः सुजाता परमार्तरूपा शापाद्भीता
सर्वमेवाचचक्षे । तद्वै तत्त्वं सर्वमाज्ञाय रात्राविरत्यब्रवीच्छ्वेतकेतुं स
विप्रः २० गच्छाव यज्ञं जनकस्य राज्ञो बह्वाश्चर्यः श्रूयते तस्य यज्ञः ।
श्रोष्यावोत्र ब्राह्मणानां विवादमन्नं चाग्र्यं तत्र भोक्ष्यावहे च २१ विच-
क्षणत्वं च भविष्यति नौ शिवश्च सौम्यश्च हि ब्रह्मघोषः २२ तौ जग्म-
तुर्मातुलभागिनेयौ यज्ञं समृद्धं जनकस्य राज्ञः । अष्टावक्रः पथि राज्ञा
समेत्य प्रोत्सार्यमाणो वाक्यमिदं जगाद २३ [५१२९] इति श्रीम-
हाभारते०शतसाहस्र्यां संहितायां माारण्यके पर्वणि तीर्थयात्रापर्वणि लोम-
शतीर्थयात्रायामष्टावक्रीये द्वात्रिंशदधिकशततमोध्यायः ॥ १३२ ॥

अष्टावक्र उवाच ॥ अन्धस्य पन्था बधिरस्य पन्थाः स्त्रियः पन्था

श्वेतकेतु हा आपला भाऊ समजत असे १७. तदनंतर बाराव्या वर्षी अष्टावक्र आपल्या बापाच्या मांडीवर बसला असतां श्वेतकेतूनें त्याचा हात धरून त्याला आपल्या बापाच्या मांडीवरून उठविलें. तेव्हां तो रडूं लागला असतां ही मांडी तुझ्या बापाची नव्हे असें तो श्वेतकेतु त्याला ह्मणाला १८. हें त्याचें द्वेषयुक्त भाषण श्रवण करितांक्षणीं त्याच्या अंतःकरणाला अतिशय दुःख झालें आणि तो घरीं आपल्या मातोश्रीकडे येऊन, "हे माते, माझा तात कोठें आहे ?" असें तिला ह्मणाला १९. तदनंतर सुजातेनें अत्यंत दुःखित होऊन शापाच्या भीतानें तें सर्व त्याला निवेदन केलें व त्या ब्राह्मण अष्टावक्रानें तें सर्व ऐकून घेऊन रात्रीं श्वेतकेतूला ह्मटलें २० "हे श्वेतकेतो, आपण जनकराजाच्या यज्ञाला जाऊं. तेथें मोठमोठ्या चमत्कारिक गोष्टी आपल्या दृष्टीं पडतील. आपण ब्राह्मणांचा वादविवाद ऐकूं आणि तेथें उत्तम प्रकारचें अन्नही भक्षण करूं २१. तेथें गेल्यावर आपल्याला उत्तम ज्ञान प्राप्त होईल आणि कल्याणकारक व सौम्य असा वेदघोषही आपल्या ऐकण्यांत येईल" २२. असें बोलून ते मामाभाचे जनक राजाच्या समृद्ध यज्ञाला जावयास निघाले असतां अष्टावक्राची आणि राजाची रस्त्यांत गांठ पडून त्यानें त्याला "बाजूला हो" असें सांगितलें असतां तो अष्टावक्र बोलूं लागला २३. ह्याप्रमाणें० वनपर्वांतील तीर्थयात्रापर्वापैकीं लोमशतीर्थयात्रेसंबंधीं अष्टावक्राच्या आख्यानाविषयीं एकशें बत्तिसावा अध्याय समाप्त झाला ॥ १३२ ॥

अष्टावक्र ह्मणतोः— जर रस्त्यावर ब्राह्मण नसला तर तो मार्ग आंधळा, बहिरा,

भारवाहस्य पन्थाः। राज्ञः पन्था ब्राह्मणेनासमेत्य समेत्य तु ब्राह्मणस्यैव पन्थाः १ राजोवाच ॥ पन्था अयं तेऽद्य मयानिसृष्टो येनेच्छसि तेन कामं व्रजस्व। न पावको विद्यते वै लघीयानिन्द्रोऽपि नित्यं नमते ब्राह्मणानाम् २ अष्टावक्र उवाच ॥ प्राप्तौ स्व यज्ञं नृप संदिदृक्षू कौतूहलं नौ बलवन्नरेन्द्र। प्राप्तावतिथी प्रवेशं काङ्क्षावहे द्वारपतेस्तवाज्ञाम् ३ ऐन्द्रद्युम्ने यज्ञदृशाविहावां विवक्षू वै जनकेन्द्रं दिदृक्षू। नौ वै क्रोधव्याधिना दह्यमाना वयं च नौ द्वारपालो रुणद्धि ४ द्वारपाल उवाच ॥ वन्दिसमादेशकरा वयं स्म निबोध वाक्यं च मयेर्यमाणम्। न वै बालाः प्रविशन्त्यत्र विप्रा वृद्धा विद्वांसः प्रविशन्त्यत्र विप्राः ५ अष्टावक्र उवाच ॥ यद्यत्र वृद्धेषु कृतः प्रवेशो युक्तं प्रवेष्टुं मम द्वारपाल। वयं हि वृद्धाश्चरितव्रताश्च वेदप्रभावेन समन्विताश्च ६ शुश्रूषवश्चापि जितेन्द्रियाश्च ज्ञानागमे चापि गताः स्म निष्ठाम्। न बाल इत्येव मन्तव्यमाहुर्बालोऽप्यग्नि-

---

स्त्रिया, डोक्यावर ओझें घेतलेला व राजा ह्यांचाच होय आणि ब्राह्मण जर रस्त्यावर असेल तर तो ब्राह्मणाचाच होय १. राजा ह्मणतो:— हे ब्रह्मन्, हा मी आपल्याला मार्ग सोडिला आहे. ज्या रस्त्यानें आपणांला जावयाचें असेल त्या रस्त्यानें आपण खुशाल जा. कारण, अग्नि जरी दिसण्यांत लहान असला तरी त्याला कोणी लहान ह्मणत नाहीं व इंद्र सुद्धां ब्राह्मणांना सदोदित मान देतो २. अष्टावक्र ह्मणतो:—हे भूपाला, आह्मी यज्ञ अवलोकन करण्याकरितां आलों आहोंत. कारण, त्याचें आह्मांला अतिशय कौतुक वाटत असून अतीथि वेषानें आल्यामुळें तुझ्या द्वारपालाकडून आह्मांला आंत येण्याची अनुज्ञा मिळावी अशी आमची इच्छा आहे ३. हे इंद्रद्युम्नतनया, आह्मी यज्ञ अवलोकन करण्याच्या इच्छेनें येथें आलों असून जनकाविषयीं भाषण करावें असें आमच्या मनांत आहे; परंतु, क्रोधरूप व्याधीनें जळूं लागणाऱ्या आह्मा उभयतांना द्वारपाल आंत जाण्याला प्रतिबंध करीत आहे ४. द्वारपाल ह्मणतो:—हे ब्रह्मन्, आपणांला माझा नमस्कार असो. आह्मी राजाचे आज्ञाधारक आहोंत. तस्मात्, मी जें आतां भाषण करणार आहें तें आपण श्रवण करा. हे विप्रश्रेष्ठा, येथें बालकांना प्रवेश करण्याला अधिकार नसून जे वृद्ध व चतुर असे ब्राह्मण आहेत त्यांनाच प्रवेश करण्याला अधिकार आहे ५. अष्टावक्र ह्मणतो:— जर येथें वृद्धांना प्रवेश करितां येत असेल तर मला देखील तो करितां येतोच. कारण, आह्मीही वृद्ध, व्रताचरण केलेले व वेदसंबंधीं ज्ञानानें युक्त असे आहोंत ६ आणि वृद्धांची सेवा करणारे इंद्रियांचें दमन करणारे व सिद्धांतशास्त्रावर निश्चय ठेवणारे असेच आह्मी आहोंत. आह्मांला बाल ह्मणणें योग्य

दहति स्पृश्यमानः ७ द्वारपाल उवाच ॥ सरस्वतीमीरय वेदजुष्टामेकाक्षरां बहुरूपां विराजम्। अङ्गात्मानं समवेक्षस्व बालं किं श्लाघसे दुर्लभा वै मनीषी ८ अष्टावक्र उवाच ॥ न ज्ञायते कायवृद्ध्या विवृद्धिर्यथाष्ठीला शाल्मलेः संप्रवृद्धा । ह्रस्वोल्पकायः फलितो विवृद्धो यश्चाफलस्तस्य न वृद्धभावः ९ द्वारपाल उवाच ॥ वृद्धेभ्य एवेह मतिं स्म बाला गृह्णन्ति कालेन भवन्ति वृद्धाः । न हि ज्ञानमल्पकालेन शक्यं कस्माद्बालः स्थविर इव प्रभाषसे १० अष्टावक्र उवाच ॥ न तेन स्थविरो भवति येनास्य पलितं शिरः । बालोपि यः प्रजानाति तं देवाः स्थविरं विदुः ११ न हायनैर्न पलितैर्न वित्तेन न बन्धुभिः । ऋषयश्चक्रिरे धर्मं योनूचानः स नो महान् १२ दिदृक्षुरस्मि संप्राप्तो बन्दिनं राजसंसदि । निवेदयस्व मां द्वाःस्थ राज्ञे पुष्करमालिने १३ द्रष्टास्यद्य वदतोस्मान्द्वारपाल मनीषिभिः । सह वादे विवृद्धे तु बन्दिनं चापि निर्जितम् १४ पश्यन्तु विप्राः

नाहीं. कारण, अग्नीच्या लहान ठिणगीला जरी स्पर्श केला तरी ती जाळूनच टाकिते ७. द्वारपाल ह्मणतोः—बा बालका, जर तूं वेद जाणीत असशील तर मुनींनीं सेवित, ब्रह्मप्रतिपाद्य, एकाक्षर, बहुरूप आणि कर्मकांडामध्यें प्रशस्त अशा श्रुतीचें पठण कर. हे बालका, तूं आपल्या शरीराकडे पाहून बोल. व्यर्थ आत्मप्रशंसा कां करीत आहेस ? विद्वान् पुरुष फार दुर्लभ आहे ८. अष्टावक्र ह्मणतोः— ज्याप्रमाणें शाल्मली (शेवरी) वृक्षाच्या आठोळीचा स्थूलपणा व्यर्थ त्याचप्रमाणें शरीराचा स्थूलपणा व्यर्थ आहे. एकादा वृक्ष लहान असूनही जर तो फलानें भरलेला असला तरच तो योग्य व एकादा मोठा असूनही जर फलरहित असेल तर तो अयोग्य आहे ९. द्वारपाल ह्मणतोः—लहान मुलें वृद्धांपासूनच ज्ञान प्राप्त करून घेऊन कांहीं वर्षें लोटलीं असतां वृद्ध होतात. ज्ञान हें थोडक्या वेळांत प्राप्त होणारें नाहीं. असें असून तूं लहान असतां वृद्धांप्रमाणें कसें भाषण करीत आहेस ? १०. अष्टावक्र ह्मणतोः—कालपरत्वें केंस पिकून डोकें पांढरें झालें ह्मणजे तो वृद्ध झाला असें नाहीं. जो लहान असून ज्ञानसंपन्न असेल त्यालाच देव वृद्ध समजतात ११. ऋषींनीं धर्मसंबंधांत जो पुष्कळ वर्षांचा, केंस पिकलेला, धनवान् व बंधुजनांनीं युक्त असेल त्याला मोठेपणा दिलेला नसून जो सांग वेदाध्ययन करणारा तोच आह्मांला थोर असें ठरलें आहे १२. हे द्वारपाला, " मी सभेंत बंदीला अवलोकन करण्याकरितां प्राप्त झालों आहें " असें सुवर्णाच्या माळा कंठामध्यें धारण करणाऱ्या राजाला निवेदन कर १३. हे द्वारपाला, आज विवादी लोकांशीं भाषण करीत असतांना आह्मांला तूं अवलोकन

परिपूर्णविद्याः सहैव राज्ञा सपुरोधमुख्याः। उताहो वाप्युच्चतां नीचतां वा तूष्णींभूतेष्वेव सर्वेष्वथाद्य १५ द्वारपाल उवाच ॥ कथं यज्ञं दशवर्षो विशेस्त्वं विनीतानां विदुषां संप्रवेशम्। उपायतः प्रयतिष्ये तवाहं प्रवेशने कुरु यत्नं यथावत् १६ अष्टावक्र उवाच॥ भो भो राजञ्जनकानां वरिष्ठ त्वं वै सम्राट् त्वयि सर्वं समृद्धं। त्वं वा कर्ता कर्मणां यज्ञियानां ययातिरेको नृपतिर्वा पुरस्तात् १७ वृद्धान्बन्दी वादविदो निगृह्य वादे भग्नानप्रतिशंकमानः। त्वयाभिसृष्टैः पुरुषैरासकृद्भिर्जले सर्वान्मज्जयतीति नः श्रुतम् १८ सोऽहं श्रुत्वा ब्राह्मणानां सकाशे ब्रह्माद्वैतं कथयितुमागतोऽस्मि। क्वासौ बन्दी यावदेनं समेत्य नक्षत्राणीव सविता नाशयामि १९ राजोवाच ॥ आशंससे बन्दिनं वै विजेतुमविज्ञाय त्वं वाक्यबलं परस्य। विज्ञातवीर्यैः शक्यमेवं प्रवक्तुं दृष्टश्चासौ ब्राह्मणैर्वेदशीलैः २० आशंससे त्वं बन्दिनं वै विजे-

---

करिशील आणि त्यांच्याशीं भाषण करीत असतां बरेचसें बोलणें झालें ह्मणजे बंद्यालाही जिंकून टाकिलेलें तूं पहाशील १४. विद्यासंपन्न ब्राह्मण व श्रेष्ठ श्रेष्ठ पुरोहितासहवर्तमान राजा हे—सर्व वादविवाद करणाऱ्या मंडळीला कांहीं सुचेनासें होऊन ती स्वस्थ बसली ह्मणजे आह्मी थोर आहोंत किंवा लहान आहोंत हें—आज अवलोकन करोत १५. द्वारपाल म्हणतो:—जेथें विनीत व विद्वान् लोकांनाच जाण्याची परवानगी आहे अशा यज्ञांत तूं दहा वर्षांचा मुलगा कसा प्रवेश करशील ? आतां तुला आंत सोडण्याविषयीं मी शक्य तो प्रयत्न करीन व तूंही यत्न कर (अर्थात् आपलें ज्ञान प्रकट कर) १६. अष्टावक्र ह्मणतो:— हे जनकाच्या वंशांत श्रेष्ठ असलेल्या राजा, तूं सार्वभौम असून तुझ्यावरच सर्व कांहीं अवलंबून आहे. अशाप्रकारचे यज्ञ पूर्वी एका ययातिराजानें केले व दुसरा तूं आज हा करीत आहेस १७. ह्या ठिकाणीं एक बंदी, मनांत कोणत्याही प्रकारची शंका न आणितां तूं त्याच्या ताब्यांत दिलेल्या व त्याचें प्रिय करणाऱ्या पुरुषांकडून वादामध्यें हार पावलेल्या सर्व वृद्धांना जलामध्यें बुडवून टाकितो असें आह्मी ऐकिलें आहे १८. ह्मणून मी येथें ब्राह्मणांच्या समक्ष तुला अद्वैत ब्रह्म कथन करण्याकरितां प्राप्त झालों आहें. तो बंदी कोठें आहे ? ज्याप्रमाणें सूर्य आपल्या संनिधानामुळें नक्षत्रें निस्तेज करितो त्याप्रमाणें त्या बंदीला मी निस्तेज करून टाकीन १९. राजा ह्मणतो:—तूं बंद्याला जिंकीन असें म्हणतोस परंतु, हें तुझें बोलणें दुसऱ्याच्या वाग्बलाला न जाणतां आहे. ज्यांना त्याचा पराक्रम माहीत आहे त्यांनींच हें ह्मणणें योग्य आहे. आजपर्यंत पुष्कळ वैदिक ब्राह्मणांनीं त्याला पाहिलें आहे २०. ह्या बंद्याचें बल न जाणतां तं " मी त्याला जिंकीन " असें ह्मणत आहेस. पूर्वी

तुमविज्ञाय त्वा तु बलं बन्दिनोऽस्य । समागता ब्राह्मणास्तेन पूर्वं न शोभन्ते भास्करेणेव ताराः २१ आशंसंतो बन्दिनं जेतुकामास्तस्यान्तिकं प्राप्य विलुप्तशोभाः । विज्ञानमत्ता निःसृताश्चैव तात कथं सदस्यैर्वचनं विस्तरेयुः २२ अष्टावक्र उवाच ॥ विवादितोसौ न हि मादृशैर्हि: सिंहीकृतस्तेन वदत्यभीतः । समेत्य मां निहतः शेष्यतेद्य मार्गे भग्नं शकटमिवाबलाक्षम् २३ राजोवाच॥त्रिंशकद्वादशांशस्य चतुर्विंशति पर्वणः । यस्त्रिषष्टिशतारस्य वेदार्थं स परः कविः २४ अष्टावक्र उवाच ॥ चतुर्विंशतिपर्व त्वां षण्नाभि द्वादशप्रधि।तत्त्रिषष्टिशतारं वै चक्रं पातु सदागति २५ राजोवाच । बडवे इव संयुक्ते श्येनपाते दिवौकसाम् । कस्तयोर्गर्भमाधत्ते गर्भं सुषुवतुश्च कम् २६ अष्टावक्र उवाच॥ मा स्म ते ते गृहे राजञ्शात्रवाणामपि ध्रुवम् । वातसारथिरागन्ता गर्भं सुषुवतुश्च तम् २७

त्याच्याकडे पुष्कळ ब्राह्मण आले, परंतु, सूर्यापुढें ज्याप्रमाणें तान्यांचें तेज पडत नाहीं त्याप्रमाणें त्यापुढें त्या ब्राह्मणांचें कांहीं तेज पडलें नाहीं २१. बा वत्सा अष्टावक्रा, आजपर्यंत पुष्कळ ब्राह्मण " आह्मी बंद्याला जिंकण्याकरितां आलों " असें ह्मणत त्याच्या संनिध प्राप्त झाले; परंतु, त्याची भेट होतांच ते जरी ज्ञानसंपन्न असत तथापि निस्तेज होऊन सभेंतून त्यांना परत जावें लागें. ह्यापेक्षां त्याच्यासंबंधानें तुला आणखी काय जास्त सांगावें ? २२. अष्टावक्र ह्मणतोः—(आजपर्यंत) माझ्यासारिख्याशीं त्याचा वाद झाला नाहीं ह्मणून तो सिंहाप्रमाणें गर्जना करीत निर्भयपणें बोलत आहे. तो आतां माझ्यासमोर आला ह्मणजे रस्त्यामध्यें कणा मोडलेल्या गाड्याप्रमाणें वादांत जिंकल्यामुळें निरुपयोगी होऊन पडेल २३. राजा ह्मणतोः—ज्याला तीस तीस अंश (ह्मणजे तास दिवस) असे बारा भाग, (ह्मणजे बारा राशी) चोविस पर्वें (अमावास्या व पौर्णिमा) व तीनशें साठ आरा (ह्मणजे दिवस) आहेत त्याचा ज्याला अर्थ व कारण समजेल तोच उत्कृष्ट कवि होय २४. अष्टावक्र ह्मणतोः—ज्याला चोवीस पर्वें, सहा नाभी, (ह्मणजे ऋतु) बारा राशी आणि तीनशें साठ अहोरात्री आहेत असें सदोदित फिरणारें कालचक्र (अर्थात् त्यावेळीं केलेला विहित धर्म) तुझें रक्षण करो २५. राजा ह्मणतोः—देवांमध्यें श्येनाप्रमाणें अकस्मात् प्राप्त होणाऱ्या व रथाला जोडलेल्या घोड्याप्रमाणें एकसारिख्या चालणाऱ्या, देवता कोणापासून उत्पन्न झाल्या व त्यांच्यापासून कोण उत्पन्न झाला ? २६.अष्टावक्र ह्मणतोः—हे राजा, त्या विद्युत् व अशिनी देवता (ह्मणजे दुःख व मृत्यु) तुझ्या घरीं तर नसोतच; परंतु, तुझ्या शत्रूंच्याही घरीं नसोत. त्या देवतांपासून मेघरूपी गर्भ उत्पन्न झाला २७. राजा

राजोवाच ॥ किं स्वित्सुप्तं न निमिषति किं स्विज्जातं न चोपति । कस्य स्विद्धृदयं नास्ति किं स्विद्वेगेन वर्धते २८ अष्टावक्र उवाच ॥ मत्स्यः सुप्तो न निमिषत्यण्डं जातं न चोपति । अश्मनो हृदयं नास्ति नदी वेगेन वर्धते २९ राजोवाच ॥ न त्वां मन्ये मानुषं देवसत्त्व न त्वं बालः स्थविरः संमतो मे । न ते तुल्यो विद्यते वाक्प्रलापे तस्माद्द्वारं वितराम्येष बन्दी ३०[५१५९]इति श्रीमहाभारते॰ आरण्यके पर्वणि तीर्थयात्रापर्वणि लोमशतीर्थयात्रायामष्टावक्रीये त्रयस्त्रिंशदधिकशततमोऽध्यायः ॥१३३ ॥

अष्टावक्र उवाच ॥ अत्रोग्रसेनसमितेषु राजन्समागतेष्वप्रतिमेषु राजसु । नावैमि बन्दिं वरमत्र वादिनां महाजले हंसमिवाददामि १ न मेऽद्य वक्ष्यस्यतिवादिमानिन्ग्लहं प्रपन्नः सरितामिवागमः । हुताशनस्येव समिद्धतेजसः स्थिरो भवस्वेह ममाद्य बन्दिन् २ व्याघ्रं शयानं प्रति मा प्रबोध आशीविषं सृक्किणी संलिहानम् । पदा हतस्येह शिरोभिहत्य

म्हणतो:—झोंप लागली असतां उघडे डोळे कोणाचे असतात, जन्माला येऊन सुद्धां कोणता पदार्थ हलत नाहीं, हृदय कोणाला नाहीं व अतिशय वेगानें काय वाढतें ? २८ अष्टावक्र म्हणतो:—मासा निजला असतांही त्याचे डोळे उघडे असतात, अडें उत्पन्न झालें असतांही हलत नाहीं, निर्जीव पदार्थाला हृदय नाहीं व अतिशय वेगानें नदी वाढते २९. राजा म्हणतो:– हे देवतुल्य पराक्रमी अष्टावक्रा, मी तुला मनुष्य व बाल न समजतां देव व वृद्ध समजत आहें. तुझ्यासारिखा भाषण करणारा मला कोणीच दिसत नाहीं. तस्मात् मी तुला आंत जाण्याची परवानगी देतों. तो तिकडे बंदी उभा आहे ३०. ह्याप्रमाणें महामुनिव्यासप्रणीत लक्षग्रंथात्मक श्रीमहाभारतांतर्गत वनपर्वांतील तीर्थयात्रापर्वापैकीं लोमशतीर्थयात्रेसबंधीं अष्टावक्रीय आख्यानाविषयीं एकशें तेहेतिसावा अध्याय समाप्त झाला ॥ १३३ ॥

अष्टावक्र म्हणतो:—हे राजा, येथें महापराक्रमी व अप्रतिम असे राजे बसले असल्यामुळें मोठ्या जलाशयाचे ठिकाणीं हंसाचा ज्याप्रमाणें पत्ता लागत नाहीं त्याप्रमाणें वाद करणाऱ्यांमध्यें श्रेष्ठ असलेल्या बंदीचा येथें मला पत्ता लागत नाहीं १. हे अत्यंत वाद करणाऱ्या मानी बंदिन्, ज्याअर्थी तूं पराजित झालेल्या गृहस्थांना उदकामध्यें बुडविण्याची प्रतिज्ञा केली आहेस त्याअर्थी तूं मला प्रत्युत्तर दे. प्रलयकालीं अत्यंत प्रदीप्त झालेल्या अग्नीपुढे नदीचा वेग ज्याप्रमाणें शुष्क होतो त्याप्रमाणें तूं शुष्क होशील. आज माझ्यासमोर तूं (मी विचारिलेल्या प्रश्नांचीं) उत्तरें देण्याला तयार हो २. हे बंदिन् , निजलेल्या वाघाला व आपले ओठ्प्रांत चाटीत बसलेल्या

नाबुद्धो वै मोक्ष्यसे तन्निबोध ३ यो वै दर्पात्संहननोपपन्नः सुदुर्बलः पर्वतमाविहन्ति । तस्यैव पाणिः सनखो विशीर्यते न चैव शैलस्य हि दृश्यते व्रणः ४ सर्वे राज्ञो मैथिलस्य मैनाकस्येव पर्वताः । निकृष्टभूता राजानो वत्सा ह्यनडुहो यथा ५ यथा महेन्द्रः प्रवरः सुराणां नदीषु गङ्गा प्रवरा यथैव । तथा नृपाणां प्रवरस्त्वमेको बन्दिं ममभ्यानय मत्स-काशम् ६ लोमश उवाच ॥ एवमष्टावक्रः समितौ हि गर्जञ्जातक्रोधो बन्दिनमाह राजन् । उक्ते वाक्ये चोत्तरं मे ब्रवीहि वाक्यस्य चाप्युत्तरं ते ब्रवीमि ७ बन्द्युवाच ॥ एक एवाग्निर्बहुधा समिध्यते एकः सूर्यः सर्वमिदं विभाति । एको वीरो देवराजोऽरिहन्ता यमः पितॄणामीश्वरश्चैक एव ८ अष्टावक्र उवाच ॥ द्वाविन्द्राग्नी चरतो वै सखायौ द्वौ देवर्षी नारदपर्वतौ च । द्वावश्विनौ द्वे रथस्यापि चक्रे भार्यापती द्वौ विहितौ विधात्रा ९ बन्द्युवाच ॥ त्रिःसूयते कर्मणा वै प्रजेयं त्रयो युक्ता वाज-

---

सर्पाला लत्ताप्रहार करून जागृत करूं नकोस. जर त्याला प्रहार केलास तर तो तुला दंश केल्यावांचून जाऊं देईल असें मला वाटत नाहीं. (तात्पर्य, सर्पस्थानापन्न असलेल्या मला, माझ्या बापाला धरणें हाच लत्ताप्रहार करून आतां तूं सुरक्षित राहणार नाहींस) ३. जो स्वतः दुर्बल असून आपल्या शरीराच्या दृढतेच्या गर्वानें पर्वताला प्रहार करितो त्याचा हात नखांसहवर्तमान विदीर्ण होतो; परंतु, पर्वताला कांहीं एक इजा होत नाहीं ४. ज्याप्रमाणें सर्व पर्वत मैनाकापेक्षां व सर्व वासरें बैलापेक्षां कमी योग्यतेचीं असतात त्याचप्रमाणें सर्व राजे ह्या मिथिलाधिपतीपेक्षां कमी योग्यतेचे आहेत ५. ज्याप्रमाणें देवांमध्यें इंद्र श्रेष्ठ व नद्यांमध्यें गंगा श्रेष्ठ त्याचप्रमाणें, हे जनका, सर्व नृपतींमध्यें तूं एकटा श्रेष्ठ आहेस. करितां त्या बंद्याला माझ्याजवळ घेऊन ये ६. लोमश ह्मणतात:—ह्याप्रमाणें कोपाविष्ट झालेल्या अष्टावक्रानें त्या राजसभेचे ठिकाणीं गर्जना केली आणि तो ह्मणाला "हे बंदिन्, मी प्रश्न विचारिल्याबरोबर तूं मला त्याचें उत्तर दे व तूं विचारिल्या बरोबर मी तुला उत्तर देईन ७ बंदी ह्मणतो:—एकच अग्नि पुष्कळ प्रकारानें वाढतो, एकच सूर्य सर्व प्रकाशित करतो, देवांचा अधिपति वीर इंद्र एकटाच शत्रूंचा नाश करितो आणि एकच यम पितरांचा अधिपति आहे ८. अष्टावक्र ह्मणतो:—ते दोघे मित्र इंद्र आणि अग्निच सदोदित एके ठिकाणीं संचार करितात, नारद व पर्वत ह्मणून दोघेच देवर्षि आहेत, अश्विनीकुमारही दोनच आहेत, रथाला दोनच चाकें असतात व ब्रह्मदेवानेंही स्त्रीपुरुषांचे युग्मच उत्पन्न केलें आहे ९. बंदी ह्मणतो:—कर्मांच्या योगानें प्रजा तीन प्रकारानें उत्पन्न होतात आणि वाजपेय

पेयं वहन्ति । अध्वर्यवस्त्रिसवनानि तन्वते त्रयो लोकास्त्रीणि ज्योतींषि
चाहुः १० अष्टावक्र उवाच ॥ चतुष्टयं ब्राह्मणानां निकेतं चत्वारो वर्णा
यज्ञमिमं वहन्ति । दिशश्चतस्रो वर्णचतुष्टयं च चतुष्पदा गौरपि शश्व-
दुक्ता ११ बन्द्युवाच ॥ पञ्चाग्नयः पञ्चपदा च पङ्क्तिर्यज्ञाः पञ्चैवाप्यथ
पञ्चेन्द्रियाणि । दृष्टा वेदे पञ्चचूडाप्सराश्च लोके ख्यातं पञ्चनदं च पुण्यम् १२
अष्टावक्र उवाच॥ षडाधाने दक्षिणामाहुरेके षट् चैवेमे ऋतवः काल-
चक्रम् । षडिन्द्रियाण्युत षट् कृत्तिकाश्च षट् साद्यस्काः सर्ववेदेषु दृष्टाः १३
बन्द्युवाच ॥ सप्त ग्राम्याः पशवः सप्त वन्याः सप्त च्छन्दांसि क्रतुमेकं
वहन्ति। सप्तर्षयः सप्त चाप्यर्हणानि सप्ततन्त्री प्रथिता चैव वीणा १४
अष्टावक्र उवाच ॥ अष्टौ शाणाः शतमानं वहन्ति तथाष्टपादः शरभः
सिंहघाती । अष्टौ वसूञ्शुश्रुम देवतासु यूपश्चाष्टास्रिर्विहितः सर्वयज्ञे १५

यज्ञालाही तीन वेदाची (ह्मणजे ऋग्वेद, यजुर्वेद व सामवेद यांची) अपेक्षा असते, अध्वर्यु यज्ञामध्यें तीन वेळेला यजन करितात, लोक तीन आहेत व तेज तीन प्रकारचें असतें. १०. अष्टावक्र ह्मणतो:—ब्राह्मणांना आश्रम चार आहेत, यज्ञाचा अधिकार असलेले असे चार वर्ण आहेत, दिशा चार आहेत, वर्णमालिकेंतील वर्ण चार आहेत व गाईला (ह्मणजे वाणीला) पायही चारच असतात ११. बंदी ह्मणतो:— (गार्हपत्य, दक्षिणाग्नि, आहवनीय, सभ्य व अवसथ्य असे) अग्नि पांच आहेत, पंक्तिच्छंदाला (आठ आठ अक्षराचे) पांच पाद असतात, (अग्निहोत्र, दर्शपूर्णमास, चातुर्मास्य आणि सोम असे यज्ञ पांच आहेत, (श्रोतृ, त्वक् चक्षु, जिह्वा आणि प्राण अशीं) इंद्रियें पांच आहेत, वेदामध्यें चैतन्य पांच प्रकारचें सांगितलें आहे आणि लोकांमध्यें विख्यात अशा पांचच विषयरूप नद्या आहेत १२. अष्टावक्र ह्मणतो:—अग्निहोत्रांतील अग्निसिद्ध करण्याचे वेळीं सहा गाई दक्षिणा द्याव्यात असें कित्येकांचें मत आहे, संवत्सरात्मक कालचक्राचे ऋतुरुपी सहा भाग आहेत, मनासहवर्तमान श्रोत्रादिक इंद्रियें सहा आहेत, कृत्तिकाही सहा आहेत आणि साद्यस्क यज्ञांची संख्याही वेदामध्यें सहा सांगितली आहे १३. बंदी ह्मणतो:—ग्राम्य पशू सात आहेत, वनसंबंधीं पशूंची संख्या सातच आहे, एक यज्ञ संपूर्ण होण्याकरितां सात छंदांची अवश्यकता असते, ऋषि सात आहेत, संमान करण्याचे प्रकारही सातच आहेत आणि वीणेला सातच तारा असल्याची प्रसिद्धि आहे १४. अष्टावक्र ह्मणतो:—सणाच्या सूत्राच्या आठ गोण्यांत (ह्मणजे विषयांत) पुष्कळ मावतें, सिंहाला मारणाऱ्या शरभाला आठ पाद असतात देवांमध्यें वसू आठ आहेत हें आमच्या ऐकण्यांत आहे व सर्व यज्ञामध्यें यूप आठ असतात १५.

बन्द्युवाच ॥ नवैवोक्ताः सामिधेन्यः पितॄणां तथा प्राहुर्नवयोगं विसर्गम् । नवाक्षरा बृहती संप्रदिष्टा नवैव योगो गणनामेति शश्वत् १६ अष्टावक्र उवाच ॥ दिशो दिशांकः पुरुषस्य लोके सहस्रमाहुर्दश पूर्णं शतानि । दशैव मासान्बिभ्रति गर्भवत्यो दशेरका दश दाशा दशार्हाः १७ बन्द्युवाच ॥ एकादशैकादशिनः पशूनामेकादशैवात्र भवन्ति यूपाः । एकादश प्राणभृतां विकारा एकादशोक्ता दिवि दिवेषु रुद्राः १८ अष्टावक्र उवाच ॥ संवत्सरं द्वादशमासमाहुर्जगत्याः पादो द्वादशैवाक्षराणि । द्वादशाहः प्राकृतो यज्ञ उक्तो द्वादशादित्यान्कथयन्तीह धीराः १९ बन्द्युवाच॥ त्रयोदशी तिथिरुक्ता प्रशस्ता त्रयोदशद्वीपवती मही च । लोमश उवाच॥ एतावदुक्त्वा विरराम बन्दी श्लोकस्यार्धं व्याजहाराष्टवक्रः । अष्टावक्र उवाच ॥ त्रयोदशाहानि ससार केशी त्रयोदशादीन्यतिच्छदांसि चाहुः २० ततो महानुदतिष्ठन्निनादस्तूष्णींभूतं सूतपुत्रं निशम्य । अधोमुखं ध्यानपरं तदानीमष्टावक्रं चाप्युदीर्यन्तमेव २१ तस्मिंस्तथा संकुले वर्तमाने स्फीते

बंदी ह्मणतो:—पितरांच्या यज्ञामध्यें अग्नि प्रदीप्त करण्याला नऊ मंत्रांचा उपयोग करितात, सृष्टीच्या उत्पत्तीचेही नऊ प्रकार आहेत, बृहतीछंदाच्या एका पदाला नऊ अक्षरें लागतात आणि नेहमीं नऊ ह्या संख्येवांचून गणित होत नाहीं १६. अष्टावक्र म्हणतो:—दिशा दहा आहेत,ह्या लोकांमध्यें पुरुषाला दहा शंभरा दिल्या म्हणजे एक हजार होतो असें समजतें. गर्भिणी स्त्रिया आपला गर्भ दहा महिने धारण करितात, खरें ज्ञान शिकविणारे दहा आहेत, त्याचा द्वेष करणारे दहा आहेत व पुनरपि ते शिकणारेही दहाच आहेत १७. बंदी म्हणतो:—प्राण्याला अकराच पदार्थांचा उपभोग घेतां येतो, यूपही अकराच असतात, सजीव मनुष्यांना स्वाभाविक अकरा अदलाबदली आहेत व स्वर्गामध्यें देवांत अकराच रुद्र आहेत १८. अष्टावक्र म्हणतो:—बारा महिने मिळून एक वर्ष होतें, जगतीच्छंदाच्या एका चरणाला बारा अक्षरें असतात, प्राकृत यज्ञ बारा दिवस चालतो आणि धीर पुरुष आदित्य बारा आहेत असें म्हणतात १९. बंदी म्हणतो:—सर्व कर्माला त्रयोदशी तिथी प्रशस्त धरलेली असून या पृथ्वीलाही तेराच बेटें आहेत. लोमश म्हणतात:—ह्याप्रमाणें अर्धा श्लोक म्हणूनच बंदी स्तब्ध राहिला असतां अष्टावक्र ह्मणतो:— केशीनें तेरा दिवसपर्यंत यजन केलें आणि अतिच्छदाला तेराच अक्षरें आहेत असें ह्मणतात २०. (ह्याप्रमाणें श्रवण करितांक्षणीं) खालीं तोंड घालून व मौन धारण करून ध्यान करीत बसलेल्या सूतपुत्राला (वरुणपुत्राला) पाहून व अष्टावक्र तोच श्लोक

यज्ञे जनकस्येति राज्ञः । अष्टावक्रं पूजयन्तोभ्युपेयुर्विप्राः सर्वे प्राञ्जलयः प्रतीताः २२ अष्टावक्र उवाच ॥ अनेनैव ब्राह्मणाः शुश्रुवांसो वादे जित्वा सलिले मज्जिताः प्राक् । तानेव धर्मानयमद्य वन्दी प्राप्नोतु गृह्याशु निमज्जयैनम् २३ बन्द्युवाच ॥ अहं पुत्रो वरुणस्येति राज्ञस्तत्रास सत्रं द्वादशवार्षिकं वै। सत्रेण ते जनक तुल्यकालं तदर्थं ते प्रहिता मे द्विजाग्र्याः २४ ते तु सर्वे वरुणस्येति यज्ञं द्रष्टुं गता इम आयान्ति भूयः । अष्टावक्रं पूजये पूजनीयं यस्य हेतोर्जनितारं समेष्ये २५ अष्टावक्र उवाच ॥ विप्राः समुद्राम्भसि मज्जिता ये वाचा जिता मेधया वा विदानाः । तां मेधया वाचमथोज्जहार यथावाचमवचिन्वन्ति संतः २६ अग्निर्दहञ्जातवेदाः सतां गृहान्विसर्जयंस्तेजसा न स्म धाक्षीत् । बालेषु पुत्रेषु कृपणं वदत्सु तथा

पुनरपि मोठ्यानें ह्मणत आहे असें अवलोकन करून तेथें मोठा गलबलाट झाला २१. ह्याप्रमाणें जनक राजाच्या त्या समृद्ध यज्ञामध्यें मोठी गडबड उडून गेली असतां सर्व ब्राह्मण हात जोडून अष्टावक्राकडे आले आणि त्याची मोठी वहावा करूं लागले २२. अष्टावक्र ह्मणतोः—पूर्वी ह्याच गृहस्थानें मोठमोठाले विद्वान् ब्राह्मण वादामध्यें जिंकून पाण्यांत बुडवून टाकिले. तस्मात्, ह्या बंदीलाच धरून सत्वर उदकामध्यें बुडवून टाकावें व त्या ब्राह्मणांना जी स्थिति प्राप्त झाली ती याला प्राप्त करून द्यावी २३. बंदी ह्मणतोः—हे जनका, मी वरुणाचा मुलगा आहें. ज्यावेळीं तुझ्या घरीं सत्राला आरंभ झाला त्याचवेळीं राजा वरुणाच्या घरींही द्वादशवर्षात्मक सत्र सुरू झालें व त्या यज्ञाकरितांच मी येथून श्रेष्ठ श्रेष्ठ ब्राह्मण पाठवून दिले २४. ते वरुणाचा यज्ञ अवलोकन करण्याकरितां गेलेले हे ब्राह्मण पुनरपि परत येत आहेत. आतां मान देण्यास योग्य असलेल्या अष्टावक्राला मान देऊन मी पुनरपि त्याच्याच कृपेनें आपल्या पित्याकडे जातो २५. अष्टावक्र ह्मणतोः—जे ब्राह्मण समुद्राच्या उदकामध्यें त्यानें बुडवून टाकिले त्यांपैकीं कांहींना मोठमोठ्यानें श्लोकार्थें पठण करून व कांहींना पंडित असतांही ऊहापोहाच्या योगानें (ह्मणजे कुतर्करूप बुद्धिवादानें) जिंकून बुडवून टाकिले. आतां कुतर्करूपी समुद्रामध्यें बुडालेली वेदरूप वाणी ज्याप्रमाणें मीं वर काढिली त्याप्रमाणें उत्कृष्ट वाक्यरूप विवेकाला जाणणारे साधु माझ्या भाषणाची परीक्षा करोत २६. ज्याप्रमाणें अग्नि स्वभावतः दहन करणारा असून त्याला जातवेदा (ह्मणजे सुकृत किंवा दुष्कृत यांना जाणणारा असें) ह्मणत असल्यामुळें तो आपल्या तेजानें सत्य भाषण करणाऱ्यांचीं शरीरें न जाळितां पाप करणाऱ्यांचींच मात्र जाळतो व ज्याप्रमाणें आपल्या पुत्रासारिख्या शोकग्रस्त

वाचमवचिन्वन्ति सन्तः २७ श्लेष्मातकी क्षीणवर्चाः शृणोषि उताहो त्वां स्तुतयो मादयन्ति । हस्तीव त्वं जनक वितुद्यमानो न मामिकां वाचमिमां शृणोषि २८ जनक उवाच ॥ शृणोमि वाचं तव दिव्यरूपाममानुषीं दिव्यरूपोऽसि साक्षात् । अजैषीर्यद्बन्दिनं त्वं विवादे विसृष्ट एष तव कामोऽद्य बन्दी २९ अष्टावक्र उवाच ॥ नानेन जीवता कश्चिदर्थो मे बन्दिना नृप । पिता यद्यस्य वरुणो मज्जयैनं जलाशये ३० बन्द्युवाच ॥ अहं पुत्रो वरुणस्योत राज्ञो न मे भयं विद्यते मज्जितस्य । इमं मुहूर्तं पितरं द्रक्ष्यतेऽयमष्टावक्रश्चिरनष्टं कहोडम् ३१ लोमश उवाच ॥ ततस्ते पूजिता विप्रा वरुणेन महात्मना । उदतिष्ठंस्ततः सर्वे जनकस्य समीपतः ३२ कहोड उवाच । इत्यर्थमिच्छन्ति सुताञ्जना जनककर्मणा । यदहं नाशकं कर्तुं तत्पुत्रः कृतवान्मम ३३ उताबलस्य बलवानुत बालस्य पण्डितः । उत वाविदुषो विद्वान्पुत्रो जनक जायते ३४ शितेन ते पर-

---

बालकांनी केलेल्या दीन भाषणाचा साधु अवमान करीत नाहींत त्याप्रमाणें आपण माझ्या वचनाचा अवमान करूं नका २७. हे जनका, श्लेष्मातकी (ह्मणजे भोंकरी)वृक्षाच्या फळाचें भक्षण केल्यामुळें तुझी बुद्धि मंद होऊन व स्तुतिरूप वाक्यानें गर्व होऊन ज्याप्रमाणें हत्तीला अंकुश टोंचीत असताही तो ऐकत नाहीं त्याप्रमाणें तूं माझें भाषण श्रवण करीत नाहींस २८. जनक ह्मणतो:--ही तुझी दिव्यरूप व अमानुष वाणी मी श्रवण केली. खरोखर तूं कोणी तरी दिव्य रूप धारण करणारा आहेस. ज्याअर्थी तूं आज वादामध्यें बंद्याला जिंकून टाकिलेस त्याअर्थी आतां त्याचें वाटेल तें करण्यास तूं समर्थ आहेस २९. अष्टावक्र ह्मणतो:--हे राजा, ह्या बंद्याला जिवंत ठेवण्यांत मला कांहीं अर्थ दिसत नाहीं. याचा पिता जरी वरुण आहे तरी ह्याला जलामध्यें बुडवून टाका ३०. बंदी ह्मणतो:--मी राजा वरुणाचा पुत्र असल्यामुळें मला बुडविलें असतां कांहीं भीति वाटणार नाहीं; परंतु, हे अष्टावक्रा, पुष्कळ दिवस नष्ट झालेला तुझा पिता कहोड मात्र याच वेळीं तुझ्या दृष्टीं पडेल ३१. लोमश ह्मणतातः--तदनंतर महात्म्या वरुणानें संमानपूर्वक पूजन केलेले ते सर्व ब्राह्मण जनकाच्या समोर येऊन उभे राहिले ३२. कहोड म्हणतो:--हे जनका, ह्याकरितांच लोक आपल्याला पुत्र असावा अशी इच्छा करितात. पहा. जें कृत्य करण्याविषयीं मी असमर्थ होतों तें माझ्या मुलानें केलें ३३. हे जनका, कदाचित् शक्तिहीन पुरुषाला मोठा बलवान्, मूर्खाला शहाणा व अविद्वानाला विद्वान् असा पुत्र होतो ३४. हे राजा, तुझें कल्याण असो. ततः अंतक तीक्ष्ण धारा असलेल्या परशूनें, हे जनकराजा, रणांगणाचे ठिकाणीं तुझ्या शत्रूंनीं

शुना स्वयमेवान्तको नृप। शिरांस्यथाहरत्वाजौ रिपूणां भद्रमस्तु ते ३५
महदौक्थ्यं गीयते साम चाग्र्यं सम्यक्सोमः पीयते चात्र सत्रे। शुची-
न्भागान्प्रतिजगृहुश्च हृष्टाः साक्षाद्देवा जनकस्येह राज्ञः ३६ लोमश
उवाच ॥ समुत्थितेष्वथ सर्वेषु राजन्विप्रेषु तेष्वधिकं सुप्रभेषु। अनु-
ज्ञातो जनकेनाथ राज्ञा विवेश तोयं सागरस्योत बन्दी ३७ अष्टावक्रः
पितरं पूजयित्वा संपूजितो ब्राह्मणैस्तैर्यथावत्। प्रत्याजगामाश्रममेव
चाग्र्यं जित्वा सौतिं सहितो मातुलेन ३८ ततोऽष्टावक्रं मातुरथान्तिके
पिता नदीं समङ्गां शीघ्रमिमां विशस्व। प्रोवाच चैनं स तथा विवेश
समैरङ्गैश्चापि बभूव सद्यः ३९ नदी समङ्गा च बभूव पुण्या यस्यां
स्नातो मुच्यते किल्बिषाद्धि। त्वमप्येनां स्नानपानावगाहैः सभ्रातृकः
सहभार्यो विशस्व ४० अत्र कौन्तेय सहितो भ्रातृभिस्त्वं सुखोषितः सह
विप्रैः प्रतीतः। पुण्यान्यन्यानि शुचिकर्मैकभक्तिर्मया सार्धं चरितास्य-
जमीढ ४१ [५२००] इति श्रीमहाभारते० आरण्यकपर्वणि तीर्थयात्रापर्वणि
लोमशतीर्थयात्रायामष्टावक्रीये चतुस्त्रिंशदधिकशततमोऽध्यायः ॥१३४॥

मस्तकें तोडून पाडो ३५. या सत्राच ठिकाणीं यज्ञामध्यें ह्मटलें जाणाऱ्या श्रेष्ठ उक्थनामक सामाचें गायन होत असून सोमाचें प्राशन केलें जात आहे व ह्या तुझ्या यज्ञामध्यें देव परम आनंदित होऊन आपल्या भागाचें प्रत्यक्ष ग्रहण करीत आहेत ३६. लोमश ह्मणतातः— तदनंतर, हे राजा, अत्यंत तेजस्वी असे ते सर्व ब्राह्मण उठून उभे राहिल्यावर राजा जनकानें अनुज्ञा दिलेला तो बंदी समुद्राच्या उदकामध्यें प्रविष्ट झाला ३७. इकडे त्या ब्राह्मणांनीं विधिपूर्वक पूजन केलेल्या अष्टावक्रानें आपल्या पित्याचें पूजन केल्यावर त्या सूतपुत्र (वरुणपुत्र) बंदीला जिंकून मातुलासहवर्तमान पुनरपि आपल्या श्रेष्ठ आश्रमामध्यें प्रविष्ट झाला ३८. तदनंतर मातोश्रीच्या जवळ असलेल्या अष्टावक्राला पिता कहोड ह्मणाला " हे अष्टावक्रा, तूं ह्या समंगा नदीमध्यें सत्वर प्रवेश कर. हें ऐकून अष्टावक्रानें त्या नदीमध्यें प्रवेश केला व त्यामुळें तो तत्काल सरळ अंग होऊन बाहेर आला ३९. जिच्यामध्यें स्नान केलें असतां पुरुष पातकापासून मुक्त होतो ती ही पुण्यकारक समंगा नदी होय. हे धर्मराजा, तूं आपले बंधू व भार्या ह्यांसहवर्तमान स्नान पानादि क्रिया करण्याकरितां हिच्यामध्यें प्रवेश कर ४०. हे कुंतीपुत्रा धर्मराजा, येथें भ्राते व ब्राह्मण ह्यांसहवर्तमान सुखानें वास्तव्य करून शुद्ध कर्में करण्याविषयींच अंतःकरणामध्यें भक्ति असलेला तूं माझ्यासहवर्तमान आणखी दुसऱ्याही तीर्थांना जाशील ४१.

लोमश उवाच ॥ एषा मधुविला राजन्समङ्गा संप्रकाशते । एत-त्कर्दमिलं नाम भरतस्याभिषेचनम् १ अलक्ष्म्या किल संयुक्तो वृत्रं हत्वा शचीपतिः । आप्लुतः सर्वपापेभ्यः समङ्गायां व्यमुच्यत २ एतद्विनशनं कुक्षौ मैनाकस्य नरर्षभ । अदितिर्यत्र पुत्रार्थं तदन्नमपचत्पुरा ३ एनं पर्वतराजानमारुह्य भरतर्षभाः । अयशस्यामसंशब्द्यामलक्ष्मीं व्यपनो-त्स्यथ ४ एते कनखला राजन्नृषीणां दयिता नगाः । एषा प्रकाशते गङ्गा युधिष्ठिर महानदी ५ सनत्कुमारो भगवानत्र सिद्धिमगात्पुरा । आज-मीढावगाह्यैनां सर्वपापैः प्रमोक्ष्यसे ६ अपां ह्रदं च पुण्याख्यं भृगुतुङ्गं च पर्वतम् । उष्णीगङ्गं च कौन्तेय सामात्यः समुपस्पृश ७ आश्रमः स्थूल-शिरसो रमणीयः प्रकाशते । अत्र मानं च कौन्तेय क्रोधं चैव विव-र्जय ८ एष रैभ्याश्रमः श्रीमान्पाण्डवेय प्रकाशते । भारद्वाजो यत्र कवि-र्यवक्रीतो व्यनश्यत ९ युधिष्ठिर उवाच ॥ कथं युक्तोऽभवदृषिर्भरद्वाजः

ह्याप्रमाणें० वनपर्वांतील तीर्थयात्रापर्वांपैकीं लोमशतीर्थयात्रेसंबंधीं अष्टावक्रीय आख्या-नाविषयीं एकशें चवतिसावा अध्याय समाप्त झाला ॥ १३४ ॥

लोमश ह्मणतातः— हे राजा, ही मधुविला व हिलाच समंगा (ह्मणजे आंग सरळ करणारी) अशी संज्ञा प्राप्त होऊन प्रकाशत आहे. हें कर्दमि-लनामक स्थळ होय व भरताची स्नान करण्याची हीच जागा आहे १. पूर्वी शचीपति इंद्रानें वृत्रासुराचा वध केल्यामुळें तो ब्रह्महत्येनें युक्त झाला असतां ह्या समंगेमध्यें स्नान करून तो सर्व पापांपासून मुक्त झाला २. हे पुरुषश्रेष्ठा धर्मराजा, मैनाक पर्व-ताच्या एका प्रदेशाचे ठिकाणी असलेलें हे विनशननामक तीर्थ तूं अवलोकन कर. ह्याच ठिकाणीं पूर्वी अदितीनें पुत्राकरितां चरु केला ३. हे कुंतीपुत्रहो, तुह्मी ह्या पर्व-तराजावर चढून अपकीर्ति करणारी व कथन करण्यास अयोग्य अशा अलक्ष्मीचा (ह्मणजे दारिद्र्याचा) नाश करून घ्या ४. हे राजा, ऋषींना प्रिय असलेले हे कन-खल पर्वत पहा. हे युधिष्ठिरा, ही महानदी गंगा प्रकाशत आहे ५. येथेंच भगवान् सनत्कुमाराला पूर्वी सिद्धि प्राप्त झाली. हे राजा, तूं हिचें स्नान कर ह्मणजे सर्व पापां-पासून मुक्त होशील ६. हे कुंतीपुत्रा युधिष्ठिरा, हा पुण्यसंज्ञक ऱ्हद, हा भृगुतुंग पर्वत आणि ही गंगा पहा. ह्यांच्या उदकाला तूं आपल्या अमात्यांसहवर्तमान स्पर्श कर ७. हे कुंतीपुत्रा धर्मराजा, हा स्थूलशिरस् ऋषीचा रमणीय आश्रम प्रकाशित होत आहे. येथें मान व क्रोध ह्यांचा तूं त्याग कर ८. हे पांडुपुत्रा, हा रैभ्याचा शोभायमान आश्रम प्रकाशित होत आहे व ह्याच ठिकाणीं भरद्वाजाचा पुत्र कांतदर्शी यवक्रीत

प्रतापवान् । किमर्थं च यवक्रीतः पुत्रोनश्यत वै मुनेः १० एतत्सर्वं यथा-
वृत्तं श्रोतुमिच्छामि तत्त्वतः । कर्मभिर्देवकल्पानां कीर्त्यमानैर्भृशं रमे ११
लोमश उवाच ॥ भरद्वाजश्च रैभ्यश्च सखायौ संबभूवतुः । तावूषतुरिहा-
त्यन्तं प्रीयमाणावनन्तरम् १२ रैभ्यस्य तु सुतावास्तामर्वावसुपरावसू ।
आसीद्यवक्रीः पुत्रस्तु भरद्वाजस्य भारत १३ रैभ्यो विद्वान्सहापत्यस्त-
पस्वी चेतरोभवत् । तयोश्चाप्यतुला कीर्तिर्बाल्यात्प्रभृति भारत १४ यवक्रीः
पितरं दृष्ट्वा तपस्विनमसत्कृतम् । दृष्ट्वा च सत्कृतं विप्रैः रैभ्यं पुत्रैः सहा-
नघः १५ पर्यतप्यत तेजस्वी मन्युनाभिपरिप्लुतः । तपस्तेपे ततो घोरं वेद-
ज्ञानाय पाण्डव १६ स समिद्धे महत्यग्नौ शरीरमुपतापयन् । जनयामास
संतापमिन्द्रस्य सुमहातपाः १७ तत इन्द्रो यवक्रीतमुपगम्य युधिष्ठिर ।
अब्रवीत्कस्य हेतोस्त्वमास्थितस्तप उत्तमम् १८ यवक्रीत उवाच ॥ द्विजा-
नामनधीता वै वेदाः सुरगणार्चित । प्रतिभान्त्विति तप्येहमिदं परमकं

नाश पावला ९. युधिष्ठिर ह्मणतोः— हे लोमशऋषे, तो प्रतापी भरद्वाज कसा होता व त्या मुनीचा यवक्रीत ह्मणून मुलगा कसा नष्ट झाला १० हें इत्थंभूत जसें घडलें तसें श्रवण करण्याची माझी इच्छा आहे. कारण, ह्या देवासारिख्या महात्म्यांचीं चरित्रें आपण सांगितलेलीं श्रवण करून मला अत्यंत आनंद होत आहे ११. लोमश म्हणतातः—भरद्वाज आणि रैभ्य हे एकमेकांचे मित्र असून ते एकमेकांवर जीव कीं प्राण करून येथें रहात होते १२. हे भरतकुलोत्पन्ना धर्मराजा, रैभ्याला अर्वावसु व परावसु म्हणून दोन मुलगे होते आणि भरद्वाजाला यवक्रीत नांवाचा मुलगा होता. रैभ्य आपल्या पुत्रासहवर्तमान मोठा विद्वान् असून त्याला कांहीं शिष्य मंडळी होती १३; परंतु, भरद्वाज नुसता तप करणारा होता. तथापि, हे भरतकुलोत्पन्ना युधिष्ठिरा, त्या उभयतांची लहानपणापासून अतिशय कीर्ति होती १४ रैभ्याचा त्याचे मुलगे व दुसरेही ब्राह्मण आदरसत्कार करीत आहेत आणि आपला पिता तपस्वी असतांही त्याचा लोक आदरसत्कार करीत नाहींत असें यवक्रीतानें पाहून १५ अतिशय क्रोध आल्यामुळें तो अत्यंत संतप्त झाला आणि, हे पांडुपुत्रा धर्मराजा, वेद जाणण्याकरितां तो घोर तप करूं लागला १६. ह्याप्रमाणें तो एक मोठी धुणी पेटवून तिच्याजवळ आपलें अंग तापवूं लागला असतां त्या महातापसाच्या त्या कृतीनें इंद्रालाही ताप उत्पन्न झाला १७. तेव्हां, हे युधिष्ठिरा, इंद्र यवक्रीताच्या जवळ येऊन ह्मणाला " हे यवक्रीता, असलें हें उग्र तप तूं काय हेतु मनांत धरून करीत आहेस ? १८. यवक्रीत ह्मणतोः—हे देव-समुदायानें पूजन केलेल्या इंद्रा, ब्राह्मणांना वेदाचें अध्ययन न करितां वेदाची स्फूर्ति

तपः १९ स्वाध्यायार्थं समारम्भो ममायं पाकशासन । तपसा ज्ञातुमिच्छामि सर्वज्ञानानि कौशिक २० कालेन महता वेदाः शक्या गुरुमुखाद्विभो । प्राप्तुं तस्मादयं यत्नः परमो मे समास्थितः २१ इन्द्र उवाच ॥ अमार्ग एष विप्रर्षे येन त्वं यातुमिच्छसि । किं विघातेन ते विप्र गच्छाधीहि गुरोर्मुखात् २२ लोमश उवाच ॥ एवमुक्त्वा गतः शक्रो यवक्रीरपि भारत । भूय एवाकरोद्यत्नं तपस्यमितविक्रमः २३ घोरेण तपसा राजंस्तप्यमानो महत्तपः । संतापयामास भृशं देवेन्द्रमिति नः श्रुतम् २४ तं तथा तप्यमानं तु तपस्तीव्रं महामुनिम् । उपेत्य बलभिद्देवो वारयामास वै पुनः २५ अशक्योऽर्थः समारब्धो नैतद्बुद्धिकृतं तव । प्रतिभास्यन्ति वै वेदास्तव चैव पितुश्च ते २६ यवक्रीत उवाच ॥ न चैतदेवं क्रियते देवराज ममेप्सितम् । महता नियमेनाहं तप्स्ये घोरतरं तपः २७ समिद्धेऽग्नावुपकृत्याङ्गमङ्गं होष्यामि वा मघवंस्तन्निबोध । यद्येतदेवं न करोषि

व्हावी ह्मणून मी हें अत्यंत उत्कृष्ट तप करीत आहें १९. हे कश्यपपुत्रा पाकशासना, मला वेद यावे व सर्व प्रकारचीं ज्ञानें तपश्चर्येनें प्राप्त व्हावींत येवढ्याकरितांच मी ही खटपट करीत आहें २०. गुरुमुखापासून अध्ययन करून बराचसा काल लोटल्यावर वेद प्राप्त करून घेणें शक्य आहे; परंतु, तसें न करितां एकाएकीं वेद प्राप्त व्हावेत ह्मणूनच हा मी प्रयत्न करीत आहें २१. इंद्र ह्मणतोः—हे विप्रश्रेष्ठा, ज्या मार्गानें तूं जाण्याचें मनामध्यें आणिलें आहेस तो कुमार्ग आहे व त्यापासून कदाचित् तूं आपला नाश करून घेशील. तस्मात्, जा आणि गुरुमुखापासूनच वेद प्राप्त करून घे २२. लोमश ह्मणतातः—हे भरतकुलोत्पन्ना धर्मराजा, असें बोलून इंद्र निघून गेला आणि त्या अत्यंत पराक्रमी यवक्रीतानें, पुनरपि तपश्चर्या करण्याला आरंभ केला २३. आमच्या असें ऐकण्यांत आहे कीं, त्या महातपस्वी मुनीनें अतिशय घोर तप करून, हे राजा, देवांचा अधिपति जो इंद्र त्याला फार त्रास दिला २४. तेव्हां पुनरपि तीव्र तप करणाऱ्या त्या महामुनीकडे शत्रूच्या बलाचें निरसन करणारा इंद्र आला व त्यानें त्याचें निवारण केलें २५ आणि ह्मणाला " हे यवक्रीता, तूं आपल्या बुद्धीच्या दुराग्रहानें हें होण्याला अशक्य असेंच मनामध्यें आणिलें आहेस. ह्यामुळें तुला व तुझ्या बापाला वेद येणें कठीण आहे " २६. यवक्रीत ह्मणतोः—हा जर माझा मनोरथ आपण पूर्ण करणार नाहीं तर, हे देवराज, मी मोठमोठे नियम करून घोर तप करीन २७. हे देवराज इंद्रा, तूं जर हा माझ्या मनांतील हेतु सिद्धीस नेणार नाहींस तर मी अग्नि प्रदीप्त करीन व त्यामध्यें आपल्या अंगप्रत्यंगाचा होम

कार्यं ममेप्सितं देवराजेह सर्वम् २८ लोमश उवाच ॥ निश्चयं तम-
भिज्ञाय मुनेस्तस्य महात्मनः । प्रतिवारणहेत्वर्थं बुद्ध्या संचिन्त्य बुद्धि-
मान् २९ तत इन्द्रोऽकरोद्रूपं ब्राह्मणस्य तपस्विनः । अनेकशतवर्षस्य
दुर्बलस्य सयक्ष्मणः ३० यवक्रीतस्य यत्तीर्थमुचितं शौचकर्मणि ।
भागीरथ्यां तत्र सेतुं वालुकाभिश्चकार सः ३१ यदास्य वदतो वाक्यं
न स चक्रे द्विजोत्तमः । वालुकाभिस्ततः शक्रो गङ्गां समभिपूरयन् ३२
वालुकामुष्टिमनिशं भागीरथ्यां व्यसर्जयत् । सेतुमभ्यारभच्छक्रो यव-
क्रीतं निदर्शयन् ३३ तं ददर्श यवक्रीतो यत्नवन्तं निबन्धने । प्रहसंश्चा-
ब्रवीद्वाक्यमिदं स मुनिपुङ्गवः ३४ किमिदं वर्तते ब्रह्मन्किं च ते ह चिकी-
र्षितम् । अतीव हि महान्यत्नः क्रियतेऽयं निरर्थकः ३५ इन्द्र उवाच ॥
बन्धिष्ये सेतुना गङ्गां सुखः पन्था भविष्यति । क्लिश्यते हि जनस्तात
तरमाणः पुनः पुनः ३६ यवक्रीत उवाच ॥ नायं शक्यस्त्वया बद्धुं
महानोघस्तपोधन । अशक्याद्विनिवर्तस्व शक्यमर्थं समारभ ३७ इन्द्र
उवाच ॥ यथैव भवता चेदं तपो वेदार्थमुद्यतम् । अशक्यं तद्वदस्माभिरयं

करून होम करीन २८. लोमश ह्मणतात:—त्या महात्म्या मुनीचा हा दुराग्रह अवलो-
कन करून बुद्धिमान् इंद्रानें त्याच्या निवारणाची एक युक्ति शोधून काढिली २९.
त्यानें अनेक वर्षांचा वृद्ध, अशक्त व क्षयरोग लागलेला अशा तपस्वी ब्राह्मणाचें
स्वतः रूप घेतलें ३० आणि जेथें शुद्ध कर्म करण्याला योग्य असें यवक्रीताचें तीर्थ
होतें तेथेंच भागीरथीमध्यें वाळूचा सेतु बांधूं लागला ३१ व जेव्हां तो द्विजश्रेष्ठ यव-
क्रीत इंद्राचें सांगणें ऐकेना तेव्हां इंद्र गंगेचा ओघ वाळूनें भरून काढूं लागला ३२.
ह्याप्रमाणें यवक्रीताच्या दृष्टीं पडेल अशारीतीनें रात्रंदिवस एकेक मूठ भागीरथींत टाकून
इंद्रानें सेतु बांधावयास आरंभ केला असतां ३३ त्या मुनिश्रेष्ठ यवक्रीतानें त्याचा तो पूल
बांधण्याविषयीं चाललेला प्रयत्न अवलोकन करून हास्य केलें आणि ह्मणाला ३४ "हे
ब्रह्मन्, कसें काय आहे. आपण हें येथें काय करावयाचें मनामध्यें आणिलें आहे ? ही
आपली एवढी मोठी खटपट निरर्थक आहे ३५. इंद्र ह्मणतो:—बा ऋषिश्रेष्ठा,
लोकांना गंगेच्या पलीकडे जातांना अतिशय त्रास पडतो तो न पडावा ह्मणून मी
हा वाळू टाकून सुखकर असा मार्ग करीत आहे ३६. यवक्रीत ह्मणतो:—
हे तपोधना, हा मोठा ओघ बंद करणें तुला अशक्य आहे. ह्मणून ही अशक्य गोष्ट
सोडून देऊन शक्य असेल तेंच करण्यास तयार हो ३७. इंद्र ह्मणतो:— ज्याप्रमाणें
[illegible] वेद प्राप्त करून घेण्याचें अशक्य असलेलें कृत्य करण्याविषयीं तूं मनामध्यें

भारः समाहितः ३८ यवक्रीत उवाच ॥ यथा तव निरर्थोयमारम्भस्त्रिदशे-श्वर । तथा यदि ममापीदं मन्यसे पाकशासन ३९ क्रियतां यद्भवेच्छक्यं त्वया सुरगणेश्वर । वरांश्च मे प्रयच्छान्यान्यैरन्यान्भवितास्म्यति ४० लोमश उवाच ॥ तस्मै प्रादाद्वरानिन्द्र उक्तवान्यान्महातपाः । प्रतिभा-स्यन्ति ते वेदाः पित्रा सह यथेप्सिताः ४१ यच्चान्यत्काङ्क्षसे कामं यव-क्रीर्गम्यतामिति । स लब्धकामः पितरं स मेत्याथेदमब्रवीत् ४२ यव-क्रीत उवाच ॥ प्रतिभास्यन्ति वै वेदा मम तातस्य चोभयोः । अति चान्यान्भविष्यावो वरा लब्धास्तथा मया ४३ भरद्वाज उवाच ॥ दर्पस्ते भविता तात वराँल्लब्ध्वा यथेप्सितान् । स दर्पपूर्णः कृपणः क्षिप्रमेव विनंक्ष्यसि ४४ अत्राप्युदाहरन्तीमा गाथा देवैरुदाहृताः । मुनिरासी-त्पुरा पुत्र बालधिर्नाम वीर्यवान् ४५ स पुत्रशोकादुद्विग्नस्तपस्तेपे सुदु-ष्करम् । भवेन्मम सुतोमर्त्य इति तं लब्धवांश्च सः ४६ तस्य प्रासादो वै देवैः कृतो न त्वमरैः समः । नामर्त्यो विद्यते मर्त्यो निमित्तायुर्भवि-

---

भाजिलें आहेस त्याचप्रमाणें हें माझें कृत्य होय ३८. यवक्रीत ह्मणतो:— हे देवेंद्रा, ज्याप्रमाणें तुझी ही खटपट निरर्थक आहे त्याचप्रमाणें माझी आहे असें तुला वाटत असेल तर ३९, हे पाकशासना, हे सुरेश्वरा, जें शक्य असेल तेंच कर आणि ज्यांच्या योगानें मी दुसऱ्यांना मागें टाकीन असेंच मला वर दे ४०. लोमश ह्मणतात:— तदनंतर तुझ्या मनांत असल्याप्रमाणें तुला व तुझ्या बापाला वेदाची स्फूर्ति होईल असें सांगून व त्या महातपस्व्यानें मागितलेले वर त्याला देऊन ४१ "हे यवक्रीता, तुला आणखी कांहीं पाहिजे कां ?" असें विचारिल्यानंतर इंद्रानें त्याला जावयास सांगितलें. तेव्हां त्याचा मनोरथ पूर्ण होऊन तो आपल्या बापाकडे आला आणि ह्मणाला ४२ "हे तात, मी व तुह्मीं अशा उभयतांना वेदाचें स्फुरण होईल व आपण आतां वरप्राप्तीच्या योगानें सर्वांपेक्षां श्रेष्ठ होऊं ४३. भरद्वाज ह्मणतात:— बा यवक्रीता, हे अभिलषित वर तुला प्राप्त झाल्यामुळें तूं गर्वभरित होशील व त्या योगानें दीन होऊन तुझा सत्वरच नाश होईल ४४. बा वत्सा, ह्याविषयीं देवांनीं सांगितलेली एक पुरातन गोष्ट मी तुला सांगतों. पूर्वी एक बालधी नांवाचा मोठा पराक्रमी मुनि होऊन गेला ४५. तो पुत्रशोकानें उद्विग्न होऊन मला अमर मुलगा व्हावा ह्मणून अतिशय दुष्कर असें तप करीत असतां त्याला त्याप्रमाणें मुलगा झाला ४६; परंतु, वरप्रदानसमयीं देव ह्मणाले "तुला देवासारिखा व अमर असा मुलगा होणें कठीण आहे; कारण, मनुष्य अमर नसतो. तथापि तुझा मुलगा कांहीं परिमित कालपर्यंत वांचेल असा अर्थानें आम्ही

ष्यति ४७ बालधिरुवाच ॥ यथेमे पर्वताः शश्वत्तिष्ठन्ति सुरसत्तमाः । अक्षयास्तन्निमित्तं मे सुतस्यायुर्भविष्यति ४८ भरद्वाज उवाच ॥ तस्य पुत्रस्तदा जज्ञे मेधावी क्रोधनस्तदा । स तच्छ्रुत्वाकरोद्दर्पमृषींश्चैवावमन्यत ४९ विकुर्वाणो मुनीनां च व्यचरत्स महीमिमाम् । आससाद महावीर्यं धनुषाक्षं मनीषिणम् ५० तस्यापचक्रे मेधावी तं शशाप स वीर्यवान् । भव भस्मेति चोक्तः स न भस्म समपद्यत ५१ धनुषाक्षस्तु तं दृष्ट्वा मेधाविनमनामयम् । निमित्तमस्य महिषैर्भेदयामास वीर्यवान् ५२ स निमित्ते विनष्टे तु ममार सहसा शिशुः । तं मृतं पुत्रमादाय विललाप ततः पिता ५३ लालप्यमानं तं दृष्ट्वा मुनयः पुनरार्तवत् । ऊचुर्वेदविदः सर्वे गाथां यां तां निबोध मे ५४ न दिष्टमर्थमत्येतुमीशो मर्त्यः कथंचन । महिषैर्भेदयामास धनुषाक्षो महीधरान् ५५ एवं लब्ध्वा वरान्बाला दर्पपूर्णास्तपस्विनः । क्षिप्रमेव विनश्यन्ति यथा न स्यात्तथा भवान् ५६ एष रैभ्यो महावीर्यः पुत्रौ चास्य तथाविधौ । तं यथा पुत्र नाभ्येषि तथा कुर्या-

---

तुला मुलगा देऊं ४७ बालधि ह्मणालेः—हे सुरश्रेष्ठा, हे पर्वत जोंपर्यंत ह्या ठिकाणीं अक्षय राहतील तोंपर्यंत माझ्या मुलाला आयुष्य असावें ४८. भरद्वाज ह्मणतातः— तदनंतर त्याला मोठा बुद्धिमान् व रागीट असा एक मुलगा झाला व त्यानें हें श्रवण केल्यामुळें त्याला गर्व होऊन तो ऋषींचा अवमान करूं लागला ४९ ह्याप्रमाणें तो बुद्धिमान् ऋषिपुत्र भूतलावर मुनींना त्रास देत देत संचार करीत असतां महाविचारी व पराक्रमी धनुषाक्षनामक ऋषींच्या जवळ येऊन पोंचला ५० व त्यानें त्यांचा अपराध केला. तेव्हां त्यांनीं " तूं भस्म हो " ह्मणून शाप दिला; परंतु, तो भस्म झाला नाहीं ५१. तेव्हां मेधावी सुरक्षित आहे हें अवलोकन करून त्या पराक्रमी धनुषाक्ष ऋषीनें पुष्कळ रेडे गोळा केले व त्या मेधावीच्या वांचण्याचें मूळ जे पर्वत ते त्या रेड्यांकडून खणून टाकिले ५२. ह्याप्रमाणें निमित्ताचा नाश झाला असतां तो मुलगा एकाएकीं मृत झाला. तेव्हां त्या मृत झालेल्या पुत्राला जवळ घेऊन पिता विलाप करूं लागला ५३. आतां अत्यंत दीन होऊन विलाप करीत असलेल्या त्या मुनीला अवलोकन करून सर्व वेदवेत्ते मुनि त्याला जें ह्मणाले तें मी तुला सांगतों; तूं श्रवण कर ५४. हे मुनिश्रेष्ठा, दैवानें ठरवून ठेविलेला संकेत टाळण्यास मनुष्य समर्थ होत नाहीं. धनुषाक्षानें रेड्यांकडून पर्वताचा नाश करून तुझ्या मुलाचा नाश केला ५५. ह्याप्रमाणें, हे बालका, अल्पवयी बालकांना वर मिळाले ह्मणजे ते गर्वभरित होतात व ऋषि यांचा सत्वर नाश करितात. त्याप्रमाणें तुझें न होवो ५६. हे पुत्रा, हा रैभ्य

स्त्वतन्द्रितः ५७ स हि क्रुद्धः समर्थश्च पुत्रं पीडयितुं रुषा । रैभ्यश्चापि तपस्वी च कोपनश्च महानृषिः ५८ यवक्रीत उवाच ॥ एवं करिष्ये मा तापं तात कार्षीः कथञ्चन । यथा हि मे भवान्मान्यस्तथा रैभ्यः पिता मम ५९ लोमश उवाच ॥ उक्त्वा स पितरं श्लक्ष्णं यवक्रीरकुतोभयः। विप्रकुर्वन्नृषीनन्यानतुष्यत्परया मुदा ६० [५२६०] इति श्रीमहाभारते० वैयासिक्यामारण्यके पर्वणि तीर्थयात्रापर्वणि लोमशतीर्थयात्रायां यवक्रीतोपाख्याने पञ्चत्रिंशदधिकशततमोऽध्यायः ॥ १३५ ॥

लोमश उवाच ॥ चंक्रम्यमाणः स तदा यवक्रीरकुतोभयः । जगाम माधवे मासि रैभ्याश्रमपदं प्रति १ स ददर्शाश्रमे रम्ये पुष्पितद्रुमभूषिते । विचरन्तीं स्नुषां तस्य किन्नरीमिव भारत २ यवक्रीस्तामुवाचेदमुपातिष्ठस्व मामिति । निर्लज्जो लज्जया युक्तां कामेन हृतचेतनः ३ सा तस्य शीलमाज्ञाय तस्माच्छापाच्च बिभ्यती । तेजस्वितां च रैभ्यस्य तथेत्युक्त्वा जगाम ह ४ ततः एकान्तमुन्नीय मज्जयामास भारत । आजगाम तदा

महावीर्यवान् असून त्याचे मुलगेही त्याचप्रकारचे आहेत. तरी तूं त्यांच्या तावडींत सांपडणार नाहींस अशाच रीतीनें सावध रहा ५७. तो आणि त्याचा मुलगा असे उभयतांही महारागीट, तपस्वी व तुझा नाश करण्याला समर्थ असे आहेत. (तस्मात्, तूं त्यांच्या वाटेस जाऊं नकोस) ५८. यवक्रीत ह्मणतोः—हे तात, ज्या रीतीनें ताप होईल असें न करितां आपण ह्मणतां ह्याप्रमाणेंच मी करीन. ज्याप्रमाणें आपण मला मान्य आहांत त्याप्रमाणें रैभ्यही आहे ५९. लोमश ह्मणतात:— ह्याप्रमाणें यवक्रीतानें आपल्या पित्याशीं मधुर भाषण करून दुसऱ्या ऋषींचा तिरस्कार केल्यावर तो मोठा आनंदित झाला ६०. ह्याप्रमाणें ०वनपर्वांतील तीर्थयात्रापर्वापैकीं लोमशतीर्थयात्रेसंबंधीं यवक्रीतोपाख्यानाविषयीं एकशें पस्तिसावा अध्याय समाप्त झाला ॥ १३५ ॥

लोमश सांगतात:—ह्याप्रमाणें ज्याला कोठूनही भीति नाहीं असा यवक्रीत पृथ्वीवर संचार करीत करीत एकदां वैशाख महिन्यांत रैभ्यांच्या आश्रमाला येऊन पोचला १. हे भरतकुलोत्पन्ना धर्मराजा, त्यानें त्याच्या त्या रम्य व पुष्पयुक्त वृक्षांनीं शोभिवंत झालेल्या आश्रमांत किन्नरीप्रमाणें संचार करणाऱ्या त्याच्या स्नुषेला अवलोकन केलें २. तेव्हां कामानें अविचारी व (त्यामुळें) निर्लज्ज बनलेला तो यवक्रीत लज्जायुक्त असलेल्या तिला " माझ्याकडे ये " असें ह्मणाला असतां ३ तिनें त्याचा स्वभाव जाणून तो शाप देईल ह्या भीतीनें व आपला श्वशुर जो रैभ्य त्याच्या सामर्थ्याचा विचार करून 'बरें ' ह्मणून त्याच्याजवळ गेली ४. तदनंतर, हे भरतकुलोत्पन्ना, एकांताचे ठिकाणीं

रैभ्यः स्वमाश्रममरिन्दम ५ रुदतीं च स्नुषां दृष्ट्वा भार्यामार्तां परावसोः । सांत्वयञ्श्लक्ष्णया वाचा पर्यपृच्छद्युधिष्ठिर ६ सा तस्मै सर्वमाचष्ट यवक्रीभाषितं शुभा । प्रत्युक्तं च यवक्रीतं प्रेक्षापूर्वं तथात्मना ७ शृण्वानस्यैव रैभ्यस्य यवक्रेस्तद्विचेष्टनम् । दहन्निव तदा चेतः क्रोधः समभवन्महान् ८ स तदा मन्युनाविष्टस्तपस्वी कोपनो भृशम् । अवलुच्य जटामेकां जुहावाग्नौ सुसंस्कृतैः ९ ततः समभवन्नारी तस्या रूपेण संमिता । अवलुच्यापरां चापि जुहावाग्नौ जटां पुनः १० ततः समभवद्रक्षो घोराक्षं भीमदर्शनम् । अब्रूतां तौ तदा रैभ्यं किं कार्यं करवामहे ११ तावब्रवीदृषिः क्रुद्धो यवक्रीर्वध्यतामिति । जग्मतुस्तौ तथेत्युक्त्वा यवक्रीतजिघांसया १२ ततस्तं समुपास्थाय कृत्या सृष्टा महात्मना । कमण्डलुं जहारास्य मोहयित्वेव भारत १३ उच्छिष्टं तु यवक्रीतमपकृष्टकमण्डलुम् । तत उद्यतशूलः स राक्षसः समुपाद्रवत् १४ तमा-

---

तो तिचे ठिकाणीं रत होऊन व तिला शोकसमुद्रांत लोटून चालता झाला व त्याच वेळीं, हे शत्रुदमना, रैभ्यही आपल्या आश्रमामध्यें प्राप्त झाले ५ आणि परावसूची भार्या व आपली स्नुषा आर्त होऊन रोदन करीत आहे हें अवलोकन करून मधुरवाणीनें सांत्वनपूर्वक ते तिला विचारूं लागले असतां ६, हे युधिष्ठिरा, यवक्रीतानें तिच्याशीं केलेलें सर्व भाषण त्या शुभ स्त्रीनें त्यांना कथन करून " मी निषेध केला असतां त्यानें माझ्यावर बलात्कार केला " असेंही सांगितलें ७. हें यवक्रीताचें कृत्य रैभ्यानें श्रवण करितांक्षणीं त्यांना अत्यंत क्रोध येऊन त्यांचें अंतःकरण जळूं लागले ८. ह्याप्रमाणें तो परम कोपिष्ट तपस्वी रैभ्य अत्यंत रुष्ट होऊन त्यानें आपली एक जटा उपटली आणि शुद्ध मंत्र उच्चारून त्या जटेचा अग्नीमध्यें होम केला ९. तेव्हां तिच्या रूपाप्रमाणें सुंदर अशी एक स्त्री उत्पन्न झाली व (हें पाहून) पुनरपि त्यानें दुसरी जटा उपटून तिचाही अग्नीमध्यें होम केला १०. तेव्हां भयंकर नेत्र असलेला व अवलोकन करितांच भीति उत्पन्न करणारा असा एक राक्षस उत्पन्न झाला व ते उभयतांही, " हे रैभ्या, आम्ही काय करावें " असें म्हणाले असतां ११ क्रुद्ध झालेल्या त्या ऋषीनें " यवक्रीताला मारा " असें बोलतांक्षणीं " बरें " असें म्हणून ते उभयतांही यवक्रीताला मारण्याकरितां निघाले १२. हे भरतकुलोत्पन्ना धर्मराजा, तदनंतर त्या महात्म्यानें उत्पन्न केलेली ती कृत्या त्याजकडे आली आणि तिनें त्याला मोहित करून त्याच्या कमंडलूचें हरण केलें १३ व नंतर कमंडलूचें हरण केलेल्या व उच्छिष्ट असलेल्या यवक्रीताकडे तो राक्षस शूल उगारून धांवत आला १४. तेव्हां हातामध्यें शूल

द्रवन्तं संप्रेक्ष्य शूलहस्तं जिघांसया । यवक्रीः सहसोत्थाय प्राद्रवद्येन वै सरः १५ जलहीनं सरो दृष्ट्वा यवक्रीस्त्वरितः पुनः । जगाम सरितः सर्वास्ताश्चाप्यासन्विशोषिताः १६ स काल्यमानो घोरेण शूलहस्तेन रक्षसा । अग्निहोत्रे पितुर्भीतः सहसा प्रविवेश ह १७ स वै प्रविशमानस्तु शूद्रेणान्धेन रक्षिणा । निगृहीतो बलाद्द्वारि सोऽवातिष्ठत पार्थिव १८ निगृहीतं तु शूद्रेण यवक्रीतं स राक्षसः । ताडयामास शूलेन स भिन्नहृदयोऽपतत् १९ यवक्रीतं स हत्वा तु राक्षसो रैभ्यमागमत् । अनुज्ञातस्तु रैभ्येण तया नार्या सहावसत् २० [५२८०] इति श्रीमहाभारते० वैयासिक्यामारण्यके पर्वणि तीर्थयात्रापर्वणि लोमशतीर्थयात्रायां यवक्रीतोपाख्याने षट्त्रिंशदधिकशततमोऽध्यायः ॥ १३६ ॥

लोमश उवाच ॥ भरद्वाजस्तु कौन्तेय कृत्वा स्वाध्यायमाह्निकम् । समित्कलापमादाय प्रविवेश स्वमाश्रमम् १ तं स्म दृष्ट्वा पुरा सर्वे प्रत्युत्तिष्ठन्ति पावकाः । न त्वेनमुपतिष्ठन्ति हतपुत्रं तदाग्नयः २ वैकृतं त्वग्निहोत्रे स लक्षयित्वा महातपाः । तमन्धं शूद्रमासीनं गृहपालमथाब्रवीत् ३

घेऊन आपल्याला मारण्याकरितां धांवत येणाऱ्या त्या राक्षसाला पहातांक्षणीं यवक्रीत एकाएकीं उठला आणि सरोवराकडे धांवला १५ तों सरोवर जलरहित आहे असें पाहून तो पुनरपि मोठ्या वेगानें सर्व नद्यांकडे गेला असतां त्याही शुष्क झाल्या आहेत असेंच त्याच्या दृष्टीं पडलें १६. सारांश, हातामध्यें शूल धारण केलेला तो राक्षस आपणाला कोठेंच जाऊं देत नाहीं असें पाहून भयभीत झालेला तो यवक्रीत एकाएकीं आपल्या बापाच्या होमशालेंत शिरूं लागला तों आंधळ्या शूद्र जातीच्या द्वारपालानें तो प्रवेश करीत असतां निषेध करून बलात्कारानें, हे भूपते धर्मराजा, त्याला तेथेंच थांबविलें १७,१८. ह्याप्रमाणें शूद्रानें अटकाव केलेल्या यवक्रीताला त्या राक्षसानें शूलप्रहार केला असतां तो यवक्रीत हृदय फुटून पडला १९ आणि अशा रीतीनें यवक्रीताला मारून तो राक्षस रैभ्याकडे आला व त्यांनीं अनुज्ञा दिल्यावरून त्या स्त्रीसहवर्तमान तेथें वास्तव्य करूं लागला २०. ह्याप्रमाणें० वनपर्वांतील तीर्थयात्रापर्वांपैकीं लोमशतीर्थयात्रेसंबंधीं यवक्रीताच्या उपाख्यानाविषयीं एकशें छत्तिसावा अध्याय समाप्त झाला॥ १३६॥

लोमश सांगतातः— हे कुंतीपुत्रा युधिष्ठिरा, इकडे भरद्वाज वेदपठणादिक आपलें नित्यकृत्य आटोपल्यावर समिधांचें जुडगें घेऊन आपल्या आश्रमांत शिरले १. पूर्वी सर्व अग्नि ते येतांच त्यांना पाहून उठून उभे रहात असत; परंतु, आज पुत्र नष्ट झाल्यामुळें ते उठून उभे राहिले नाहींत २. ह्या होमशालेमध्यें झालेला प्रकार त्या

किं नु मे नाग्नयः शूद्र प्रतिनन्दन्ति दर्शनम् । त्वं चापि न यथापूर्वं कच्चित्क्षेममिहाश्रमे ४ कच्चिन्न रैभ्यं पुत्रो मे गतवानल्पचेतनः । एतदाचक्ष्व मे शीघ्रं न हि शुद्ध्यति मे मनः ५ शूद्र उवाच ॥ रैभ्यं यातो नूनमयं पुत्रस्ते मन्दचेतनः । तथा हि निहतः शेते राक्षसेन बलीयसा ६ प्रकाल्यमानस्तेनायं शूलहस्तेन रक्षसा । अग्न्यगारं प्रति द्वारि मया दोर्भ्यां निवारितः ७ ततः स विहताशोऽत्र जलकामोऽशुचिर्ध्रुवम् । निहतः सोऽतिवेगेन शूलहस्तेन रक्षसा ८ भरद्वाजस्तु तच्छ्रुत्वा शूद्रस्य विप्रियं महत् । गतासुं पुत्रमादाय विललाप सुदुःखितः ९ भरद्वाज उवाच ॥ ब्राह्मणानां किलार्थाय ननु त्वं तप्तवांस्तपः । द्विजानामनधीता वै वेदाः संप्रति भान्त्विति १० तथा कल्याणशीलस्त्वं ब्राह्मणेषु महात्मसु । अनागाः सर्वभूतेषु कर्कशत्वमुपेयिवान् ११ प्रतिषिद्धो मया तात रैभ्यावसथदर्शनात् । गतवानेव तं द्रष्टुं कालान्तकयमोपमम् १२ यः स जानन्महा-

---

महातपस्व्यानें अवलोकन करून होमशालेचें रक्षण करीत बसलेल्या त्या आंधळ्या शूद्राला ते ह्मणाले ३ " हे शूद्रा, हे अग्नि आज माझ्या येण्याचें अभिनंदन कां करीत नाहींत व तूंही नेहमींप्रमाणें दिसत नाहींस; तेव्हां ह्या आश्रमांत कुशल आहे नां? ४ आणि अल्पविचारी असा माझा मुलगा रैभ्याकडे गेला नाहीं नां? हें तूं मला सत्वर कथन कर. मला मोठा संशय वाटत आहे " ५. शूद्र ह्मणतो:— हे मुने, हा तुमचा मंदबुद्धि मुलगा निःसंशय रैभ्याकडे गेला असावा व त्यामुळेंच बलवान् राक्षसानें त्याला मारून येथें पाडिलें असावें ६. शूल धारण केलेल्या राक्षसानें त्याला कोठेंही जाऊं न दिल्यामुळें तो होमशाळेंत जात असतां मी आपल्या बाहूनें द्वारामध्यें त्याचें निवारण केलें ७. तेव्हां येथें हताश झालेला व उदक न मिळाल्यामुळें अशुचि असलेल्या त्याला अत्यंत वेगानें शूल धारण करणाऱ्या राक्षसानें निश्चयानें मारून टाकिलें ८. ह्याप्रमाणें शूद्रानें बोध केल्यामुळें आपला पुत्र नष्ट झाला हें ऐकून गतप्राण झालेल्या आपल्या पुत्राला भरद्वाजानें जवळ घेतलें आणि दुःखित होऊन ते विलाप करूं लागले ९. भरद्वाज ह्मणतात:— बा वत्सा, अध्ययन न केलेल्या अशा ब्राह्मणांना वेदांचें प्रतिभान व्हावें ह्याकरितांच खरोखर तूं तपश्चर्या केलीस १० व त्याप्रमाणें महात्म्या ब्राह्मणांचे ठिकाणीं प्रेम करून त्यांचें कल्याण करणारा असा असतां कोणाचाही अपराध न करितां आज ही कठिण स्थिति तुला कशी प्राप्त झाली! ११. बा बालका, कालांतक यमाच्या प्रमाणें असलेल्या रैभ्याच्या आश्रमाचें दर्शन घेऊं नकोस असें सांगितलें असतां तूं विरुद्ध

तेजा वृद्धस्यैकं ममात्मजम् । गतवानेव कोपस्य वशं परमदुर्मतिः १३
पुत्रशोकमनुप्राप्त एष रैभ्यस्य कर्मणा । त्यक्ष्यामि त्वामृते पुत्र प्राणानि-
ष्टतमान्भुवि १४ यथाहं पुत्रशोकेन देहं त्यक्ष्यामि किल्बिषी । तथा ज्येष्ठः
सुतो रैभ्यं हिंसाच्छीघ्रमनागसम् १५ सुखिनो वै नरा येषां जात्या पुत्रो
न विद्यते । ये पुत्रशोकमप्राप्य विचरन्ति यथासुखम् १६ ये तु पुत्रकृ-
ताच्छोकाद्भृशं व्याकुलचेतसः । शपन्तीष्टान्सखीनार्तास्तेभ्यः पापतरो नु
कः १७ परासुश्च सुतो दृष्टः शप्तश्चेष्टः सखा मया । ईदृशीमापदं कोऽत्र
द्वितीयोऽनुभविष्यति १८ लोमश उवाच ॥ विलप्यैवं बहुविधं भरद्वाजो
दहत्सुतम् । सुसमिद्धं ततः पश्चात्प्रविवेश हुताशनम् १९ [५२९९] इति
श्रीमहाभारते० मारण्यके पर्वणि तीर्थयात्रापर्वणि लोमशतीर्थयात्रायां
यवक्रीतोपाख्याने सप्तत्रिंशदधिकशततमोऽध्यायः ॥ १३७ ॥

लोमश उवाच ॥ एतस्मिन्नेव काले तु बृहद्द्युम्नो महीपतिः । सत्रं
तेने महाभागो रैभ्ययाज्यः प्रतापवान् १ तेन रैभ्यस्य वै पुत्रावर्वावसुप-

---

गेलास नां ! १२ व महातेजस्वी वृद्ध झालेल्या मला हा एकच मुलगा आहे असें जाणूनही तो दुष्टबुद्धि कोपाच्या स्वाधीन झाला नां ! १३. हा मी रैभ्याच्या कर्मानें पुत्रशोकाला प्राप्त झालों आहें. हे पुत्रा, आज तुझ्यावांचून ह्या पृथ्वीवर अत्यंत प्रिय असलेलेही प्राण मी सोडतों १४. ज्याप्रमाणें आज मी पुत्रशोकानें युक्त होऊन आपल्या प्राणांचा त्याग करीत आहें त्याचप्रमाणें निरपराधी अशा रैभ्यालाही त्याचा ज्येष्ठ पुत्र प्राण सोडून जावयास लावील १५. खरोखरच ह्या लोकाचे ठिकाणीं ज्यांना पुत्र नाहींत व जे पुत्रशोक न होतां ह्या पृथ्वीवर आहेत तेच सुखी होत १६. जे पुत्रापासून उत्पन्न झालेल्या शोकानें अत्यंत व्याकुल होऊन आपल्या इष्टमित्रांना शाप देतात त्यांच्यापेक्षां पापी कोण आहेत ? १७. आज मी मृत झालेला आपला मुलगा अवलोकन करून आपल्या प्रिय मित्राला शाप देत आहें अशी ही आपत्ति माझ्यावांचून दुसरा कोण सहन करील ? १८ लोमश म्हणतात:— ह्याप्रमाणें भरद्वाजानें नानातऱ्हेनें शोक करून आपल्या मुलाचें दहन केलें व त्या प्रदीप्त झालेल्या अग्नीमध्यें आपण स्वतःही प्रवेश केला १९. ह्याप्रमाणें ० महाभारतांतर्गत वनपर्वांतील तीर्थयात्रापर्वापैकीं लोमशतीर्थयात्रेसंबंधीं यवक्रीताच्या उपाख्यानाविषयीं एकशें सदतिसावा अध्याय समाप्त झाला ॥ १३७ ॥

लोमश सांगतात:—ह्याच वेळीं रैभ्याचा यजमान महाभाग्यवान् व मोठा प्रतापी बृहद्द्युम्न नांवाचा पृथ्वीपति सत्र करूं लागला १. त्या विचारीं बृहद्द्युम्नानें रैभ्याचे

रावसू। वृतौ सहायौ सत्रार्थं बृहद्युम्नेन धीमता २ तत्र तौ समनुज्ञातौ पित्रा कौन्तेय जग्मतुः। आश्रमे त्वभवद्रैभ्यो भार्या चैव परावसोः ३ अथावलोकको गच्छद्गृहानेकः परावसुः। कृष्णाजिनेन संवीतं ददर्श पितरं वने ४ जघन्यरात्रे निद्रान्धः सावशेषे तमस्यपि। चरन्तं गहनेऽरण्ये मेने स पितरं मृगम् ५ मृगं तु मन्यमानेन पिता वै तेन हिंसितः। अकामयानेन तदा शरीरत्राणमिच्छता ६ तस्य स प्रेतकार्याणि कृत्वा सर्वाणि भारत। पुनरागम्य तत्सत्रमब्रवीद्भ्रातरं वचः ७ इदं कर्म न शक्तस्त्वं वोढुमेकः कथञ्चन। मया च हिंसितस्तातो मन्यमानेन तं मृगम् ८ सोऽस्मदर्थे व्रतं तात चर त्वं ब्रह्महिंसनम्। समर्थोऽप्यहमेकाकी कर्म कर्तुमिदं मुने ९ अर्वावसुरुवाच ॥ करोतु वै भवान्सत्रं बृहद्द्युम्नस्य धीमतः। ब्रह्मवध्यां चरिष्येऽहं त्वदर्थं नियतेन्द्रियः १० लोमश उवाच ॥ स तस्य ब्रह्मवध्यायाः पारं गत्वा युधिष्ठिर। अर्वावसुस्तदा सत्रमाजगाम पुनर्मुनिः ११

अर्वावसु व परावसु नांवाचे पुत्र यज्ञामध्यें साहाय्याकरितां बोलाविले होते २. हे कुंतीपुत्रा धर्मराजा, नंतर पित्यानें अनुज्ञा दिल्यावरून ते उभयतां तेथें गेले असतां रैभ्य व परावसूची भार्या हीं उभयतांच त्या आश्रमामध्यें होतीं ३. एके दिवशीं परावसु एकटाच आपल्या स्त्रियेला अवलोकन करण्याकरितां घरीं आला असतां त्यानें वनामध्यें कृष्णाजिन पांघरलेल्या आपल्या बापाला अवलोकन केलें ४. उत्तर रात्रीचा सुमार असून थोडा थोडा काळोख असल्यामुळें व निद्रेनें गुंग झाल्यामुळें दुर्गम अरण्याचे ठिकाणीं संचार करणारा त्याचा पिता त्याला मृगाप्रमाणें भासला ५. आपल्या शरीराच्या रक्षणाची इच्छा करणाऱ्या त्या परावसूनें, आपल्या पित्याला न समजून तो मृग आहे असें वाटल्यावरून त्याचा वध केला ६ व, (नंतर तो आपला बापच आहे असें समजल्यावर) हे भरतकुलोत्पन्ना धर्मराजा, त्यानें त्याची सर्व और्ध्वदेहिक क्रिया केली आणि पुनरपि बृहद्युम्नाच्या सत्रामध्यें येऊन आपल्या भावाशीं बोलूं लागला ७. (तो ह्मणाला) "हे अर्वावसो, हें कर्म शेंवटास नेण्याला तूं एकटा असमर्थ आहेस आणि मी तर मृग समजून पित्याचा वध केला आहे ८. करितां, बा वत्सा, माझ्याकरितां ब्रह्महत्येच्या पातकाचें निरसन करणारें एकादें अनुष्ठान कर. हे मुने, मी मात्र एकटा हें कर्म करण्यास असमर्थ आहें ९. अर्वावसु ह्मणतोः— आपण ह्या बुद्धिमान् बृहद्युम्नराजाचें सत्र करावें; मी आपणांकरितां इंद्रियदमन करून ब्रह्महत्येचें निरसन करणारें व्रत करितों १०. लोमश सांगतातः— हे युधिष्ठिरा, तो अर्वावसु मुनि त्या ब्रह्महत्येची निष्कृति करून पुनरपि सत्रामध्यें

ततः परावसुर्दृष्ट्वा भ्रातरं समुपस्थितम् । बृहद्युम्नमुवाचेदं वचनं हर्षग-
द्गदम् १२ एष ते ब्रह्महा यज्ञं मा द्रष्टुं प्रविशेदिति । ब्रह्महा प्रेक्षितेनापि
पीडयेत्त्वामसंशयम् १३ लोमश उवाच ॥ तच्छ्रुत्वैव तदा राजा प्रेष्या-
न्नाह स विट्पते । प्रेष्यैरुत्सार्यमाणस्तु राजन्नर्वावसुस्तदा १४ न मया
ब्रह्महत्येयं कृतेत्याह पुनः पुनः । उच्यमानोसकृत्प्रेष्यैर्ब्रह्महन्निति
भारत १५ नैव स्म प्रतिजानाति ब्रह्मवध्यां स्वयंकृताम् । मम भ्रात्रा
कृतमिदं मया स परिमोक्षितः १६ स तथा प्रवदन्क्रोधात्तैश्च प्रेष्यैः
प्रभाषितः । तूर्ष्णीं जगाम ब्रह्मर्षिर्वनमेव महातपाः १७ उग्रं तपः
समास्थाय दिवाकरमथाश्रितः । रहस्यवेदं कृतवान्सूर्यस्य द्विजसत्तमः १८
मूर्तिमांस्तं ददर्शाथ स्वयमग्रभुगव्ययः १९ लोमश उवाच ॥ प्रीतास्त-
स्याभवन्देवाः कर्मणार्वावसोर्नृप । तं ते प्रवरयामासुर्निरासुश्च परा-
वसुम् । ततो देवा वरं तस्मै ददुरग्निपुरोगमाः २० स चापि वरयामास
पितुरुत्थानमात्मनः । अनागस्त्वं ततो भ्रातुः पितुश्चास्मरणं वधे २१

आला ११; तेव्हां परावसूनें आपला भ्राता प्राप्त झालेला अवलोकन केल्यामुळें हर्षानें कंठ सद्गदित होऊन तो बृहद्युम्नाला ह्मणाला १२ " हे राजा, हा ब्रह्महत्या करणारा तुझ्या यज्ञामध्यें न शिरो. खरोखर ह्या ब्रह्महत्या करणाऱ्यानें तुजकडे नुसतें पाहिलें तर तुला पीडा सोसावी लागेल " १३. लोमश ह्मणतातः— हे प्रजापालका राजा, त्या बृहद्युम्न राजानें हें श्रवण करून आपल्या भृत्यांना त्या अर्वावसूला हांकून देण्याविषयीं आज्ञा केली असतां तो अर्वावसु पुन्हां पुन्हां ह्मणूं लागला कीं १४, मीं ब्रह्महत्या केली नाहीं. तरी ते राजदूत त्याला " हे ब्रह्महत्या करणाऱ्या, हे ब्रह्महत्या करणाऱ्या, " असेंच वरचेवर ह्मणूं लागले १५. तेव्हां तो ह्मणाला " आहो, ही ब्रह्महत्या मीं केली नसून माझ्या भ्रात्यानें केली आहे व मी त्याला त्या ब्रह्महत्ये-पासून मुक्त केलें आहे " १६. हें त्याचें भाषण श्रवण करून क्रोधाविष्ट झालेले दूत " तूं मिथ्या भाषण करीत आहेस " असें ह्मणाले व तें ऐकून तो महातपस्वी ब्रह्मर्षि मुकाट्यानें वनांत चालता झाला १७. तेथें त्या द्विजश्रेष्ठानें तपःपूर्वक दिनक-राचा आश्रय करून सूर्यमंत्रप्रकाशक वेद केला १८. तेव्हां अव्यय व (वैश्वदेवप्रभृति क्रियांमध्यें) प्रथम भोजन करणाऱ्या सूर्यानें त्याला दर्शन दिलें १९. लोमश ह्मणतातः— हे राजा, ह्या अर्वावसूच्या कर्मानें सर्व देव प्रसन्न झाले आणि परावसूला यज्ञांतून घालवून देऊन अर्वावसूला " वर माग " ह्मणून ह्मणाले व त्यामध्यें अग्नि श्रेष्ठ आहे असा देवांनीं त्याला वर दिला २०. तेव्हां त्यानें आपला बाप जिवंत व्हावा, भ्रात्याला

भरद्वाजस्य चोत्थानं यवक्रीतस्य चोभयोः । प्रतिष्ठां चापि वेदस्य सौरस्य द्विजसत्तमः । एवमस्त्विति तं देवाः प्रोचुश्चापि वरान्ददुः २२ ततः प्रादुर्बभूवुस्ते सर्व एव युधिष्ठिर । अथाब्रवीद्यवक्रीतो देवानग्निपुरोगमान् २३ समधीतं मया ब्रह्म व्रतानि चरितानि च । कथं च रैभ्यः शक्तो मामधीयानं तपस्विनम् २४ तथायुक्तेन विधिना निहंतुममरोत्तमाः । देवा ऊचुः ॥ मैवं कृथा यवक्रीत तथा वदसि वै मुने । ऋते गुरुमधीता हि सुखं वेदास्त्वया पुरा २५ अनेन तु गुरून्दुःखात्तोषयित्वा स्वकर्मणा । कालेन महता क्लेशाद्ब्रह्माधिगतमुत्तमम् २६ लोमश उवाच ॥ यवक्रीतमथोक्त्वैवं देवाः सेन्द्रपुरोगमाः । संजीवयित्वा तान्सर्वान्पुनर्जग्मुस्त्रिविष्टपम् २७ आश्रमस्तस्य पुण्योयं सदापुष्पफलद्रुमः । अत्रोष्य राजशार्दूल सर्वं पापं प्रमोक्ष्यसि २८ [२३२७] इति श्रीमहाभारते० आरण्यके पर्वणि तीर्थयात्रापर्वणि लोमशतीर्थयात्रायां यवक्रीतोपाख्यानेष्टत्रिंशदधिकशततमोऽध्यायः ॥ १३८ ॥

ब्रह्महत्येचें पातक नसावें २१, बापाचा वध केल्याचें त्याला स्मरण नसावें, भरद्वाज व यवक्रीत हे उभयतां उठावेत आणि आपण सूर्याचा केलेला वेद लोकांमध्यें परंपरेनें प्रसिद्ध व्हावा ह्मणून वर मागितले व देवांनीं ते " तथास्तु " ह्मणून त्याला दिले २२. तदनंतर, हे युधिष्ठिरा, ते सर्व जिवंत होऊन त्या ठिकाणीं प्रकट झाले आणि नंतर ज्यांच्यामध्यें अग्नि मुख्य आहे अशा देवांना यवक्रीत ह्मणाला २३ " हे अमरश्रेष्ठहो, मीं वेदाचें उत्तम प्रकारें अध्ययन केलें, व्रतें केलीं, असें असतां ह्या प्रकारच्या तपस्वी व विद्वान् ब्राह्मणाला तो रैभ्य अशा प्रकारच्या विधीनें मारण्याला कसा समर्थ झाला ? २४. देव ह्मणतात:— हे यवक्रीता, तूं असें बोलूं नकोस. कारण, पूर्वीं तूं गुरुमुखावांचून व श्रम न करितां वेद प्राप्त करून घेतले आहेस २५ व ह्यानें उत्तम प्रकारचीं गुरूचीं कामें करून आणि त्यांना प्रसन्न करून घेऊन पुष्कळ दिवसांनीं मोठ्या कष्टानें उत्कृष्ट रीतीनें वेद प्राप्त करून घेतले आहेत २६. लोमश सांगतात:— ह्याप्रमाणें यवक्रीताशीं भाषण करून त्या सर्वांना जिवंत केल्यावर ते देव इंद्राला पुढें घालून स्वर्गाला निघून गेले २७. नेहमीं फळें व पुष्पें येणाऱ्या वृक्षांनीं युक्त असा हा त्याचाच आश्रम होय. हे राजश्रेष्ठा, येथें वास्तव्य केलें असतां तूं सर्व पापांपासून मुक्त होशील २८. ह्याप्रमाणें महामुनिव्यासप्रणीत लक्षग्रंथात्मक श्रीमहाभारतांतर्गत वनपर्वांतील तीर्थयात्रापर्वांपैकीं लोमशतीर्थयात्रेसंबंधीं यवक्रीतोपाख्यानाविषयीं एकशें अडतिसावा अध्याय समाप्त झाला ॥ १३८ ॥

लोमश उवाच॥ उशीरबीजं मैनाकं गिरिं श्वेतं च भारत । समतीतोसि कौन्तेय कालशैलं च पार्थिव १ एषा गङ्गा सप्तविधा राजते भरतर्षभ । स्थानं विरजसं पुण्यं यत्राग्निर्नित्यमिध्यते २ एतद्वै मानुषेणाद्य न शक्यं द्रष्टुमद्भुतम् । समाधिं कुरुताव्यग्रास्तीर्थान्येतानि द्रक्ष्यथ ३ एतद्द्रक्ष्यसि देवानामाक्रीडं चरणाङ्कितम् । अतिक्रान्तोसि कौन्तेय कालशैलं च पर्वतम् ४ श्वेतं गिरिं प्रवेक्ष्यामो मन्दरं चैव पर्वतम् । यत्र माणिवरो यक्षः कुबेरश्चैव यक्षराट् ५ अष्टाशीति सहस्राणि गन्धर्वाः शीघ्रगामिनः । तथा किंपुरुषा राजन्यक्षाश्चैव चतुर्गुणाः ६ अनेकरूपसंस्थाना नानाप्रहरणाश्च ते । यक्षेन्द्रं मनुजश्रेष्ठ माणिभद्रमुपासते ७ तेषामृद्धिरतीवात्र गतौ वायुसमाश्च ते । स्थानात्प्रच्यावयेयुर्ये देवराजमपि ध्रुवम् ८ तैस्तात बलिभिर्गुप्ता यातुधानैश्च रक्षिताः । दुर्गमाः पर्वताः पार्थ समाधिं परमं कुरु ९ कुबेरसचिवाश्चान्ये रौद्रा मैत्राश्च राक्षसाः । तैः समेष्याम कौन्तेय संयतो विक्रमेण च १० कैलासः पर्वतो राजन्षड्यो-

---

लोमश सांगतातः— हे भरतकुलोत्पन्ना पृथ्वीपते कुंतीपुत्रा धर्मराजा, तूं उशीरबीज, मैनाक, श्वेतपर्वत व कालशैल ह्यांचें अतिक्रमण करून आला आहेस १. हे भरतवंशजश्रेष्ठा, ही सात ओघांनीं वहाणारी गंगा येथें शोभत आहे. हें पवित्र व पापनाशक स्थान पहा. ह्या ठिकाणीं नेहमीं अग्नि प्रदीप्त असतो २. हें अद्भुत स्थान मनुष्यांना दिसण्यास अशक्य आहे. करितां, स्वस्थांतःकरणपूर्वक समाधि लावून ह्या तीर्थांना तुह्मी पहा ३. देवांचीं पाउलें उमटलेलें हें त्यांचें क्रीडास्थान अवलोकन कर. हे कुंतीपुत्रा धर्मराजा, कालशैलपर्वताचें अतिक्रमण करून तूं आला आहेस ४. आतां आपण श्वेतगिरि व मंदरपर्वत ह्यांवर प्रवेश करूं. तेथें माणिवर यक्ष, यक्षांचा अधिपति कुबेर ५, शीघ्र गमन करणारे अठ्यांयशी हजार गंधर्व, किंपुरुष व त्याच्या चारपटीनें यक्ष ६ अनेक प्रकारचीं रूपें धारण करून व नानाप्रकारचीं आयुधें हातामध्यें घेऊन, हे पुरुषश्रेष्ठा, यक्षेंद्र माणिभद्राची उपासना करीत आहेत ७. ते अतिशय समृद्ध असून वायूप्रमाणें गमन करणारे आहेत व जे निश्चयानें देवराज इंद्रालाही स्थानभ्रष्ट करण्यास समर्थ आहेत ८ त्याच बलवान् यातुधानांनीं, बा धर्मराजा, ज्याचें रक्षण केलें आहे व ज्यावर चढणें कठिण आहे असे हे पर्वत पहा. तस्मात्, हे कुंतीपुत्रा युधिष्ठिरा, तूं उत्कृष्ट समाधि लाव ९. कुबेराचे सचिव व भयंकर आणि सद्रूप अशा राक्षसांची आपली गांठ पडेल. करितां, (मनुष्य प्राण घेऊन) सज्ज व्हा १०. हे राजा, हा सहा योजने उंच असलेला कैलासपर्वत पहा. ह्यावर, पर्वता-

जनसमुच्छ्रितः । यत्र देवाः समायान्ति विशाला यत्र भारत ११ असं-
ख्ययास्तु कौन्तेय यक्षराक्षसकिंनराः । नागाः सुपर्णा गन्धर्वाः कुबेरस-
दनं प्रति १२ तान्विगाहस्व पार्थाद्य तपसा च दमेन च । रक्ष्यमाणो मया
राजन्भीमसेनबलेन च १३ स्वस्ति ते वरुणो राजा यमश्च समितिं-
जयः । गङ्गा च यमुना चैव पर्वतश्च दधातु ते १४ मरुतश्च महाश्विभ्यां
सरितश्च सरांसि च । स्वस्ति देवासुरेभ्यश्च वसुभ्यश्च महाद्युते १५
इन्द्रस्य जाम्बूनदपर्वताद्वै शृणोमि घोषं तव देवि गङ्गे । गोपाययेमं सुभगे
गिरिभ्यः सर्वाजमीढापचितं नरेन्द्रम् १६ दद्स्व शर्म प्रविविक्षतोऽस्य शैला
निमाञ्छैलसुते नृपस्य । उक्त्वा तथा सागरगां स विप्रो यत्तो भवस्वेति शशास
पार्थम् १७ युधिष्ठिर उवाच ॥ अपूर्वोयं संभ्रमो लोमशस्य कृष्णां च सर्वे रक्षत
मा प्रमादम् । देशो ह्ययं दुर्गतमो मतोऽस्य तस्मात्परं शौचमिहाचरध्वम् १८
वैशंपायन उवाच ॥ ततोऽब्रवीद्भीममुदारवीर्यं कृष्णां यत्तः पालय भीम-
सेन । शून्येऽर्जुने संनिहिते च तात त्वामेव कृष्णा भजते भयेषु १९ ततो

वर बोरीचा एक मोठा वृक्ष असून, हे भरतकुलोत्पन्ना युधिष्ठिरा, देवही ह्याच पर्वतावर येत असतात ११. हे कुंतीपुत्रा, म्यां व बलवान् भीमसेनानें रक्षण केलेला तूं तप व इंद्रियें ह्यांचें संयमन करून कुबेराच्या घराजवळ असलेले असंख्य यक्ष, राक्षस, किन्नर, नाग, सुपर्ण व गंधर्व ह्यांना अवलोकन कर १२,१३. युद्धामध्यें जयशाली यम, वरुण, गंगा, यमुना व त्याचप्रमाणें हा पर्वत तुझें कल्याण करो १४. हे महा-तेजस्वी धर्मराजा, अश्विनीकुमारासहवर्तमान देव, नद्या, सरोवरें, असुर व वसु ह्यांपासून तुझें कल्याण असो १५. " हे गंगे, हे देवि, हे सुभगे, मेरुपर्वतापासून ज्या तुझा घोष मला ऐकूं येत आहे ती तूं आजमीढ वंशानें पूजित अशा नरश्रेष्ठ धर्मराजाचें सर्व गिरीपासून रक्षण कर १६. हे शैलसुते, ह्या पर्वतांना अवलोकन करण्याची इच्छा करणाऱ्या ह्या राजाचें तूं कल्याण कर ". ह्याप्रमाणें त्या समुद्राला मिळणाऱ्या गंगेशीं भाषण करून "धर्मराजा, तूं सावध रहा" असें ते त्या धर्मराजाला ह्मणाले १७. युधिष्ठिर ह्मणतो:— अहो, ही लोमश ऋषींची मोठी अपूर्व तयारी दिसत आहे. तस्मात्, द्रौपदीचें सर्वांनीं उत्कृष्ट रीतीनें रक्षण करावें; कोणी दुर्लक्ष्य करूं नये. ह्यांच्या मतानें हा प्रदेश फार कठिण आहे असें वाटतें. ह्मणून तुह्मी सर्व शुचिर्भूत होऊन चला १८. वैशंपायन सांगतात:— तदनंतर अतुलपराक्रमी भीम-सेनाला धर्मराज ह्मणाला " हे भीमा, तू मोठ्या हुषारीनें द्रौपदीचें रक्षण कर. कारण, अर्जुन मेल्यापासून, वा भीमसेना, निर्जनवनामध्यें भय उत्पन्न झालें असतां द्रौपदी

महात्मा स यमौ समेत्य मूर्धन्युपाघ्राय विमृज्य गात्रे उवाच तौ बाष्पकलं स राजा माभैष्टमागच्छतमप्रमत्तौ २० [२३४७] इति श्रीमहाभारते० आरण्यके पर्वणि तीर्थयात्रापर्वणि लोमशतीर्थयात्रायां कैलासादिगिरिप्रवेशे ऊनचत्वारिंशदधिकशततमोऽध्यायः ॥ १३९ ॥

युधिष्ठिर उवाच ॥ अंतर्हितानि भूतानि बलवन्ति महान्ति च । अग्निना तपसा चैव शक्यं गन्तुं वृकोदर १ संनिवर्तय कौन्तेय क्षुत्पिपासे बलाश्रयात् । ततो बलं च दाक्ष्यं च संश्रयस्व वृकोदर २ ऋषेस्त्वया श्रुतं वाक्यं कैलासं पर्वतं प्रति । बुद्ध्या प्रपश्य कौन्तेय कथं कृष्णा गमिष्यति ३ अथवा सहदेवेन धौम्येन च समं विभो । सूतैः पौरोगवैश्चैव सर्वैश्च परिचारकैः ४ रथैरश्वैश्च ये चान्ये विप्राः क्लेशासहाः पथि । सर्वैस्त्वं सहितो भीम निवर्तस्वायतेक्षण ५ त्रयो वयं गमिष्यामो लघ्वाहारा यतव्रताः । अहं च नकुलश्चैव लोमशश्च महातपाः ६ ममागमनमाकाङ्क्षन्गङ्गाद्वारे समाहितः । वसेह द्रौपदीं रक्षन्यावदागमनं मम ७ भीम उवाच ॥ राजपुत्री श्रमेणार्ता दुःखार्ता चैव भारत । व्रज-

---

तुझेंच अवलंबन करितें १९." (ह्याप्रमाणें बोलून) त्या महात्म्या धर्मराजानें त्या नकुलसहदेवांच्या मस्तकाचें अवघ्राण केल्यावर त्यांच्या अंगावरून हात फिरविला आणि नेत्रांमध्यें आसवें आणून "सावधगिरीनें चला; भिऊं नका." असें तो त्यांना ह्मणाला २०. ह्याप्रमाणें० वनपर्वांतील तीर्थयात्रापर्वापैकीं लोमशतीर्थयात्रेसंबंधीं कैलासादिक पर्वतावर गमनाविषयीं एकशें एकुणचाळिसावा अध्याय समाप्त झाला ॥ १३९ ॥

युधिष्ठिर ह्मणतोः— हे वृकोदरा, येथें मोठमोठाले व बलवान् प्राणी गुप्तरीतीनें बसले आहेत ह्मणून अग्नि व तप ह्या दोहोंच्याच साहाय्यानें आपल्याला जाणें शक्य आहे १. हे कुंतीपुत्रा भीमसेना, तूं बलात्कारानें क्षुधा व तृषा ह्यांचें संनियमन करून बल व हुषारी ह्यांचें अवलंबन कर २. कैलासपर्वतासंबधानें ह्या ऋषींचें बोलणें तूं ऐकिलेंच आहेस. तर्‍हां, हे कुंतीपुत्रा, ही द्रौपदी चालण्याला कशी समर्थ होईल ह्याचा तूं आपल्या मनाशीं विचार कर ३. हे भीमसेना, हे विभो, सहदेव, धौम्य, सारथि, पारोगव, आपले सर्व चाकर, रथ, घोडे व ह्याशिवाय मार्गांतील क्लेश सहन करण्यास असमर्थ असलेले ब्राह्मण ह्यांसहवर्तमान, हे विशालनयना, तूं माघारा फार ४,५. नकुल, मी व महातपस्वी लोमश असे आह्मी तिघे अतिशय थोडा आहार करणारे व व्रत करणारे असल्यामुळें जाण्यास समर्थ आहोंत ६. तूं ह्या गंगाद्वाराचे ठिकाणीं स्वस्थांतःकरणपूर्वक मी येईपर्यंत द्रौपदीचें रक्षण करीत माझी येण्याची

त्वमेव हि कल्याणी श्वेतवाहदिदृक्षया ८ तव चाप्यरतिस्तीव्रा वर्तते तमपश्यतः । गुडाकेशं महात्मानं संग्रामेष्वपलायिनम् ९ किं पुनः सहदेवं च मां च कृष्णां च भारत । द्विजाः कामं निवर्तन्तां सर्वे च परिचारकाः १० सूता पौरोगवाश्चैव यं च मन्येत नो भवान् । न ह्यहं हातुमिच्छामि भवन्तमिह कर्हिचित् ११ शैलेस्मिन्राक्षसाकीर्णे दुर्गेषु विषमेषु च । इयं चापि महाभागा राजपुत्री पतिव्रता १२ त्वामृते पुरुषव्याघ्र नोत्सहेद्विनिवर्तितुम् । तथैव सहदेवोयं सततं त्वामनुव्रतः १३ न जातु विनिवर्तेत मनोज्ञो ह्यहमस्य वै । अपि चात्र महाराज सव्यसाचिदिदृक्षया । सर्वे लालसभूताः स्म तस्माद्यास्यामहे सह १४ यद्यशक्यो रथैर्गन्तुं शैलोयं बहुकन्दरः १५ पद्भिरेव गमिष्यामो मा राजन्विमना भव । अहं वहिष्ये पाञ्चालीं यत्र यत्र न शक्ष्यति १६ इति मे वर्तते बुद्धिर्मा राजन्विमना भव । सुकुमारौ तथा वीरौ माद्रीनन्दिकरा-

---

वाट पहात रहा ७. भीम ह्मणतोः– हे भरतकुलोत्पन्ना महाराजा, ही श्रमानें थकलेली व दुःखानें पीडित झालेली द्रौपदी चालत आहेच; परंतु, ती केवळ अर्जुनाला अवलोकन करण्याकरितांच येत आहे ८ व संग्रामामध्यें पलायन न करणाऱ्या महात्म्या गुडाकेशाला अवलोकन न करून आपल्याही अंतःकरणाला स्वस्थता नाहीं ९. मग सहदेव, मी व द्रुपदतनया ह्यांनाच, हे भरतकुलोत्पन्ना धर्मराजा, परत जाण्याचा आग्रह कां करीत आहांत ? आतां तुह्मांला वाटत असेल तर हे ब्राह्मण, हीं चाकरमाणसें १०, हे सूत व हे पौरोगव ह्यांना खुशाल परत पाठवा. कांहीं झालें तरी मी तुह्मांला सोडून जाण्याची इच्छा करीत नाहीं ११. राक्षसांनीं भरलेल्या ह्या पर्वताच ठिकाणीं व ह्या मोठ्या बिकट प्रदेशामध्यें ही भाग्यवती पतिव्रता राजकन्या द्रौपदीही १२, हे पुरुषश्रेष्ठा, तुमच्यावांचून परावृत्त होण्यास तयार नाहीं. त्याचप्रमाणें नेहमीं तुमच्या आज्ञेप्रमाणें वर्तन करणारा १३ हा सहदेवही परत जाईल असें मला वाटत नाहीं. कारण, मी त्याचें मन जाणीत आहें. हे महाराज, अर्जुनाला केव्हां अवलोकन करूं अशी आह्मांला उत्कंठा उत्पन्न झाल्यामुळें आह्मी आपल्या बरोबर येणारच १४. ह्या पर्वताला पुष्कळ गुहा असल्यामुळें ह्यावर रथांत बसून जर जातां येत नसेल तर, हे राजा, आह्मी पायानेंच येऊं; आपण खेद करूं नका १५. ज्या ज्या ठिकाणीं द्रौपदीला चालतां येणार नाहीं त्या त्या ठिकाणीं त्या पांचाल राजकन्येला मी आपल्या खांद्यावर घेईन असा माझा विचार आहे. हे राजन्, आपण खेद करूं नका १६ व त्याचप्रमाणें माद्रीला आनंद देणारे हे सुकुमार वीर नकुलसहदेव जेथें चालण्याला अस-

बुभौ । दुर्गे संतारयिष्यामि यत्राशक्तौ भविष्यतः १७ युधिष्ठिर उवाच ॥
एवं ते भाषमाणस्य बलं भीमाभिवर्धताम् । यत्त्वमुत्सहसे वोढुं पाञ्चालीं
च यशस्विनीम् १८ यमजौ चापि भद्रं ते नैतदन्यत्र विद्यते । बलं तव
यशश्चैव धर्मः कीर्तिश्च वर्धताम् १९ यत्त्वमुत्सहसे नेतुं भ्रातरौ सह
कृष्णया । माते ग्लानिर्महाबाहो मा च तेऽस्तु पराभवः २० वैशंपायन
उवाच ॥ ततः कृष्णाब्रवीद्वाक्यं प्रहसंती मनोरमा । गमिष्यामि न संतापः
कार्यो मां प्रति भारत २१ लोमश उवाच ॥ तपसा शक्यते गन्तुं पर्वतं
गन्धमादनम् । तपसा चैव कौन्तेय सर्वे योक्ष्यामहे वयम् २२ नकुलः
सहदेवश्च भीमसेनश्च पार्थिव । अहं च त्वं च कौन्तेय द्रक्ष्यामः श्वेत-
वाहनम् २३ वैशंपायन उवाच ॥ एवं संभाषमाणास्ते सुबाहुविषयं
महत् । ददृशुर्मुदिता राजन्प्रभूतगजवाजिमत् २४ किराततङ्गणाकीर्णं
पुलिन्दशतसंकुलम् । हिमवत्यमरैर्जुष्टं बह्वाश्चर्यसमाकुलम् । सुबाहुश्चापि
तान्दृष्ट्वा पूजया प्रत्यगृह्णत २५ विषयान्ते कुलिन्दानामीश्वरः प्रीतिपूर्व-

---

मर्थ होतील त्या अडचणीच्या मार्गांतून त्यांना मी आपल्या खांद्यावर घेईन १७. युधिष्ठिर ह्मणतोः—हे भीमसेना, यशस्विनी पांचाल राजाची कन्या द्रौपदी व नकुल-सहदेव ह्यांना खांद्यावर घेण्याबद्दलचें उत्साहयुक्त भाषण करणाऱ्या तुझ्या बलाची वृद्धि होवो. बा भीमसेना, तुझें कल्याण असो; ही गोष्ट तुझ्यावांचून दुसऱ्याचे ठिकाणीं संभवत नाहीं ह्मणून तुझें बल, यश व कीर्ति ह्यांची वृद्धि होवो १८, १९. ज्याअर्थी तूं द्रौपदीसहवर्तमान आपल्या बंधूना नेण्याचें हौसेनें पतकरीत आहेस त्याअर्थी, हे महाबाहो, तुला थकवा न येवो व तुझा पराभवही न होवो २०. वैशंपायन सांगतात:—तदनंतर मनाला रमविणारी ती द्रौपदी हंसत हंसत ह्मणाली "हे भरतकुलोत्पन्ना, मी पायानें चालेन, माझ्यासंबधानें कोणी त्रास मानण्याचें कारण नाहीं" २१. लोमश ह्मणतात:—हे कुंतीपुत्रा धर्मराजा, ह्या गंधमादन पर्वतावर तपाच्याच योगानें जातां येतें ह्मणून आपण सर्व तपानें युक्त होऊं २२ व, हे पृथ्वीपते धर्मराजा, नकुल-सहदेव, भीमसेन, मी व तूं असे सर्वच ज्याच्या रथाला श्वेतवर्ण अश्व आहेत अशा अर्जुनाला अवलोकन करूं २३. वैशंपायन सांगतात:— हे जनमेजया, ह्याप्रमाणें बोलत बोलत आनंदित झालेले ते ज्यामध्यें पुष्कळ हत्ति व घोडे आहेत अशा सुबाहुच्या देशाला येऊन पोंचले २४. तो देश भिल्ल व तंगण लोकांनीं व्याप्त असून शेंकडों पुलिंद लोकांनीं वसति केलेला होता व हिमाचलसंबधीं देवांनीं तो सेवित असून त्या ठिकाणीं बहुत आश्चर्यकारक अशा मोठी होत्या. सुबाहूनें त्यांना आलेले

कम् । ततस्ते पूजितास्तत्र सर्व एव सुखोषिताः २६ प्रतस्थुर्विमले सूर्ये हिमवन्तं गिरिं प्रति । इन्द्रसेनमुखांश्चापि भृत्यान्पौरोगवांस्तथा २७ सूदांश्च पारिबर्हांश्च द्रौपद्याः सर्वशो नृप । राज्ञः कुलिन्दाधिपतेः परिदाय महारथाः २८ पद्भिरेव महावीर्या ययुः कौरवनन्दनाः । ते शनैः प्राद्रवन्सर्वे कृष्णया सह पाण्डवाः । तस्माद्देशात्सुसंहृष्टा द्रष्टुकामा धनञ्जयम् २९ [२३७६] इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्या० मारण्यके पर्वणि तीर्थयात्रापर्वणि लोमशतीर्थयात्रायां गन्धमादनप्रवेशे चत्वारिंशदधिकशततमोऽध्यायः ॥ १४० ॥

युधिष्ठिर उवाच ॥ भीमसेन यमौ चोभौ पाञ्चालि च निबोधत । नास्ति भूतस्य नाशो वै पश्यतास्मान्वनचरान् १ दुर्बलाः क्लेशिताः स्मेति यद्ब्रवामेतरेतरम् । अशक्येपि व्रजामो यद्धनञ्जयदिदृक्षया २ तन्मे दहति गात्राणि तूलराशिमिवानलः । यच्च वीरं न पश्यामि धनञ्जयमुपान्तिकात् ३ तस्य दर्शनतृष्णं मां सानुजं वनमास्थितम् । याज्ञ-

---

पहातांच त्यांचें उत्कृष्ट प्रकारांनीं आगतस्वागत केलें २५ व ह्याप्रमाणें कुलिंदाच्या अधिपतीनें आपल्या देशाच्या सीमेवर प्रीतिपूर्वक त्यांचें आगतस्वागत केलें असतां ते मोठ्या आनंदानें तेथें राहिले २६. तदनंतर फटफटीत सुर्योदय होतांक्षणीं इंद्रसेनप्रभृति आपले भृत्य, पौरोगव, त्याचप्रमाणें आचारी व द्रौपदीचें सामानसुमान हें सर्व रक्षणाकरितां कुलिंदाधिपति राजाच्या स्वाधीन करून ते सर्व हिमालयपर्वतावर जाण्याकरितां निघाले २७,२८. ते महावीर्यवान् कुरुनंदन पंडुपुत्र हळू हळू द्रौपदीसहवर्तमान मोठ्या आनंदानें अर्जुनाला पहाण्याकरितां त्या प्रदेशांतून पायानें जाऊं लागले २९. ह्याप्रमाणें० वनपर्वांतील तीर्थयात्रापर्वांपैकीं लोमशतीर्थयात्रेसंबंधीं गंधमादनप्रदेशगमनाविषयीं एकशें चाळिसावा अध्याय समाप्त झाला ॥ १४० ॥

युधिष्ठिर ह्मणतोः— हे भीमसेना, हे नकुल सहदेवहो, हे पांचाल राजकन्ये द्रौपदि, ज्याअर्थीं आपण वनामध्यें संचार करीत आहोंत त्याअर्थीं उपभोग घेतल्यावांचून प्राक्तन कर्माचा नाश होत नाहीं हेंच सिद्ध आहे १. आपण एकमेकाला "निःशक्त झालों आहोंत, दमला आहोंत," इत्यादि जरी बोलत आहोंत तरी अर्जुनाला अवलोकन करण्याकरितां आपण अतिशय बिकट अशा मार्गांतूनही चाललों आहोंत २. नेहमीं जवळ असणाऱ्या वीर अर्जुनाला मी अवलोकन करीत नाहीं ही गोष्ट, अग्नि ज्याप्रमाणें कापसाच्या राशीला जाळतो त्याप्रमाणें, माझ्या मनाला ताप देत आहे ३. हे वीरा, कनिष्ठ भ्रात्यासहवर्तमान वनाचा आश्रय केलेल्या व

सैन्याः परामर्शः स च वीर दहत्युत ४ नकुलात्पूर्वजं पार्थं न
पश्याम्यमितौजसम् । अजेयमुग्रधन्वानं तेन तप्ये वृकोदर ५
तीर्थानि चैव रम्याणि वनानि च सरांसि च । चरामि सह युष्माभि-
स्तस्य दर्शनकाङ्क्षया ६ पञ्चवर्षाण्यहं वीरं सत्यसन्धं धनञ्जयम् । यन्न
पश्यामि बीभत्सुं तेन तप्ये वृकोदर ७ तं वै श्यामं गुडाकेशं सिंहविक्रा-
न्तगामिनम् । न पश्यामि महाबाहुं तेन तप्ये वृकोदर ८ कृतास्त्रं निपुणं
युद्धेप्रतिमानं धनुष्मताम् । न पश्यामि कुरुश्रेष्ठ तेन तप्ये वृकोदर ९
चरन्तमरिसंघेषु काले क्रुद्धमिवान्तकम् । प्रभिन्नमिव मातङ्गं सिंहस्कन्धं
धनञ्जयम् १० यः स शक्रादनवरो वीर्येण द्रविणेन च । यमयोः पूर्वजः
पार्थः श्वेताश्वोमितविक्रमः ११ दुःखेन महताविष्टस्तं न पश्यामि फाल्गु-
नम् । अजेयमुग्रधन्वानं तेन तप्ये वृकोदर १२ सततं यः क्षमाशीलः
क्षिप्यमाणोप्यणीयसा । ऋजुमार्गप्रपन्नस्य शर्मदाताभयस्य च १३ स तु

अर्जुनाच्या दर्शनाची तृष्णा लागलेल्या मला द्रौपदीच्या वेणीला स्पर्श केल्याचा प्रकार फारच जाळीत आहे ४. अत्यंत तेजस्वी, उग्र धनुष्य धारण करणारा, अजिंक्य व नकुलापेक्षां वडील अशा अर्जुनाला अवलोकन न केल्यामुळें, हे भीमसेना, मला अत्यंत ताप होत आहे ५. तीर्थें, रम्य वनें व सरोवरें ह्यांचे ठिकाणीं त्याला भेटण्याच्याच इच्छेनें मी तुमच्यासहवर्तमान संचार करीत आहें ६. हे वृकोदरा, प्रतिज्ञा शेवटाला नेणाऱ्या महावीर धनंजयाला पांच वर्षांमध्यें अवलोकन न केल्यामुळें माझ्या मनाला एकसारखी तळमळ लागली आहे ७. हे भीमसेना, तो श्यामवर्ण, सिंहाप्रमाणें पराक्रम करणारा सिंहगति आजानुबाहु व निद्रेचा अधिपति अशा अर्जुनाला अवलोकन न केल्यामुळें मला चैन पडत नाहीं ८. हे कौरवश्रेष्ठा वृकोदरा, सर्व अस्त्रें जाणणारा, युद्ध करण्यांत मोठा कुशल व धनुष्य धारण करणाऱ्यांमध्यें ज्याच्या बरोबरीचा कोणी नाहीं अशा अर्जुनाला न पाहिल्यामुळें मला अत्यंत रुखरुख लागली आहे ९. शत्रुसमूहामध्यें संचार करणारा, प्रसंग प्राप्त झाला असतां यमाप्रमाणें रुष्ट होणारा, गंडस्थलांतून मदस्राव होणाऱ्या हत्तीसारिखा, सिंहाप्रमाणे स्कंध असलेला १०. पराक्रम व संपत्ति ह्या दोहोंतही इंद्रापेक्षां कमी नसणारा व नकुलसहदेवाच्या आधीं उत्पन्न झालेला अमितपराक्रमी श्वेतवाहन अर्जुन ११ अत्यंत दुःखानें युक्त झाला असतांही त्या अजिंक्य व उग्र धनुष्य धारण करणाऱ्या अर्जुनाला अवलोकन न केल्यामुळें, हे भीमसेना, मला फार त्रास होत आहे १२. जो निरंतर तीक्ष्ण भाषणांनीं ताडन केलें असतांही क्षमा कर-

जिह्मप्रवृत्तस्य माययाभिजिघांसतः । अपि वज्रधरस्यापि भवेत्कालवि-
षोपमः १४ शत्रोरपि प्रपन्नस्य सोऽनृशंसः प्रतापवान् । दाताभयस्य बीभ-
त्सुरमितात्मा महाबलः १५ सर्वेषामाश्रयोऽस्माकं रणेऽरीणां प्रमर्दिता ।
आहर्ता सर्वरत्नानां सर्वेषां नः सुखावहः १६ रत्नानि यस्य वीर्येण दिव्या-
न्यासन्पुरा मम । बहूनि बहुजातानि यानि प्राप्तः सुयोधनः १७ यस्य
बाहुबलाद्वीर सभा चासीत्पुरा मम । सर्वरत्नमयी ख्याता त्रिषु लोकेषु
पाण्डव १८ वासुदेवसमं वीर्ये कार्तवीर्यसमं युधि । अजेयममितं युद्धे तं न
पश्यामि फाल्गुनम् १९ संकर्षणं महावीर्यं त्वां च भीमापराजितम् । अनु-
यातः स्ववीर्येण वासुदेवं च शत्रुहा २० यस्य बाहुबले तुल्यः प्रभावे च
पुरन्दरः । जवे वायुर्मुखे सोमः क्रोधे मृत्युः सनातनः २१ ते वयं तं नर-
व्याघ्रं सर्वे वीर दिदृक्षवः । प्रवेक्ष्यामो महाबाहो पर्वतं गन्धमादनम् २२
विशाला बदरी यत्र नरनारायणाश्रमः । तं सदाध्युषितं यक्षैर्द्रक्ष्यामो
गिरिमुत्तमम् २३ कुबेरनलिनीं रम्यां राक्षसैरभिसेविताम् । पद्भिरेव गमि-

---

णारा व सरल मार्गाचें अवलंबन करणाऱ्यास आणि अभयाची इच्छा करणाऱ्यास अनुक्रमें
सुख व अभय देणारा १३ असा अर्जुन, कपटाचें अवलंबन करून मायाप्रयोगानें घात कर-
ण्याची इच्छा करणाऱ्या वज्रपाणि इंद्रालाही यम व विष ह्याप्रमाणें असह्य होईल १४.
तो प्रतापी महाबलाढ्य अर्जुन शरण आलेल्या प्रत्यक्ष आपल्या शत्रूचेंही अभयपूर्वक
रक्षण करण्यास मागें पुढें पहाणार नाहीं १५. जो आह्मा सर्वांचें आश्रयस्थान, रणभूमी-
वर शत्रूंचें मर्दन करणारा, सर्व रत्नें जमविणारा व आह्मां सर्वांना सुख देणारा आहे १६
त्याच्याच पराक्रमानें मला नानाप्रकारचीं व पुष्कळ अशीं रत्नें प्राप्त झालीं होतीं व तीं
सांप्रत सुयोधनाला मिळालीं आहेत १७. हे पांडुपुत्रा वीरा भीमसेना, त्रैलोक्यामध्यें
विख्यात व रत्नखचित अशी मयासुराची सभाही त्याच्याच बाहुबलानें मला प्राप्त
झाली १८. पराक्रमाविषयीं वासुदेवासारिखा, रणांगणाचें ठिकाणीं कार्तवीर्यासारिखा
व युद्धामध्यें अजिंक्य अशा अर्जुनाला अवलोकन करण्यास मी समर्थ नाहीं ! १९.
तो अर्जुन—महापराक्रमी संकर्षण, वासुदेव व शत्रूला हार न आणारा तूं ह्या तिघांच्या
बरोबरच पराक्रम करणारा असा आहे २०. ज्याला बाहुबल व पराक्रम ह्यांविषयीं
इंद्र, वेगाविषयीं वायु, मुखाविषयीं चंद्र व क्रोधाविषयीं सनातन मृत्यु ह्यांचीच उपमा
शोभेल २१ त्या पुरुषश्रेष्ठ अर्जुनाला अवलोकन करण्याकरितांच, हे आजानुबाहु वीर भीम-
सेना, आपण सर्व गंधमादन पर्वतावर प्रवेश करूं २२. ज्या ठिकाणीं विशाल बदरीचा वृक्ष व
नरनारायणांचा आश्रम आहे आणि ज्या ठिकाणीं नेहमीं यक्ष वास्तव्य करितात त्या

ष्यामस्तप्यमाना महत्तपः २४ न च यानवता शक्यो गन्तुं देशो
वृकोदर । न नृशंसेन लुब्धेन नाप्रशान्तेन भारत २५ तत्र सर्वे गमि-
ष्यामो भीमार्जुनगवेषिणः । सायुधा बद्धनिस्त्रिंशाः सार्धं विप्रैर्महाव्रतैः २६
मक्षिकादंशमशकान्सिंहान्व्याघ्रान्सरीसृपान् । प्राप्नोत्यनियतः पार्थ नियत-
स्तान्न पश्यति २७ ते वयं नियतात्मानः पर्वतं गन्धमादनम् । प्रवे-
क्ष्यामो मिताहारा धनंजयदिदृक्षवः २८ [५४०४] इति श्रीमहाभारते०
मारण्यके पर्वणि तीर्थयात्रापर्वणि लोमशतीर्थयात्रायां गन्धमादनप्रवेशे
एकचत्वारिंशदधिकशततमोऽध्यायः ॥ १४१ ॥

लोमश उवाच ॥ द्रष्टारः पर्वताः सर्वे नद्यः सपुरकाननाः । तीर्थानि
चैव श्रीमन्ति स्पृष्टं च सलिलं करैः १ पर्वतं मन्दरं दिव्यमेष पन्थाः
प्रयास्यति । समाहिता निरुद्विग्नाः सर्वे भवत पाण्डवाः २ अयं देवनिवा-
सो वै गन्तव्यो वो भविष्यति । ऋषीणां चैव दिव्यानां निवासः
पुण्यकर्मणाम् ३ एषा शिवजला पुण्या याति सौम्य महानदी । बद-

उत्कृष्ट पर्वताला आपण अवलोकन करूं २३. राक्षसांनीं परिवेष्टित व परम सुंदर अशा कुबेराच्या पुष्करणीला आपण मोठें तप करीत करीत पायीं पायींच जाऊं २४. हे भरतकुलोत्पन्ना वृकोदरा, ह्या प्रदेशाचे ठिकाणीं वाहनाच्या साहाय्यानें जातां यावयाचें नाहीं व घातुक, लोभी आणि रागीट मनुष्यालाही तेथें जातां यावयाचें नाहीं २५. हे भीमसेना, मोठमोठ्या व्रतस्थ ब्राह्मणांसहवर्तमान ढालतरवारी व आयुधें घेऊन आपण सर्व अर्जुनाला शोधण्याकरितां त्या ठिकाणीं जाऊं २६. माशा, डांस, गांधिणमाशा, सिंह, व्याघ्र व सर्प इत्यादि प्राणि येथें अशुचि मनुष्याच्या दृष्टीं पडतात; परंतु, पवित्र मनुष्याला त्यांपैकीं कांहींएक दिसत नाहीं २७. ह्मणून शुचिर्भूत होऊन मिताहारपूर्वक आपण सर्व अर्जुनाला अवलोकन करण्याकरितां ह्या गंधमादन पर्वतावर प्रवेश करूं २८ ह्याप्रमाणें० वनपर्वांतील तीर्थयात्रापर्वांपैकीं लोमशतीर्थयात्रेसंबंधीं गंधमादनप्रवेशाविषयीं एकशें एकेचाळिसावा अध्याय समाप्त झाला ॥ १४१ ॥

लोमश सांगतात:—ज्याअर्थी तुह्मी आपल्या हस्ताच्या योगानें ह्या जलाला स्पर्श केलांत त्याअर्थी आतां तुह्माला सर्व पर्वत, नगरें व अरण्यें ह्यांसहवर्तमान नद्या व शोभायमान होणारीं तीर्थें दिसूं लागतील १. हे पांडुपुत्रहो, हा दिव्य मार्ग मंदरपर्वताकडे जात आहे. आतां तुह्मी सर्व जण चिंता सोडून देऊन अंतःकरण स्वस्थ करा २. देव, ऋषि व पुण्य कर्म करणाऱ्या लोकांचें वसतिस्थान असलेल्या ह्या पर्वतावरच तुह्माला जावयाचें आहे ३. हे सौम्य भूपते, बदरीपासून उत्पन्न झालेली, देव

रीमभवा राजन्देवर्षिगणसेविता ४ एषा वैहायसैर्नित्यं वालखिल्यै-
र्महात्मभिः । अर्चिता चोपयाता च गन्धर्वैश्च महात्मभिः ५ अत्र
साम स्म गायन्ति सामगाः पुण्यनिःस्वनाः । मरीचिः पुलहश्चैव भृगु-
श्चैवाङ्गिरास्तथा ६ अत्राह्निकं सुरश्रेष्ठो जपते समरुद्गणः । साध्याश्चैवा-
श्विनौ चैव परिधावन्ति तं तदा ७ चन्द्रमाः सह सूर्येण ज्योतींषि च
ग्रहैः सह । अहोरात्रविभागेन नदीमेनामनुव्रजन् ८ एतस्याः सलिलं
मूर्ध्नि वृषाङ्कः पर्यधारयत् । गङ्गाद्वारे महाभाग येन लोकस्थितिर्भवेत् ९
एतां भगवतीं देवीं भवन्तः सर्व एव हि । प्रयतेनात्मना तात प्रतिगम्या-
भिवादत १० तस्य तद्वचनं श्रुत्वा लोमशस्य महात्मनः । आकाश-
गङ्गां प्रयताः पाण्डवास्तेऽभ्यवादयन् ११ अभिवाद्य च ते सर्वे पाण्डवा
धर्मचारिणः । पुनः प्रयाताः संहृष्टाः सर्वैर्ऋषिगणैः सह १२ ततो दूरात्प्र-
काशन्तं पाण्डुरं मेरुसंनिभम् । ददृशुस्ते नरश्रेष्ठा विकीर्णं सर्वतो दिशम् १३
तान्प्रष्टुकामान्विज्ञाय पाण्डवान्स तु लोमशः । उवाच वाक्यं वाक्यज्ञः

व ऋषि यांच्या समुदायांनीं सेवित, आणि पुण्यकारक व पवित्र जलानें युक्त अशी ही महानदी (गंगा) वहात आहे ४. आकाशांत संचार करणाऱ्या महात्म्या वालखिल्यांनीं ह्या गंगेचें निरंतर पूजन केलें आहे व महात्म्या गंधर्वांनीं मनोरथ परिपूर्ण होण्याकरितां हिची प्रार्थना केली आहे ५. ह्याच ठिकाणीं मरीचि, पुलह, भृगु व अंगिराप्रभृति साम गायन करणारे ब्राह्मण पवित्र स्वरानें सामगायन करीत असतात ६. मरुद्गणासहवर्तमान इंद्र ह्याच ठिकाणीं नियमानें कांहीं जप करीत असतो व साध्य आणि अश्विनीकुमारही ह्याच ठिकाणीं त्या इंद्राचें सेवन करितात ७. सूर्यासहवर्तमान चंद्र व ग्रहांसहवर्तमान नक्षत्रसमुदाय रात्रंदिवस ह्या नदीचे संनिध वास्तव्य करतात ८. वृषभध्वज शंकरांनीं गंगाद्वाराचे ठिकाणीं हिचें उदक आपल्या मस्तकावर धारण केलें व ह्मणूनच, हे महाभाग्यवान् धर्मराजा, ह्या लोकाचें रक्षण झालें ९. करितां, बा धर्मराजा, तुह्मी सर्वजण मोठ्या विनयपूर्वक ह्या भगवति देवी गंगेकडे जा आणि तिला नमस्कार करा १०. महात्म्या लोमश ऋषींचें हें वाक्य श्रवण करून त्या ब्रतस्थ पांडवांनीं आकाशगंगेला नमस्कार केला ११. ह्याप्रमाणें धर्माचरण करणाऱ्या सर्व पांडवांनीं तिला नमस्कार करून आनंदित झालेले ते सर्व ऋषिसमुदायासहवर्तमान पुनरपि चालूं लागले १२. तेव्हां दशदिशेला पसरलेला, मेरुपर्वताप्रमाणें उंच व दुरून प्रकाशणारा असा एक पांढरा ढीग त्या नरश्रेष्ठांनीं अवलोकन केला असतां तो कसला ह्मणून विचारणार तों इतक्यांत भाषण करण्यांत चतुर असे लोमश त्या

शृणुध्वं पाण्डुनन्दनाः १४ एतद्विकीर्णं सुश्रीमत्कैलासशिखरोपमम् ।
यत्पश्यसि नरश्रेष्ठ पर्वतप्रतिमं स्थितम् १५ एतान्यस्थीनि दैत्यस्य नर-
कस्य महात्मनः । पर्वतप्रतिमं भाति पर्वतप्रस्तराश्रितम् १६ पुरा-
तनेन देवेन विष्णुना परमात्मना । दैत्यो विनिहतस्तेन सुरराजहिते-
षिणा १७ दश वर्षसहस्राणि तपस्तप्यन्महामनाः । ऐन्द्रं प्रार्थयते स्थानं
तपः स्वाध्यायविक्रमात् १८ तपोबलेन महता बाहुवेगबलेन च । नित्य-
मेव दुराधर्षो धर्षयन्स दितेः सुतः १९ स तु तस्य बलं ज्ञात्वा धर्मे च
चरितव्रतम् । भयाभिभूतः संविग्नः शक्र आसीत्तदानघ २० तेन संचि-
न्तितो देवो मनसा विष्णुरव्ययः । सर्वत्रगः प्रभुः श्रीमानागतश्च स्थितो
बभौ २१ ऋषयश्चापि तं सर्वे तुष्टुवुश्च दिवौकसः । तं दृष्ट्वा ज्वलमान-
श्रीर्भगवान्हव्यवाहनः । नष्टतेजाः समभवत्तस्य तेजोभिभर्त्सितः २२
तं दृष्ट्वा वरदं देवं विष्णुं देवगणेश्वरम् २३ प्राञ्जलिः प्रणतो भूत्वा नम-
स्कृत्य च वज्रभृत् । प्राह वाक्यं ततस्तत्त्वं यतस्तस्य भयं भवेत् २४
विष्णुरुवाच ॥ जानामि ते भयं शक्र दैत्येन्द्रान्नरकात्ततः । ऐन्द्रं प्रार्थ-

---

पांडुनंदनांना म्हणाले १४ " हे धर्मराजा, शोभायमान अशा कैलासपर्वताच्या शिख-
राप्रमाणें चोहोंकडे अस्ताव्यस्त पडलेलें जें तुला पर्वतासारिखें दिसत आहे १५ तें हें
पर्वतरूप नसून महात्म्या नरकासुर दैत्याच्या ह्या पर्वतप्राय अस्थि दिसत आहेत १६.
पूर्वी पुराणपुरुष परमात्म्या महाविष्णूनें देवराजाचें कल्याण करण्याकरितां ह्या दैत्याचा
वध केला १७. ह्या महाशय दैत्यानें दहा हजार वर्षें तपश्चर्या करून स्वाध्याय व
तप ह्या दोहोंच्या बलावर आपल्याला इंद्रपद प्राप्त व्हावें अशी इच्छा धरिली १८.
तो दितीचा मुलगा तप, शौर्य व आपल्या बाहूचें बल ह्याच्या योगानें लोकांना सर्वो-
दित अतिशय पीडा देत होता १९. हे भूपते निष्पापा धर्मराजा, त्याचें बल व
आपल्या पदप्राप्तीविषयीं हें त्याचें धर्माचरणरूप व्रत ह्यांना अवलोकन करून इंद्र
अतिशय भयभीत झाला व त्याला काही सुचेनासें झालें २०. तेव्हां त्यानें आपल्या
मनामध्यें सर्वव्यापी, अव्यय, श्रीमान्, प्रभु महाविष्णूचें चिंतन करितांक्षणीं तो त्याच्या
जवळ येऊन उभा राहिला २१. तेव्हां सर्व ऋषि व स्वर्गांत रहाणार देव त्याची स्तुति
करू लागले त्या अत्यंत तेजस्वी प्रभूला अवलोकन करून हवन केलेलें वाहून नेणारा
अग्नि त्याच्या तेजानें निस्तेज झाला २२. ह्याप्रमाणें देवगणांचा अधिपति व वर देणाऱ्या
अशा विष्णूला अवलोकन केल्यावर २३ वज्रपाणि इंद्रानें हात जोडून त्याला नम-
स्कार केला आणि ज्यापासून आपल्याला भय प्राप्त झालें होतें त्यासंबंधाचा सर्व वृत्तांत

यते स्थानं तपःसिद्धेन कर्मणा २५ सोहमेनं तव प्रीत्या तपःसिद्धमपि ध्रुवम् । वियुनज्मि देहाद्देवेन्द्र मुहूर्तं प्रतिपालय २६ तस्य विष्णुर्महातेजाः पाणिना चेतनां हरत् । स पपात ततो भूमौ गिरिराज इवाहतः २७ तस्यै-तदस्थिसंघातं मायया विनिहतस्य वै । इदं द्वितीयमपरं विष्णोः कर्मप्रका-शते २८ नष्टा वसुमती कृत्स्ना पाताले चैव मज्जिता । पुनरुद्धरिता तेन वाराहेणैकशृङ्गिणा २९ युधिष्ठिर उवाच ॥ भगवन्विस्तरेणेमां कथां कथय तत्त्वतः । कथं तेन सुरेशेन नष्टा वसुमती तदा ३० योजनानां शतं ब्रह्मन्पुनरुद्धरिता तदा । केन चैव प्रकारेण जगतो धरणी ध्रुवा ३१ शिवा देवी महाभागा सर्वसस्यप्ररोहिणी । कस्य चैव प्रभावाद्धि योज-नानां शतं गता ३२ केन तद्वीर्यसर्वस्वं दर्शितं परमात्मनः । एतत्सर्वं यथातत्त्वमिच्छामि द्विजसत्तम । श्रोतुं विस्तरशः सर्वं त्वं हि तस्य प्रति-श्रयः ३३ लोमश उवाच ॥ यत्तेहं परिपृष्टोस्मि कथामेतां युधिष्ठिरम् ।

कथन केला २४ विष्णु ह्मणतातः—हे इंद्रा, आपल्या तपश्चर्येच्या योगानें इंद्रपद प्राप्त करून घेण्याची इच्छा करणाऱ्या नरकासुरापासून तुला भय प्राप्त झालें आहे हें मला समजलें २५. हे देवेंद्रा, तुझ्यावर माझें प्रेम असल्यामुळें खरोखर त्याच्या तपाची जरी सिद्धि झाली आहे तथापि मी लवकरच त्याला देहत्याग करावयास लावीन; परंतु, एक मुहूर्तभर थांब २६. (असें बोलून) महातेजस्वी विष्णूनें आपल्या हस्तानें त्याला स्पर्श केला व तत्क्षणीं त्याचें प्राणहरण झाल्यामुळें वज्रप्रहारानें ज्याप्रमाणें पर्वत पडतो त्याप्रमाणें तो असुर एकदम पृथ्वीवर पडला २७ मायेनें नष्ट केलेल्या त्याच राक्षसाच्या अस्थींचा हा ढीग होय. त्या विष्णूचें हें दुसरें कर्म ह्या ठिकाणीं प्रकाशित होत आहे २८. पूर्वी ही संपूर्ण पृथ्वी नष्ट होऊन पातालामध्ये बुडाली असतां एक शृंग धारण करणाऱ्या त्या वराहानें ती पुनरपि वर काढिली २९. युधिष्ठिर ह्मणतोः—हे भगवन्, त्या देवाधिपतीनें त्यावेळीं चारशें कोस लांबीची ही बुडालेली पृथ्वी पुनरपि कशी वर काढिली हें आपण मला विस्तारपूर्वक कथन करा. ती जगताला सदो-दित धारण करणारी कशी झाली ३१,३१ त्याचप्रमाणें जिचे ठिकाणीं सर्व प्रकारचें धान्य उत्पन्न होतें अशी ही महाभाग्यवती कल्याणकारक पृथ्वी कोणाच्या सामर्थ्यानें शभर योजनें पर्यंत गेली ३२ आणि परमात्म्याला असलें हें परमावधीचें शौर्य कोणी दाखविलें हेंही पण, हे द्विजश्रेष्ठा, आपणापासून सविस्तर श्रवण करण्याची माझी इच्छा आहे व आपणही तें इत्थंभूत जाणीत आहांत. तस्मात् , तें जसें घडलें तसें मला कथन करा ३३. लोमश सांगतातः— हे युधिष्ठिरा, जें तूं मला विचारिलंस तें तूं भाषण कर-

तत्सर्वमखिलेनेह श्रूयतां मम भाषतः ३४ पुरा कृतयुगे तात वर्तमाने भयंकरे । यमत्वं कारयामास आदिदेवः पुरातनः ३५ यमत्वं कुर्वतस्तस्य देवदेवस्य धीमतः । न तत्र म्रियते कश्चिज्जायते वा तथाच्युत ३६ वर्धन्ते पक्षिसंघाश्च तथा पशुगवेडकम् । गवाश्वं च मृगाश्चैव सर्वे ते पिशिताशनाः ३७ तथा पुरुषशार्दूल मानुषाश्च परंतप । सहस्रशो ह्ययुतशो वर्धन्ते सलिलं यथा ३८ एतस्मिन्संकुले तात वर्तमाने भयङ्करे । अतिभाराद्वसुमती योजनानां शतं गता ३९ सा वै व्यथितसर्वांगी भारेणाक्रान्तचेतना । नारायणं वरं देवं प्रपन्ना शरणं गता ४० पृथिव्युवाच ॥ भगवंस्त्वत्प्रसादाद्धि तिष्ठेयं सुचिरं त्विह । भारेणास्मि समाक्रान्ता न शक्नोमि स्म वर्तितुम् ४१ ममेमं भगवन्भारं व्यपनेतुं त्वमर्हसि । शरणागतास्मि ते देव प्रसादं कुरु मे विभो ४२ तस्यास्तद्वचनं श्रुत्वा भगवानक्षरः प्रभुः । प्रोवाच वचनं हृष्टः श्रव्याक्षरसमीरितम् ४३ विष्णुरुवाच ॥ न ते महि भयं कार्यं भार्गते वसुधारिणि । अयमेव तथाकुर्मि यथालघ्वी भविष्यसि ४४ लोमश उवाच ॥ स तां

णाऱ्या माझ्यापासून संपूर्ण श्रवण कर ३४ पूर्वी भयंकर कृतयुगामध्यें पुराणपुरुष आदिदेव आपण स्वतः यमाचें काम करीत होता ३५. ह्याप्रमाणें विचारी देवाधिदेव यमाचें काम करीत असतां, हे अच्युता, कोणी मरेना व कोणी जन्मासही येईना ३६; परंतु, पक्ष्यांचे समुदाय, पशु, गाई, एडके, घोडे, मृग व सर्व प्रकारचे मांसभक्षक प्राणी वाढूं लागले ३७. त्याचप्रमाणें, हे पुरुषश्रेष्ठा शत्रुतापना धर्मराजा, हजारों लाखों मनुष्यें पाण्याप्रमाणें वाढूं लागलीं ३८. बा धर्मराजा, ह्या भयंकर वाढणाऱ्या लोकांच्या समुदायांच्या अत्यंत भारानें शंभर योजनेपर्यंत सर्वांगाला व्यथा झाल्यामुळें व भारामुळें अस्वस्थ चित्त झालेली पृथ्वी देवश्रेष्ठ नारायणाला शरण गेली ३९,४०. पृथ्वी ह्मणतेः—हे भगवन् , खरोखर आपल्याच कृपेनें मी येथें आजपर्यंत खुशाल राहिलें; परंतु, सांप्रत अत्यंत भार झाल्यामुळें मला आतां राहवत नाहीं ४१. हे नारायणा, माझा भार दूर करण्याला आपणच योग्य आहांत. हे विभो, मी तुह्माला शरण प्राप्त झालें आहें; माझ्यावर कृपा करा ४२. हें तिचें वाक्य श्रवण केल्यावर षड्गुणैश्वर्यसंपन्न अक्षर (ह्मणजे नाश न पावणारा) प्रभु श्रवण करण्यास योग्य अशा भाषणानें तिच्याशीं बोलूं लागले ४३. विष्णु ह्मणतातः— आपल्या उदरामध्यें द्रव्य धारण करणारे हे पृथ्वि, भारानें आर्त झाल्यामुळें आतां तूं भिऊं नकोस. ज्या रीतीनें तूं हलकी होशील अशी मी व्यवस्था करितों ४४.

विसर्जयित्वा तु वसुधां शैलकुण्डलाम् । ततो वराहः संवृत्त एकशृङ्गो महाद्युतिः ४५ रक्ताभ्यां नयनाभ्यां तु भयमुत्पादयन्निव । धूमं च ज्वलयँल्लक्ष्म्या तत्र देशे व्यवर्धत ४६ स गृहीत्वा वसुमतीं शृङ्गेणैकेन भास्वता । योजनानां शतं वीर समुद्धरति सोक्षरः ४७ तस्यां चोद्धार्यमाणायां संक्षोभः समजायत । देवाः संक्षुभिताः सर्वे ऋषयश्च तपोधनाः ४८ हाहाभूतमभूत्सर्वं त्रिदिवं व्योम भूस्तथा । न पर्यवस्थितः कश्चिद्देवो वा मानुषोपि वा ४९ ततो ब्रह्माणमासीनं ज्वलमानामिव श्रिया । देवाः सर्षिगणाश्चैव उपतस्थुरनेकशः ५० उपसर्प्य च देवेशं ब्रह्माणं लोकसाक्षिकम् । भूत्वा प्राञ्जलयः सर्वे वाक्यमुच्चारयंस्तदा ५१ लोकाः संक्षुभिताः सर्वे व्याकुलं च चराचरम् । समुद्राणां च संक्षोभस्त्रिदशेश प्रकाशते ५२ सैषा वसुमती कृत्स्ना योजनानां शतं गता । किमेतत्किंप्रभावेण येनेदं व्याकुलं जगत् । आख्यातु नो भवाञ्शीघ्रं विसंज्ञाः स्मेह सर्वशः ५३ ब्रह्मोवाच ॥ असुरेभ्यो भयं नास्ति युष्माकं कुत्रचित्क्वचित् । श्रूयतां यत्कृते त्वेष संक्षोभो जायतेमराः ५४ योसौ

लोमश म्हणतातः— पर्वतरूप कुंडलें धारण करणाऱ्या पृथ्वीला ह्याप्रमाणें माघारी परतवून तो नारायण एक शृंग धारण करणारा वराह बनला ४५. त्याचे डोळे अतिशय लाल असून भीति उत्पन्न करणारे होते आणि धूम ज्याप्रमाणें वाढतो त्याप्रमाणें तो वाढत होता ४६. लकलकणाऱ्या अशा आपल्या शृंगावर शंभर योजनें पृथ्वी तो धारण करूं लागला असतां ४७ देव व ज्यांचें तपच धन आहे असे सर्व ऋषि अत्यंत क्षुब्ध झाले ४८, स्वर्ग, मृत्यु, पाताळामध्यें (अर्थात् तेथील लोकांमध्यें) हाहाकार झाला आणि देवांमध्यें अथवा मनुष्यांमध्यें गडबड उडून गेली ४९. तदनंतर आपल्या शरीराच्या कांतीनें झळकत असलेल्या व स्वस्थ बसलेल्या ब्रह्मदेवाकडे ऋषींसहवर्तमान अनेक देव गेले ५० व लोकांचा साक्षि आणि देवांचा अधिपति अशा ब्रह्मदेवाकडे आल्यावर सर्वांनीं हात जोडून बोलण्यास आरंभ केला ५१. (ते म्हणाले) "हे देवाधिपते ब्रह्मदेवा, सर्व लोक क्षुब्ध झाले आहेत, स्थावरजंगमात्मक जगत् व्याकुल झालें आहे व समुद्र खवळून गेले आहेत. साराश, सर्वत्र अशी दुःस्थिति झाली आहे ५२. ही पृथ्वी शंभर योजनेपर्यंत पाण्यामध्यें बुडाली आहे हें काय ? व कोणाच्या पराक्रमानें हें सर्व जगत् व्याकुल झालें आहे, हें सर्व घाबरून गेलेल्या आम्हांला सत्वर सांगा ५३. ब्रह्मदेव म्हणतोः—हे देवहो, तुम्हांला असुरांपासून किंवा कोठूनही भय नाहीं; परंतु, हा धरणीकंप कशानें झाला हें मी तुम्हांला सांगतों तें ऐका ५४. सर्वव्यापी

सर्वत्रगः श्रीमानक्षरात्मा व्यवस्थितः । तस्य प्रभावात्संक्षोभः त्रिवि-
वस्य प्रकाशते ५५ येषा वसुमती कृत्स्ना योजनानां शतं गता ।
समुद्धृता पुनस्तेन विष्णुना परमात्मना ५६ तस्यामुद्धार्यमाणायां
संक्षोभः समजायत । एवं भवन्तो जानन्तु च्छिद्यतां संशयश्च वः ५७
देवा ऊचुः । क्व तद्भूतं वसुमतीं समुद्धरति हृष्टवत् । तं देशं भगव-
न्ब्रूहि तत्र यास्यामहे वयम् ५८ ब्रह्मोवाच ॥ हन्त गच्छत भद्रं वो नन्दने
पश्यत स्थितम् । एषोत्र भगवाञ्छ्रीमान्सुपर्णः संप्रकाशते ५९ वाराहेणैव
रूपेण भगवाँल्लोकभावनः । कालानल इवाभाति पृथिवीतलमुद्धरन् ६०
एतस्योरसि सुव्यक्तं श्रीवत्समभिराजते । पश्यध्वं विबुधाः सर्वे भूतमेत-
दनामयम् ६१ लोमश उवाच ॥ ततो दृष्ट्वा महात्मानं श्रुत्वा चामन्त्र्य
चामराः । पितामहं पुरस्कृत्य जग्मुर्देवा यथागतम् ६२ वैशंपायन उवाच॥
श्रुत्वा तु तां कथां सर्वे पाण्डवा जनमेजय । लोमशादेशितेनाशु पथा जग्मुः
प्रहृष्टवत् ६३ [५४६७] इति श्रीमहा० तीर्थयात्रापर्वणि लोमशतीर्थ-
यात्रायां गन्धमादनप्रवेशे द्विचत्वारिंशदधिकशततमोऽध्यायः ॥ १४२ ॥

श्रीमान् व नाश न पावणारा जो नारायण त्याच्याच पराक्रमानें ही चोहोंकडे धांदल झालेली दिसत आहे ५५. जी ही शंभर योजनेपर्यंत पृथ्वी पाण्यांत बुडाली होती तीच ही परमात्म्या विष्णूनें वर काढिली ५६ व ह्याप्रमाणें तिला वर काढीत असतां हा भूकंप झाला असें तुम्ही समजा; दुसरा कांहींएक संशय मनांत धरूं नका ५७. देव ह्मणतातः— हे भगवन्, मोठ्या आनंदानें पृथ्वीला वर आणून ठेवणारा तो प्रभु कोठें आहे ? तें ठिकाण आह्मांला सांगा; आह्मी तेथें जाऊं ५८. ब्रह्मदेव ह्मणतोः—हे देवहो, तुमचें कल्याण असो. तो पहा, श्रीमान् गरुडध्वज भगवान् नंदनवनाचे ठिकाणीं प्रकाशमान होत आहे; त्याकडे जा ५९. लोकांचें पालन करणारा तो प्रभु वराहरूपानें पृथ्वीला वर काढीत असतां कालानलच कीं काय असा भासत आहे ६०. हे देवहो, ज्याच्या हृदयावर स्पष्ट श्रीवत्सलांच्छन विराजमान होत आहे, त्या ह्या सुरक्षित देवाला अवलोकन करा ६१. लोमश ह्मणतातः— हें श्रवण केल्यावर महात्म्या प्रभूचें त्यानें दर्शन घेतलें आणि ब्रह्मदेवाला पुढें घालून ते जिकडून आले तिकडे गेले ६२. वैशंपायन सांगतातः— हे जनमेजया, सर्व पांडवांनीं ही कथा श्रवण केल्यावर लोमशांनीं दाखविलेल्या रस्त्यानें ते मोठ्या आनंदानें जाऊं लागले ६३. ह्याप्रमाणें महामुनि व्यासप्रणीत लक्षग्रंथात्मक श्रीमहाभारतांतर्गत वनपर्वांतील तीर्थयात्रापर्वांपैकीं लोमशतीर्थयात्रेसंबंधीं गंधमादनप्रवेशाविषयीं एकशें बेचाळिसावा अध्याय समाप्त झाला ॥१४२॥

वैशंपायन उवाच ॥ ते शूरास्ततधन्वानस्तूणवन्तः समार्गणाः। बद्ध-गोधाङ्गुलित्राणाः खड्गवन्तोऽमितौजसः १ परिगृह्य द्विजश्रेष्ठाञ्ज्येष्ठाः सर्वधनुष्मताम्। पाञ्चालीसहिता राजन्प्रययुर्गन्धमादनम् २ सरांसि सरितश्चैव पर्वतांश्च वनानि च। वृक्षांश्च बहुलच्छायान्ददृशुर्गिरिमूर्धनि ३ नित्यपुष्पफलान्देशान्देवर्षिगणसेवितान्। आत्मन्यात्मानमाधाय वीरा मूल-फलाशिनः ४ चेरुरुच्चावचाकारान्देशान्विषमसंकटान्। पश्यन्तो मृग-जातानि बहूनि विविधानि च ५ ऋषिसिद्धामरयुतं गन्धर्वाप्सरसां प्रियम्। विविशुस्ते महात्मानः किंनराचरितं गिरिम् ६ प्रविशत्स्वथ वीरेषु पर्वतं गन्धमादनम्। चण्डवातं महद्वर्षं प्रादुरासीद्विशांपते ७ ततो रेणुः समु-द्भूतः सपत्रबहुलो महान्। पृथिवीं चान्तरिक्षं च द्यां चैव महसावृणोत् ८ न स्म प्रज्ञायते किंचिदावृते व्योम्नि रेणुना। न चापि शेकुस्तत्कर्तुम-न्योन्यस्याभिभाषणम् ९ न चापश्यंस्ततोऽन्योन्यं तमसावृतचक्षुषः। आकृ-

---

वैशंपायन सांगतातः—हे जनमेजया, ते शूर, मोठमोठीं धनुष्यें धारण करणारे, पाठीला बाणासह भाते बांधणारे, हातांत अंगुलित्राण घातलेले व (कमरेला) तरवारी असलेले महातेजस्वी १ आणि सर्व धनुष्यें धारण करणाऱ्यांमध्यें श्रेष्ठ असे पांडव पांचालीसहवर्तमान श्रेष्ठ श्रेष्ठ ब्राह्मणांना आपल्या बरोबर घेऊन गंधमादनपर्वताकडे निघाले २. तेव्हां सरोवरें, नद्या, पर्वत, वनें व गर्द छायेनें युक्त असे वृक्ष त्यांनीं त्या पर्वताच्या शिखरावर अवलोकन केले ३. त्याचप्रमाणें ज्यांना निरंतर फळें व पुष्पें येतात अशा वृक्षांनीं युक्त असलेल्या, देव व ऋषि यांच्या समुदायानें सेवित असलेल्या अशा प्रदेशांतून फलमूलांवर उपजीविका करणारे व आत्मसंयमन करणारे ते वीर पांडव ४ उंच सखल, अतिशय दुर्गम व वाकड्या तिकड्या प्रदेशांतून नानाप्रकारच्या मृगांचे निरनिराळे कळप पहात पहात संचार करूं लागले ५ नंतर ऋषि, सिद्ध व अमर ह्यांनीं युक्त, गंधर्व व अप्सरा ह्यांना प्रिय आणि ज्यावर किन्नर संचार करीत आहेत अशा त्या पर्वतावर ते महात्मे चढूं लागले ६. हे प्रजापालका जनमेजया, त्या वीरांनीं गंधमादन पर्वतावर प्रवेश करितांक्षणीं एकाएकीं वारा सुटून मोठी पर्जन्यवृष्टि झाली ७. तेव्हां मोठी धूळ उडाली व तिच्याबरोबर झाडांचीं हजारों वाळलेलीं पानेंही उडूं लागलीं आणि त्यामुळें पृथ्वी, आकाश व दशदिशा एकाएकीं अगदीं भरून गेल्या ८. ह्याप्रमाणें आकाश धुळीनें भरून गेलें असतां कोणाला कांहीं समजेना व परस्पराशीं भाषणही करितां येईना ९. हे भरतकुलोत्पन्ना जनमेजया, डोळे धुळीनें भरून गेल्यामुळें व अन्याप्रमाणें लागत असलेल्या

ष्यमाणा वातेन साश्मचूर्णेन भारत १० द्रुमाणां वातभग्नानां पततां भूत-
लेनिशम्। अन्येषां च महीजानां शब्दः समभवन्महान् ११ द्यौः स्वित्प-
तति किं भूमिर्दीर्यते पर्वतो नु किम्। इति ते मेनिरे सर्वे पवनेनापि
मोहिताः १२ ते यथानन्तरान्वृक्षान्वल्मीकान्विषमाणि च। पाणिभिः
परिमार्गन्तो भीता वायोर्निलिल्यिरे १३ ततः कार्मुकमादाय भीमसेनो
महाबलः। कृष्णामादाय संगम्य तस्थावाश्रित्य पादपम् १४ धर्मराजश्च
धौम्यश्च निलिल्याते महावने। अग्निहोत्राण्युपादाय सहदेवस्तु पर्वते १५
नकुलो ब्राह्मणाश्चान्ये लोमशश्च महातपाः। वृक्षानासाद्य संत्रस्तास्तत्र
तत्र निलिल्यिरे १६ मन्दीभूते तु पवने तस्मिन्रजसि शाम्यति। महद्भि-
र्जलधारौघैर्वर्षमभ्याजगाम ह १७ भृशं चटचटाशब्दो वज्राणां क्षिप्यता-
मिव। ततस्ताश्चञ्चलाभासश्चेरुरभ्रेषु विद्युतः १८ ततोश्मसहिता धाराः
संवृण्वन्त्यः समंततः। प्रपेतुरनिशं तत्र शीघ्रवातसमीरिताः १९ तत्र साग-
रगा ह्यापः कीर्यमाणाः समंततः। प्रादुरासन्सकलुषाः फेनवत्यो विशां-

---

वाळूच्या कणयुक्त वाऱ्यानें ढकलूं लागल्यामुळें कोणी कोणाला दिसेना १०. तेथें
निरंतर भूतलावर वाऱ्यानें मोडून पडणाऱ्या वृक्षांचा व एकमेकावर आदळणाऱ्या दुसऱ्या-
ही वृक्षांचा मोठा भयंकर शब्द झाला ११. ह्याप्रमाणें वाऱ्यानें गांगरून गेलेल्या त्या
सर्वांना आकाश पडतें आहे कीं काय, भूमी विदीर्ण होत आहे कीं काय व पर्वताचे
तुकडे तुकडे होऊन जात आहेत कीं काय ? असें वाटलें १२ आणि नंतर वाऱ्यानें
भिऊन गेल्यामुळें आपल्या हातानें चापचीत चापचीत कोणी रस्त्याच्या जवळ अस-
लेल्या वृक्षाला धरून दबा धरून बसले, कोणी वारुळांत शिरले व कोणी उंच सखल
प्रदेशांचा आश्रय करून दबा धरून बसले १३. तदनंतर महाबलाढ्य भीमसेनानें
द्रौपदीला आपल्या जवळ घेतल्यावर आपलें धनुष्य हातामध्यें घेतलें आणि वृक्षाचा
आश्रय करून तो उभा राहिला १४. धर्मराज व धौम्य ह्या उभयतांनीं अग्निहोत्र आपल्या
जवळ घेऊन ते मोठ्या वनाचा व सहदेव पर्वताचा आश्रय करून बसले १५. नकुल,
दुसरे ब्राह्मण व महातपस्वी लोमश हे ज्याला जेथें जागा सांपडली तेथें ते वृक्षांचा आश्रय
करून बसले १६. ह्याप्रमाणें वारा कमी होऊन धूळ नाहींशी होत आहे तोंच मोठ-
मोठ्या धारांनीं युक्त अशी एक मोठी पावसाची सर आली १७ व वज्राचा ज्याप्रमाणें
चटचटा शब्द होतो त्याप्रमाणें तिचा चटाचटा शब्द होऊं लागला व आकाशामध्यें
चंचल अशा विद्युल्लता चमकूं लागल्या १८. नंतर एकामागून एक अशा
वाऱ्याच्या सोसाट्याबरोबर आसमंतात् भागाला व्यापून टाकणारा अशा गारांच्या